सटिप्पणब्रह्मसूत्रार्थसंग्राहककारिकाप्रारंभः

श्रीगणेशायनमः॥ स्वयंजकात्मविद्यायांबुद्धिर्येनप्रचोदिता॥ तस्यदेवस्यसवितुर्ध्यायेयंवरदंमहः॥ १॥ मुमु
क्षुमुक्तविषयित्रियसद्गुणमंडितं। सदोषोहंचतुर्दोषंनिर्दोषंकृष्णमाश्रये २ जंबूपद्मस्वस्तिकांकैःसच्छत्र
यवचक्रकैः। वज्रांकुशध्वजाष्टास्रैर्विलसन्नूर्ध्वरेखया ३ दक्षिणश्चरणाकोयंहरेर्हरतिमेतमः। मत्स्यामलाधेनुकुंभां
शुत्रिकोणांबरलक्ष्मभिः ४ गोष्पदेंदुधनुःशंखैःकलशांकेनभूषितः। सव्यःपादविधुर्भक्तचकोरान्प्रीणयत्वयं ५
सिंधुजापतिपादाब्जनौकानाविकतांगतान्। सतांहंशरणंयामिनिमग्नोभवसागरे ६ नीलकंठाभिधंतातंब्रह्मवि
द्याप्रदंगुरुं। तुरीयाश्रममाश्रित्यनिजानंदाभिधंभजे ७ स्वपाणिपद्ममेमूर्ध्निविन्यस्यकृतवान्पिता। अनुरक्तंकृता
र्थमांतंकथंविस्मराम्यहं ८ पितामहंबाळकृष्णंसच्चिदानंदमाश्रये। यत्प्रसादाद्ब्रह्मसाक्षात्कारवान्मेपिताऽभव
त् ९ पितामहगुरुंवंदेनूचानंब्रह्मकोविदं। दिवाकराभिधंहार्दतमोघ्नंबोधभास्करं १० गत्वाश्रीपांडुरंगस्यक्षेत्रंस
न्यस्यतत्रहि। सर्वात्मभावंसंप्राप्तोनीलकंठोगुरुःपिता ११ हृद्ध्वाजकुणसूत्राढ्यब्रह्मसूत्रोर्जितश्रियं। विश्वस्य
व्यवहारार्थंवेदव्यासंहरिंभजे १२ अद्वैतस्थापकाचार्यान्भगवत्पादसंज्ञकान्। वंदेश्रीशंकराचार्यान्परिव्राजोजगद्गुरू १
न् १३ अब्रह्मण्यतमःसूर्यान्स्वब्रह्मण्यानुकंपिनः। वंदेसुरेश्वरमुखांश्चतुरोविबुधोत्तमान् १४ श्रीशंकरार्यवरद

पाणिपद्मसमुद्भवाः। वेदाइवात्रचत्वारोवर्तीर्यमेजयंतिहि १५ सुब्रह्मण्येनशारीरभाष्यवर्त्मनियायिना। शारीरब्रह्म
मीमांसासूत्रवृत्तिर्विरच्यते १६ अत्रसुरेश्वराचार्यवार्तिकम्। नयुक्तंकामनामुक्तौपुंसानास्तीतिभाषितुं। देशकाला
नवच्छिन्नसुखाद्यर्थित्वदर्शनात् १७ ग्रामादिकिंचिदप्राप्तंप्राप्तुमिष्टमिहेच्छति। हेमादिविस्मृतंकिंचित्करस्थमपिलि
प्सते १८ परिहार्यंतथाऽनिष्टंकंटकादिजिहासति। रज्ज्वांसर्पादिकंकिंचित्त्यक्तमेवजिहासति १९ नियतोपायसाध्यत्वा
दवाप्यपरिहार्ययोः। विधितःप्रतिषेधाच्चसाधनापेक्षिताभवेत् २० अज्ञानांतरितत्वेनसंप्राप्तत्यक्तयोःपुनः। यथात्म्य
ज्ञानतोनान्यत्पुरुषार्थायकल्पते २१ नान्यदज्ञानतोस्तित्वंद्वितीयस्यात्मनोयथा। निवृत्तिस्तद्वदेवास्यनावगत्यात्मनोपरा
इति २२ इतिप्रारीप्सितग्रंथस्समाप्तिप्रतिबंधकनिवृत्तिफलकमंगलपद्यानि। जिज्ञासूनामत्रावधानसाधककरिष्यमाण
ग्रंथकरणप्रतिज्ञा। मुक्तिसाधनप्रवृत्तिबाधकाशंकानिवर्तकोपोद्घातः॥ ॥स्वयंशिवःशिवाभार्याप्रसिद्धाःसर्व
मंगळा। विघ्नहर्तासुतायस्यपायात्सजगदीश्वरः २२ अथवक्ष्यमाणब्रह्ममीमांसामुखेनव्याचिख्यासितव्यवेदांतवि
चारशास्त्रोपयोगिप्रमाणपरिभाषाविस्तृतिगौरवव्यावृत्तयेतिसंक्षिप्ताकथ्यते। अत्रप्रत्यक्षानुमानोपमानशब्दार्थापत्त्य
नुपलब्ध्याख्यानिस्वतंत्राणिषट्प्रमाणानि। तत्र। तत्तदिंद्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वंतत्तदाकारवृ

१ प्रमाकरणंप्रमाणं।

१ प्रत्यक्षज्ञानकरणंचक्षुरादिकंप्रत्यक्षं।

२ प्रत्यक्षप्रमाणमिति चक्षुरादिप्रनाड्या प्रमातृप्रमेययोरभेदो विषयनिष्ठो घटादिविषयप्रत्यक्षमिति फलितं।

त्यवच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वं। घटादेर्विषयस्य प्रत्यक्षत्वं तु प्रमात्रभिन्नत्वं। ननु सुखाकारवृत्त्युपहितप्रमातृचैतन्यसत्ताति
रिक्तसत्ताकत्वशून्यत्वे सति योग्यत्वं विषयस्य प्रत्यक्षत्वं। तत्र ज्ञप्तिगतप्रत्यक्षसामान्यलक्षणं तु स्वप्रकाशत्वमेव यत्साक्षा
२ दपरोक्षादिति श्रुतेः। पर्वतो वह्निमानित्याद्यनुमित्यादावपि वह्न्याद्याकारवृत्त्युपहितचैतन्यस्य स्वांशे स्वप्रकाशत्वेनाप्र
त्यक्षत्वात्। अत्र सर्वत्र दूषणभूषणादिकं वेदांतपरिभाषातद्व्याख्यानादितोऽवगंतव्यं तत्र तस्य विचारस्यैव प्रायशोऽत्रले
खात्। तत्तद्वृत्त्यंशे विषयांशे प्रत्यक्षं तु पूर्वोक्तमेव भ्रमप्रमासाधारणं। ननु इदं रजतमित्यादिभ्रमेऽप्यविद्यापरिणामरू
पानिर्वचनीयरजताद्युत्पत्तिस्वीकारे गौरवात् लाघवादापणस्थलौकिकरजतसंसर्गमात्रारोप एव साधुरिति चेन्न। आपणस्थ
रजतस्येंद्रियसन्निकर्षाभावान्न तत्संसर्गारोपः। किंतु केवलसाक्षिवेद्यानिर्वचनीयरजतारोप एव। न च ज्ञानं प्रत्यास
त्तिः। सर्वत्र ज्ञानप्रत्यासत्त्यैव निर्वाहे अनुमानाद्युच्छेदापत्तेः। तच्च प्रत्यक्षं द्विविधं सविकल्पकं निर्विकल्पकं चेति। द्विविध
मपि प्रत्येकं द्विविधं। जीवसाक्षि ईशसाक्षि चेति। अंतःकरणावच्छिन्नं चैतन्यं जीवः। मायावच्छिन्नं चैतन्यमीश्वरः।
अंतःकरणमायान्यतरोपहितं विषयिचैतन्यं साक्षी। स्वाश्रयव्यामोहिका शक्तिर्भावरूपा अज्ञानापरपर्यायाऽ
विद्या जीवोपाधिः। स्वाश्रयाव्यामोहिका भावरूपा यावद्दृश्यव्यापिका शक्तिर्माया ईशोपाधिः। प्रकारांतरेणापि २

४ वस्तुमात्रस्य प्रत्यक्षप्रमाणेनैव प्रत्यक्षत्वेन

सटिप्पणब्रह्मसूत्रार्थसंग्राहककारिकाप्रारंभः

वेनविषयावच्छिन्नत्वेतन्याभेदाभावान्नानुमितेः प्रत्यक्षरूपता। तत् अनुमानमन्वयिरूपमेकविधमेव। ननु केवलान्वयि
केवलव्यतिरेकि व्यतिरेकि वा। अद्वैतिनये सर्वस्यापि धर्मस्य ब्रह्मनिष्ठात्यंताभावप्रतियोगित्वेनात्यंताभावाप्रतियोगिसा
ध्यकत्वरूपकेवलान्वयित्वस्यैवाप्रसिद्धेः। साध्याभावरूपसाधनस्य वह्न्यादिसाध्यसामानाधिकरण्याभावे न साध्या
भावे साधनाभावनिरूपितव्याप्यत्वरूपव्यतिरेकिव्याप्तिज्ञानस्य साध्याभावप्रतियोगिवह्न्यादिरूपसाध्यकानुमिता
वनुपयोगादर्थापत्त्याख्यप्रमाणांतरेणापि धूमादौ वह्न्यन्वयव्याप्तिमविदुषोपि धूमादिज्ञानाद्वह्न्यादिज्ञानसिध्या व्यति
रेक्यनुमानस्य प्रयोजनाभावात् केवलव्यतिरेकिव्याप्तिज्ञानस्य हेतुसाध्ययोः पक्षातिरिक्ते दृष्टांतलाभावेन साक्षाद
नुपयोगाच्च। वह्निमान्धूमात्। पृथिवीतरेभ्यो भिद्यते गंधवत्वादित्यादौ धूमो वह्निं विनानुपपन्नः। गंधवत्वमितरभेदं विना
नुपपन्नमिति ज्ञानेनैव पर्वतो वह्निमान्। पृथिवीतरभेदवतीति ज्ञानसंभवात्। तेन विनानुपपन्नत्वं नाम तदभावव्याप
काभावप्रतियोगित्वं। वह्न्यभावव्यापकधूमाभावप्रतियोगी धूमः इत्याद्युपपाद्यज्ञानेन वह्न्याद्युपपादकज्ञानं
सिध्यति। पक्षमात्रवृत्त्यभावसाध्यको हेतुः केवलव्यतिरेकी। इत्यनुमानप्रमाणनिरूपणसंक्षेपः २
सादृश्यप्रमाकरणमुपमानं। मदीयागोर्गवयसदृशीत्याकारकसादृश्यप्रमायांप्रतिगवयनिष्ठगोसादृश्यज्ञानं करणं। २

इत्युपमानं ३ यस्य वाक्यस्य तात्पर्यविषयीभूतोर्थो मानांतरेण न बाध्यते तद्वाक्यं प्रमाणं वाक्यजज्ञाने चाकांक्षायो
ग्यतासत्तयस्तात्पर्यज्ञानं चेति चत्वारि कारणानि। शक्तिलक्षणाज्ञानं सहकारि इति शाब्दप्रमाणनिरूपणसंग्रहः ४
॥ ॥ उपपाद्यज्ञानेनोपपादकज्ञानमर्थापत्तिः। अर्थापत्तिपदं प्रत्यक्षपदवत्प्रमाणविशेषे तत्फले च प्रयुज्यते। [redacted]
~~ज्ञानेनोपपादकज्ञानमर्थापत्तिः~~ अर्थस्यापत्तिर्ज्ञानं यस्मादिति करणे अर्थस्यापत्तिरिति व्युत्पत्त्या फलेर्थापत्तिपदं। उ
पाद्यज्ञानं करणं। उपपादकज्ञानं फलं। येन विना यद्यत्रानुपपन्नं तत्तत्रोपपाद्यं। यस्याभावे यस्य यत्रानुपपत्तिस्तत्तत्रो
पपादकं। अनुपपत्तिरदृत्तित्वं। सा चार्थापत्तिर्द्विविधा दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति। श्रुतार्थापत्तिरपि द्विविधा। अ
भिधानानुपपत्तिरभिहितानुपपत्तिरिति। अभिधानमत्र तात्पर्यं। अनुपपत्तिरत्र वैयर्थ्यं।। उपपत्तिः साफल्यं। अभि
हितानुपपत्तिस्तु। यत्र वाक्यार्थो विगतोर्थांतरं विनानुपपन्नत्वेनार्थांतरं कल्पयति स्वसार्थक्याय। तत्र द्रष्टव्या। यथा।
तरति शोकमात्मविदिति वाक्यार्थः शोकरूपाज्ञानाख्यबंधस्याधिष्ठानज्ञाननिवर्त्यत्वरूपं मिथ्यात्वं विनानुपपन्नो बं
धस्य मिथ्यात्वं बोधयति स्वसार्थक्याय। इत्यर्थापत्तिप्रमाणनिरूपणसंक्षेपः ५॥ ॥अनुमानादिरूपज्ञाना
जन्याभावानुभवासाधारणकारणमनुपलब्धिः। अनुमानादिजन्यातींद्रियधर्माधर्माद्यभावानुभवहेतावनुमा

१ सा तु व्याप्याभावप्रतियोगिज्ञानाभावरूपा।

नादावतिव्याप्तिवारणायजन्यांतं।अंधकारादौघटाद्यनुपलब्धिसत्वेपिअभावप्रत्यक्षानुदयाद्योग्या याएवानुपलब्धेर
अभाव भावग्राहकत्वं।प्रतियोग्यनुपलब्धौयोग्यतातुतर्कितप्रतियोगिसत्वप्रसंजितप्रतियोगिकत्वं।आद्याभावाधिकरणेतर्किते
४ भाव नप्रतियोगिसत्वेनप्रसंजितआपादनयोग्यःप्रतियोगीयस्याःसानुपलब्धिस्तर्कितप्रतियोगिसत्वप्रसंजितप्रतियोगिनी घटानुप लब्धिरूपो
तस्याभावस्त्वत्व।तेनस्फिरालोकवर्तिभूतलेयदिघटःस्यात्तदाघटोपलंभःस्यादित्यापादनसंभवात्तादृशभूतलेघटा
नुपलब्धिर्घटाभावइत्यभावप्रत्यक्षैककरणंअंधकारेत्वनुपलब्धिसत्वेपितादृशापादनयोग्यताया असंभवान्ना
नुपलब्धिगम्यताभावस्य।तथाचघटाद्यभावाकारवृत्तेर्नेंद्रियजन्यत्वंइंद्रियस्यस्वसंसृष्टभूतलनिष्ठाभावाख्यविषये
णासंयुक्ततादात्म्याख्यसन्निकर्षेप्यनुदयात्।घटाद्यनुपलब्धावुदयात्।भवत्यनुपलब्धेर्मानांतरत्वं।यथादशमस्त्व
मसीत्यादिवाक्यजन्यज्ञानस्याहंदशमइत्याकारस्यप्रत्यक्षत्वेपितत्कारणवाक्यस्यनप्रत्यक्षप्रमाणत्वं।किंतुशाब्द
प्रमाणत्वमेवतथानुपलब्धेर्नप्रत्यक्षप्रमाणत्वं।किंतुमानांतरत्वमेव।कॢप्तप्रत्यक्षसामग्रीसत्वेप्यभावप्रत्ययो
नुदयात्।योग्यप्रतियोग्यनुपलब्धौचभावप्रत्ययोदयात्। ।इत्यनुपलब्धिप्रमाणनिरूपणसंग्रहः ६ इतिप्रत्यक्षा
नुमानोपमानशाब्दार्थापत्त्यनुपलब्ध्याख्यानिषट्तत्रापिषट्प्रमाणान्यतिसंक्षेपेणप्रदर्शितानि।उक्तानांप्रमाणा ४

चैतन्यंत्रिविधं।प्रमातृचैतन्यंप्रमाणचैतन्यंविषयचैतन्यंचेति।यथाविषयेंद्रियसंनिकर्षादिनाजीवोपाध्यंतःकरणस्यवृत्ति
भेदाजायंतेएवंसृज्यमानप्राणिकर्मवशेनभोपाधिमायायावृत्तिविशेषाइदानींस्रष्टव्यमिदानींपालयितव्यमिदानीमुप
संहर्तव्यमित्याद्याकाराजायंते।उपाधियुतमुपहितं।विशेषणयुतंविशेषणविशिष्टं।उपलक्षणयुतमुपलक्षितमित्युच्य
ते।कार्यान्वयित्वेनव्यावर्तकप्रकारतयाभासमानंवस्तुविशेषणं। यथारूपविशिष्टोघटोह्यनित्यइत्यत्ररूपंविधेया
नित्यत्वरूपकार्यान्वयित्वाद्विशेषणं।विधेयंकार्यमित्युच्यते।यदवगमयितुमिष्टंतद्विधेयं।कार्यानन्वयित्वेसतिवर्तमा
नत्वेसतिव्यावर्तकप्रकारतयाभासमानमुपाधिः।यथाकर्णशष्कुल्यवच्छिन्नंनभःश्रोत्रमित्यत्रविधेयश्रोत्रपदार्था
नन्वयिनीकर्णपालिरुपाधिः।उपाधिरेवपरिचायकइत्युच्यते।कदाचिद्वर्तमानत्वेनावगतत्वेसतिव्यावर्तकप्रकारतया
भासमानंउपलक्षणं।यथाकाकवद्देवदत्तस्यगृहमित्यत्रविधेयदेवदत्तगृहप्रत्यायकःकाकउपलक्षणं॥ ॥इतिप्र
त्यक्षप्रमाणनिरूपणसंक्षेपः १ अनुमितिकरणमनुमानं।अनुमितिकरणंतुव्याप्तिज्ञानमेवतत्संस्कारोवांतर
व्यापारः।नतुव्याप्तिस्मरणंपरामर्शोवाकरणं।तथाचधूमवानितिपक्षधर्मताज्ञानेधूमोवह्निव्याप्यइत्यनुभवाहि
तसंस्कारोद्बोधेसतिवह्निमानित्यनुमितिरूपावृत्तिरुदेति।व्याप्तिज्ञानरूपानुमानस्येंद्रियद्वाराविषयदेशगमनाभा

१ तन्या

चोज्ञानग्राहकसामग्र्यांस्वाश्रयादिरूपायांदोषाभावनिवेशेनतत्रदोषवशेनप्रामाण्यस्यैवाग्रहात्तत्रतत्संशययोग्यज्ञानग्राहक
५ सामग्र्यामव्याप्तिः॥ ॥इतिप्रामाण्यप्रक्रियानिरूपणातिसंक्षेपः ७ प्रतियोग्यनुपलब्धिरूपप्रमाणग्राह्योऽभाव
श्चतुर्विधः प्रागभावप्रध्वंसाभावान्योन्याभावात्यंताभावभेदात्।सर्वोप्यभावोध्वंसप्रयोग्येवाविद्यानिवृत्तौतत्प्र
तेत्राणांसर्वेषामपिनिवृत्त्यवश्यंभावात्।नचघटध्वंसनाशेघटोन्मज्जनापत्तिः।प्रागभावध्वंसात्मकघटध्वंसेपिप्रागभा
वानुद्भवात्।आरोपितप्रतियोगिध्वंसस्यतुनित्याधिष्ठानेप्रतीयमानस्याधिष्ठानमात्रत्वं।अधिष्ठानावशेषोहिनाशःक
ल्पितवस्तुनः।नान्यदज्ञाननोस्तित्वंद्धितीयस्यात्मनोयथा।निवृत्तिरात्मनस्तद्वदेवास्यनावगत्यास्ततोऽपरा।निवृत्तिरात्मामोहस्य
ज्ञातत्वेनोपलक्षितइतिवार्तिकात्।एवंशुक्तिरूप्यविनाशोपितदवच्छिन्नंचैतन्यमेव।अद्वैतिनयेसर्वस्यापिकार्यस्य
स्वोपादानाविद्याधिष्ठानाश्रितत्वनियमाच्छुक्तिरूप्यमपिचैतन्यस्थं।अत्यंताभावोप्यधिकरणात्मकइतिमतांतरं॥ ॥
इत्यभावनिरूपणातिसंक्षेपः ८ तुच्छानिर्वचनीयाचवास्तवीचेत्यसौत्रिधा।ज्ञेयामायात्रिभिर्बोधैःश्रौतयौक्तिकलौ
किकैरितिविद्यारण्यपादाः।अविद्यासत्यविद्यायामेवासित्वाप्रकल्पते।ब्रह्मदृष्ट्यात्वविद्येयंनकथंचनयुज्यतेइतिवार्तिकं।
प्रतिजीवंविभिन्नेवमूलाविद्येतिकेचन।अंशभेदेनोपपत्तेरेकत्वंबहवोवदन्।प्रतिजीवमावरणविक्षेपादिशक्तिविशिष्टा ५

शभेदेनेत्यर्थः।मायायाःसांशत्वंब्रह्मणोनिरंशत्वमितिवेदांतडिंडिमः।एकैकजीवस्यैकैकएवांशःकारणंवपुः।यत्कार
णशरीरस्यनाशोमुक्तःसएवहि।अन्येजीवांतराभासाअज्ञत्वात्संसरंतिहि।यथानेकमठवर्त्याकाशस्यसदामहा
काशैक्येप्युपाधिकोभेदोव्यवहारेप्रतीयते।सोपिभेदस्तत्तन्मठनाशेनश्यतितदंतर्वर्त्याकाशस्यानावृत्तमहाकाशात्म
कतास्फुटाभवति।अन्येअनष्टमठगताआकाशाआवृताःप्रतीयंतेतथामुक्तामुक्तजीवाइत्यर्थः।प्रपंचस्यकदा
प्यनुपहितस्वप्रकाशब्रह्मविषयताभावाज्जीवन्मुक्तानांशास्त्रीययावद्भिन्नब्रह्मदृष्ट्याप्रपंचात्यंतासत्वबोधःश्रु
त्याभिप्रेतः।शास्त्रदृष्ट्यातूपदेशोवामदेववदितिन्यायस्यवक्ष्यमाणत्वात्।एतेनैकमुक्तौसर्वमुक्तिप्रसंगइतिनिरस्तं।
प्रतिसृष्टिएकजीववादानेकजीववाददृष्टिसृष्टिजीवसृष्टीशसृष्टितन्निवृत्तिकल्पाःफलाध्यायेसंपत्यादेस्फुटंवक्ष्यंत
इतिनेहविस्तरःकृतः॥ ॥इत्यविद्यानिवृत्तिनिरूपणातिसंक्षेपः ९ अत्रवेदांतविचारशास्त्रंनारंभणीयंविषयप्रयोजनयो
रभावादितिप्रथमःपूर्वपक्षः।१ निखिलवेदस्यविध्यर्थकत्वाद्विध्यर्थकसकलवेदार्थविचारप्रवर्तकधर्ममीमांसाशास्त्रेणैवब्रह्ममीमां
साशास्त्रीयविचारस्यगतार्थत्वान्नारभ्याब्रह्ममीमांसेतिद्वितीयः २ अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति।अपामसोमममृ
ताअभूमागन्मज्योतिरविदामदेवान्।इत्यादिश्रुतिभिःक्रियाफलीभूतसुखस्यनित्यत्वश्रवणात्सुखसाधनेकर्मणिवैराग्यासंभवेनत
त्पूर्वकशमादिरूपमुक्तिसाधनचतुष्टयासंभवादनारभ्यंब्रह्ममीमांसाशास्त्रमितितृतीयः ३ ब्रह्मणोलौकिकत्वेनाप्रसिद्धत्वादप्रसिद्ध

सिद्धेर्विधावपि लक्षणानुपपत्ता। न च लक्ष्यत्व ७

१क

६ ब्रह्मविषयकज्ञानोद्देशेन वेदान्तवाक्यकरणं ब्रह्मविचारशास्त्रं नारम्भणीयमिति चतुर्थः पूर्वपक्षः ४ ननु निरस्तसमस्तोपाधिकं वाङ्म
नसातीतं चेद्ब्रह्म तर्हि तत्स्वरूपावेदकप्रमाणाविषयत्वान्नरशृंगवदसदेव स्यात्। नैष दोषः। अविषयस्यापि तस्य लक्षयितुं शक्यत्वात्। तथाहि सत्य
ज्ञानादिवाक्यं तावल्लोकसिद्धसत्यादिप्रतिपादनद्वारा यथोक्तरीतिं निर्विशेषं ब्रह्म विधिमुखेन लक्षणया प्रतिपादयति। अथात आदेशो नेति नेत्यादिकं तु ब्रह्मव्य
तिरिक्तसकलनिषेधेन प्रपंचव्यतिरेकावच्छिन्नं तद्व्यतिरेकमुखेनाभिदधत्तद्व्यतिरेकविनिर्मुक्तं तत्स्वरूपं लक्षयति। न चेदृशस्य वेदान्तवाक्यस्याज्ञातज्ञापक
त्वेनोत्पत्तिविधिरूपत्वाद्विधौ लक्षणानभ्युपेतेति स्थिते तस्य लक्षणानुपपत्तेति वाच्यं। प्रतिनियतवाच्यार्थत्यागेन विधौ लक्षणास्वीकारे लक्ष्यार्थस्यानिय
तत्वादनेकत्वेन संदेहस्यादित्यभिप्रायेण हि विधौ लक्षणानभ्युपगम्यते। यत्र तु मुख्यान्तरेण संदेहो निवार्यते तत्र विधावपि लक्षणा न दुष्यति। यथार्धमंतर्वे
द्यर्धं बहिर्वेदीति। एवमत्रापि व्यतिरिक्तसकलनिषेधादनेकत्वसंदेहाभावात्सविशेषेण तस्यैव लक्ष्यत्वे विशेषस्यैव ग्रहणान्निरुपाधिकस्य शब्दाविषयत्व
मिति मतेरयं॥ ॥लक्ष्यत्वस्योपलक्षणत्वेन ग्राह्यकोटावननुप्रवेशात्। अतोऽत्र वागविषयत्वोक्तिरभिधावृत्त्यभिप्राया। अत एवौपनिषदत्वं वेद्यत्वम
प्याम्नातं। तं त्वौपनिषदं पुरुषं पृच्छामीति विधिनिषेधमुखवाक्यद्वैविध्यात् तज्जनिता ब्रह्माकारमनोवृत्तिरपि द्वैधा भवति। तत्र विधिरूपवाक्यजनितामनो
वृत्तिः सोपधानबलेन निरुपाधिकं ब्रह्म विषयीकुर्वती तदवगमयति। न चैतावता निरुपाधिकस्य मनोवृत्तिविषयत्वनियमभंगः। मनोवृत्तेः सोपाधेः सज्ञा
न वेनास्य सोपाधिकत्वात्। नाप्यवस्तुत्वं उपाधेरुपलक्षणत्वेन विषयकोटावननुप्रवेशात्। एवं निषेधमुखेन नेति नेति मनसैवेदमाप्तव्यमित्यादिवाक्यजनितमनो
वृत्तिरपि समस्तोपाधिव्यतिरेकावच्छिन्नं तद्ब्रह्मगोचरयन्ती नीलद्रव्ये शुक्लव्यतिरेकस्यात्मानं चकतकरजोन्यायेन निवर्तयति। एतदेवाभिप्रेत्याम्नायते मनसै
वेदमाप्तव्यमिति। इत्थं वाच्यस्यापि शब्दबोध्यत्वप्रकारः। अथवा। विना शक्तिं विना लक्षणां विना संबंधान्तरं सुप्तोत्थापकवत्तु वाङ्मनसाविषयात्म वाक्य
प्रतिपादनमिति वार्तिकाचार्याः। तथाहि। दुर्बलवादविद्याया आत्मत्वाद्बोधरूपिणः। शब्दशक्तेरचिंत्यत्वाद्विद्मस्तं मोहहानतः ॥१॥ अगृहीत्वै ६
व संबंधमभिधानाभिधेययोः। हित्वा निद्रां प्रबुध्यंते सुषुप्ते बोधिताः परैः ॥२॥ जाग्रद्वन्न यतः शब्दं सुषुप्ते वेत्ति कश्चन। ध्वस्तोऽतो ज्ञानतोऽज्ञानं ब्रह्मास्मी
ति भवेत्फलं ॥३॥ अविद्याघातिनः शब्दाद्याहं ब्रह्मेति धीर्भवेत्। नश्यत्यविद्यया सार्धं हत्वा रोगमिवौषधमिति ॥४॥ एतत्स्फुटतरं फलाध्याये संपादे वक्ष्यते।

२ यथार्थज्ञानपरस्तु प्रमाणशब्दो भावल्युडन्तः। प्रमाकरणपरस्तु करणल्युडन्तः।२

१ स्वरूपं　　१ स्वरूपं　　२ यथार्थज्ञानरूपाणां तु

तं द्विविधं प्रामाण्यं। व्यावहारिकतत्त्वावेदकं पारमार्थिकतत्त्वावेदकं चेति। तत्र जीवब्रह्मैक्यपरप्रमाणव्यतिरिक्तप्रमा
णानां व्यावहारिकं। जीवब्रह्मैक्यपराणां पारमार्थिकं प्रामाण्यं। सर्वेषां प्रमाणानां तद्वति तत्प्रकारकज्ञानत्वरूपं प्रामा
ण्यं स्वत एवोत्पद्यते ज्ञायते च। तच्च प्रामाण्यमुत्पत्तौ ज्ञानसामान्यजनकसामग्रीप्रयोज्यं न तदधिकं गुणमपेक्षते। ज्ञा
मात्र नसामान्यजनकसामग्रीजन्यत्वमेव प्रामाण्यस्योत्पत्तौ स्वतस्त्वं। ज्ञप्तौ स्वतस्त्वं तु दोषाभावे सति यावत्स्वाश्रयज्ञा
नग्राहकसाक्षिचैतन्यादिसामग्रीग्राह्यत्वं। स्वं प्रामाण्यं। ज्ञानं प्राण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसाम उक्तज्ञानग्राहकसामग्र्या
ज्ञाने ग्रीग्राह्यमिति फलितोऽर्थः। अप्रामाण्यं तु परत एवोत्पद्यते ज्ञायते च। उत्पत्तौ स्वतस्त्वे सर्वमपि ज्ञानमुत्पन्नमप्रमाणमे
व स्यात्। ज्ञप्तावप्यप्रामाण्यस्य स्वतस्त्वं न संभवति प्रामाण्याभावस्य मिथ्याज्ञाननिष्ठस्येदं रजतमित्यादिवृत्तिज्ञा
नानुपनीतत्वेन साक्षिणा गृहीतुमशक्यत्वात्। विशेषणविशेष्यतत्संबंधावगाहियथार्थज्ञाननिष्ठयथार्थसंबंधाव
गाहित्वरूपप्रामाण्यस्य तु साक्षिणा गृहीतुं शक्यत्वात् प्रामाण्यस्य स्वतस्त्वं संभवति। ननु प्रामाण्यस्य स्वतस्त्वे प्रथमं दूर
तो जलज्ञानक्षण एव प्रामाण्यस्यापि तत्रोत्पन्नत्वात् ततो ममोत्पन्नं जलज्ञानं प्रमा वा न वेति पूर्वोत्पन्नजलज्ञानानुव्यव
सायेनैव तत्र तत्प्रामाण्यस्यापि ग्रहात्पुनस्तत्र प्रमा वा न वेति प्रामाण्यसंशयेन नैव भाव्यमिति चेन्न। स्वतो ग्राह्यत्वलक्ष

३ यावत्सापानुपनीत यथार्थज्ञानग्राहकसामग्रीग्राह्यत्व समनियतग्राह्यस्य घटघटत्वयोस्तुल्यवित्तिवेद्यत्ववत्　　ज्ञानसामान्यग्राहकसामग्रीग्राह्यत्वरूपे
हेवि

कारब्रह्मसूत्राणियेषांसूत्रत्वमंजसा ६ उत्सन्नान्वेदानुद्धृत्यतानृग्यजुरादिभेदेनचतुर्धाव्यभजत्।तत्रऋग्वेदंपु
नश्चतुर्विंशतिधा।यजुर्वेदमेकशतधा।सामवेदंसहस्रधा।कृष्णोवेदव्यासोथर्ववेदंद्वादशधाव्यभजत् ६ अ
ल्पाक्षरमसंदिग्धंसारवद्विश्वतोमुखं।अस्तोभमनवद्यंचसूत्रंसूत्रविदोविदुः ७ निर्विशेषितसूत्रत्वं ब्र ह्मसूत्र
स्यचाप्यतः।यथाव्यासत्वमेकस्यकृष्णस्यान्येविशेषणात् ८ सविशेषितसूत्राणित्वपराणिविदोविदुः।मुख्यस्य
निर्विशेषेणशब्दोन्येषांविशेषतः ९ इतिवेदविदःप्राहुःशब्दतत्त्वार्थवेदिनः।सूत्रेष्वेतेषुसर्वेषुनिर्णयःसमुदीरितः १०
शब्दजातस्यसर्वस्ययत्प्रमाणश्चनिर्णयः।एवंविधानिसूत्राणिकृत्वाव्यासोमहायशाः ११ ब्रह्मरुद्रादिदेवेषुमनुष्यपितृ
पक्षिषु।ज्ञानंसंस्थाप्यभगवान्क्रीडतेपुरुषोत्तमः १२ गरुडपुराणे।अथातःशब्दपूर्वाणिसूत्राणिनिखिलान्यपि।प्रारभ्यंते
नियत्येवतत्किमत्रनियामकं १३ एवमुक्तोनारदेनब्रह्माप्रोवाचसत्तमः।सिसृक्षोःपरमाद्विष्णोःप्रथमंद्वौविनिःसृतौ १४
ओंकारश्चाथशब्दश्चतस्मात्प्राथमिकावुभौ।तद्धेतुत्ववदंश्चापितृतीयोत्रउदाहृतः १५ इति।ओंकाराथशब्दा
द्याभ्यांयदानंतर्यमुच्यते।तस्यार्थस्वरूपमापाशास्त्रार्थहेतुत्वमनुवर्त्यतःशब्दइत्यनुवदन्। ओम
स्य

थशब्दाभ्यांतृतीयोतःशब्दःशास्त्रारंभसूत्रेउदाहृतःप्रयुक्तोभवतीतिशेषः १५ किंचऋक्शाखीयद्वितीयाष्टकसंहि
तास्थद्विपंचाशः ५२ दृक्संख्येवामनसूक्तगतायाउपह्वयेसुदुघांधेनुमेतांसुहस्तोगोधुगुतदोहदेनां।श्रेष्ठंसवंसवि
तासाविषन्नोभीद्धोघर्मस्तदुषुप्रवोचं।इत्यृचोव्याख्यानप्रसंगेनचतुर्वेदभाष्यकृद्भिःश्रीविद्यारण्यपादैरुदाहृ
तार्षवचनानिलिख्यंते॥शिवपुराणेकालिकाखंडेकाशीमहात्म्येलद्धुकेश्वरोपाख्यानेकणादाद्युत्पत्तिनिरूपणा
वसरेनारदंप्रतिसनत्कुमारवचनं।कृतेज्ञानप्रदःसत्यस्त्रेतायांदत्तएवतु।द्वापरेव्यासनामाचकलौशंकरनाम
धृक् १ अत्रेर्दत्तःशक्तिपुत्रसुतोव्यासःप्रकीर्तितः। सुतःसाक्षाच्छंकरःपरिकीर्तितः २ सत्योब्रह्मा शिवगुरु
हरिर्दत्तोव्यासोरुद्रःप्रकीर्तितः।शंकरःसवितासाक्षादीश्वरःसर्वदैवतं ३ युगेयुगेप्रनष्टस्यशास्त्रस्योद्धरणाय
वै।श्रुतिस्मृत्यर्थबोधायपाषंडनिधनायच ४ अवतारांश्चकारासौश्रुतिस्मृत्युदितान्स्वकान् ५ विष्णुधर्मोत्त
रेश्रीमद्रामचंद्रपुष्करनामकयक्षसंवादेश्रुतिव्याख्याप्रस्तावेश्रीरामंप्रतिपुष्करवाक्यंकल्पसंज्ञकं।प्रामाणि
कःश्रुत्युदितःसूत्रार्थोव्यासोक्तरीत्याप्रतिपादितश्चेत्।व्यासोदितंशंकरबोधितंचेद्यःशंकरोसौसवितासई
शः १ व्याकुर्वन्व्याससूत्रार्थंश्रुतेरर्थंयथोचिवान्।श्रुतेर्न्याय्यःसएवार्थःशंकरःसवितानना २ इतिश्रुत्यर्थेतु।

उपांगी कार्यत्वेन द्वयेस्वीकरोमि। सुदुघां सुष्ठु दोग्धि कां शुभकर्मभिर्व्यासादिभिः स्वत्रप्रणायेनदुह्यमानत्वात्। धेनुं कामधे
नुस्थानीयां धिनोति प्रीणयतीति धेनुस्तां। एतामध्यात्मपरांश्रुतिं। सुहस्तः सुखहस्तः सुखकरः शंकराचार्यः। गोधुक्त्वत्र
वाचां तात्पर्याभिज्ञो भाष्यकारः। उतयथा। एनां प्रकृतामध्यात्मपरांश्रुतिं। दोहत् दोग्धि श्रुत्यर्थसारं कथयति। तथैव
तदर्थेनान्यथेति शेषः। श्रेष्ठं अज्ञानलक्षणस्यांतस्ताः मसो हंतृ। सवं जन्म। शंकराचार्यरूपेण। सविता सर्वा[illegible]वेपत्
आसादितवान् प्राप्तवान्। नोस्मदर्थे। सवितृपदवाच्यः सवितानसूर्यमंडलाधिकारी केवलं जीवः किंतु अर्कीभाघर्मः। अ
भीद्धः अभि अध्यात्मं प्रतिदेहं इद्धः अग्निवद्रूपेण इंधेप्रकाशत इति अभीद्धः इंधिदीप्तिदेवनयोः। घर्मोविगलितावियः परा
त्मैव घर्मःक्षरणदीप्त्योः। तत्र उ। तत्र शंकरनाम्नावतीर्णः सवितृशब्दवाच्यं ब्रह्मैव। सु सुष्ठु असंशयं। प्रप्रकर्षेणवोचमवोचं
अस्मिन्मंत्रे कथितवानस्मीति मंत्रार्थः॥ ॥इत्युपोद्घातः॥ ॥

श्रीगणेशायनमः। विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान्। सरस्वतीं प्रणोम्यादौ सर्वकार्यार्थसिद्धये १ सुब्रह्मण्यानुग्रहेण
नीलकंठ[illegible]महागुरोः। करोति गुणसूत्राढ्यं ब्रह्मसूत्रार्थसंग्रहं १ वेदांतानां विचारस्तु पुरुषार्थसमर्पकः। इति यत्नोयमार
ब्धो नतु प्रौढिप्रकाशने २ सिद्धांतरसपूर्णानि सद्ग्रंथकुसुमानि हि। भ्राजंते विद्वदारामे यशोगंधेन चारुणा ३ तत्रैवात्रो
पचीयंते सिद्धांतरसबिंदवः। अतो रसज्ञसाधूनां मोदकोस्त्वेषसंग्रहः। ४ भो सज्जनाः सरसवाङ्मयतत्त्वविज्ञा विज्ञापया
मि भवतोहमुदारचित्तान्। युक्तं प्रमादकलुषे मदुदीरितांबुशोध्यं भवद्भिरिह केतकीभवद्भिः ५ श्रुत्वा भाषितमव्यक्त
मज्ञवक्त्रे हि बालके। संतो मुदं प्रयांत्येव दोषदृष्टिं न कुर्वते ६ अत्रैवमुपोद्घातः। स्कांदे। नारायणाद्विनिष्पन्नं ज्ञानं कृत
युगे स्थितं। किंचित्तदन्यथाजातं त्रेतायां द्वापरे[illegible]खिलं १ गौतमस्य मुनेः शापाज्ज्ञाने त्वज्ञानतां गते। संकीर्णबुद्धयो
देवा ब्रह्मरुद्रपुरःसराः २ शरण्यं शरणं जग्मुर्नारायणमनामयं। तैर्विज्ञापितकार्यस्तु भगवान्पुरुषोत्तमः ३
अवतीर्णो महायोगी सत्यवत्यां पराशरात्। उत्सन्नान्भगवान्वेदानुज्जहार हरिः स्वयं ४ चतुर्धा व्यभजत्तां
श्च चतुर्विंशतिधा पुनः। शतधा चैकधा चैव तथैव च सहस्रधा ५ कृष्णो द्वादशधा चैव पुनस्तस्यार्थवित्तये। च

ज्ञनरूपसंसारिणो जीवस्य प्राग्बहुषु जन्मसु संपादितस्य खल नपतनक्षतृष्णमहारोगमहोदकनिमज्जनसिंहव्याघ्रव्याला
९ दिदुष्टसत्वाक्रमणचोरादिकृतसर्वस्वापहारकारागाररोधनशिरश्छेदनादिमहापद्भ्यः फलाभिसंधिरहितस्वाभाविकभूतदय
यासकलवर्णाश्रमसाधारणाया प्राणिमात्रसंरक्षणात्तारतम्येन कारणांतरेण वा संचितमहापुण्यस्य प्रारब्धेनोदये संस्कार
फलोन्मुखे सति । स्वनियामकपित्रादिना गुरूपसदनपूर्वकं सांगवेदाध्ययने प्रवर्तितो गुरुमुखादध्ययनपूर्वकं श्रुतेरापातज्ञा
नी भवति । उपपन्नत्वसाधकतात्पर्यलिंगोपहितत्वानुसंधानं विना केवलशाब्दशक्तिलक्षणाद्यन्यतरवृत्त्या व्यवहारबलेन
शाब्दार्थज्ञानमापातज्ञानं । तस्य काम्यानित्यत्वमोक्षनित्यत्वश्रवणाजनितकाम्यमंदादरपूर्वकं प्रायशो निष्कामवैदिकाव
श्यककर्माचरणसामर्थ्याद्वैराग्यादिसाधनचतुष्टयसंपत्तिः संपाद्या । अवश्यकर्तव्यत्वेन ज्ञानविषया भवति । तत्संभाव्यत्वा
सकृदनुसंधानजनितवेददृढविश्वासेन नित्यकर्मैवानुतिष्ठति । तेनांतः शुद्धौ शमदमादी निनिष्कामकर्मापेक्षया ज्ञानस्यांत
रंगसाधनान्यनुतिष्ठति । [redacted] ७ सत्यां साधनसंपत्तौ स्वाध्यायाधीत्यनंतरं । प्रागूर्ध्वं वाध
र्मजिज्ञासाया जिज्ञासितुं ब्रह्म हेतु । ज्ञातुं च शक्यते नैवासत्यां तस्यां हि शक्यते ८ तस्मात्साधनसंपत्तेरानंतर्यं हि बोध्यते । अथ
शब्देन नो धर्मजिज्ञासोपरितोच्यते ९ अतः शब्दोऽथ शब्देन सूत्रेस्मिन्सूचितस्य हि । साधनानां हि द्विचारहेतुत्वस्यानुवादकः १० ९

अनुवादफलं त्वत्राहेतुत्वाक्षेपवारणात् । साधनानां हि द्विचारहेतुत्वं न्याय्यते व हि ११ अथ वाचस्पतिमतं । उक्तसाधनसंप
त्तेरूर्ध्वं दुःखापनोदहेतुः । ब्रह्मज्ञानं जायतां मे इतीच्छोदेति तूत्कटा १२ विना विचारं न ज्ञानमतो वेदविचारणा । गुरोः सकाशा
त्कर्तव्येत्यर्थादाक्षिप्यते न हि १३ जीवाभिन्नब्रह्मसाक्षात्कारफलकवेदविचारणा १३ प्रयोजनस्य विषयस्यापि बोधत
एव हि । प्रवृत्तिसंभवाच्छास्त्रेण विधेया विचारणा १४ विधायकत्वाभावे विधिश्रोतार्थस्यानुवादतः । श्रुतावुक्तस्यानुबंधच
तुष्कस्यात्र लाभतः । नास्य सूत्रस्य वैयर्थ्यमिति वाचस्पतेर्मतं १५ इह जन्मनि जन्मांतरे वानुष्ठितसाधनसंपत्त्यूर्ध्वं विषयप्र
ज्ञा योजनावगतिप्रभावाद्ब्रह्मैनोत्कटेच्छया ब्रह्मनिष्ठश्रोत्रियगुरूपसत्तिपूर्वकं विचारे प्रवर्तते । स तु विचारो भेदाभेदोभयवि
षयकोपि वेदात्कर्तुं शक्यत इति अभेदविषयक एव विचारः कर्तव्य इति श्रोतव्य इति विधिना नियम्यत इति विवरणाचार्यम
तं । वेदतात्पर्याभिज्ञहिरण्यगर्भाद्यनाद्यध्यापकपरंपरा ... भिमतश्रौतविषयप्रयोजनावबोधेनैव विचारप्रवृत्तिसंभवा तत्त्वंपदार्थैक्यावबोधक
द्विचारो न विधेय इति भगवद्वाचस्पतिमतं । १५ शास्त्रप्रवृत्तिप्रयोजकाधिकारिविषयसंबंधप्रयोजनरूपानुबंधचतुष्टयं
प्रदर्श्यते । आपाततः प्रसिद्धस्य सर्वज्ञत्वादिना श्रुतौ । निजात्मत्वेनापि वेदे ब्रह्मणो विश्रुतस्य हि १६ वास्तवस्य स्वरूपस्य ज्ञाना
दस्ति महत्फलं । सर्वदुःखस्यापनोद इति वेदे हि दृश्यते १७ तरति शोकमात्मवित् । जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत्प्रकाशयते ।

तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते। इति हि वेदे दृश्यत इत्यर्थः। अनेन सर्वानर्थरूपदुःखात्यंतिकनिवृत्तिः प्रयोजनं। त्वंपदार्थै
१० क्येनाज्ञातं ब्रह्म शास्त्रविषय इत्युक्तं भवति। सर्वानर्थनिवृत्तिफलकत्वंपदार्थाभिन्नब्रह्मज्ञानकामोधिकारी। त्वंपदार्थाभिन्न
ब्रह्मणा सह शास्त्रस्य प्रतिपाद्यप्रतिपादकभावः संबंधोर्थादेव सिद्धो भवतीत्यनुबंधचतुष्टयं सिध्यति १७ अहं ब्रह्मावबोधा
वसानवेदांतवाक्यतः। आपाततोपि विज्ञातमात्मत्वे न दृढं यदि। पुनर्विचारकरणं किमर्थमिति चेच्छृणु १८ यद्यभेदेन विज्ञेयं
ब्रह्म तस्य निजात्मनः। स्वरूपं कलहायंते मनोदेहादिभावतः १९ तत्राविचार्य यत्किंचिन्मन्यते तात्मेति वेद्यदि। श्रेयसः प्रतिह
न्येतानर्थं बाधिकं प्राप्नुयात् २० विचाराद्वास्तवो ह्यात्मावबोद्धुं शक्यते त्विति। शास्त्रं ब्रह्मविचाराख्यं मुनिनारभ्यतेधुना
२१ सूत्राणां सर्ववेदानामर्थनिर्णायकत्वतः। श्रुतिवृत्तिस्थनत्यप्रायः श्रुतिसमार्थता २२ अथातोविवरणाचार्यप्रोक्त
सूत्रार्थ उच्यते। जिज्ञासापदमत्रत्यं विचारस्योपलक्षणं २३ यो ब्रह्मवेद ब्रह्मैव भवतीत्यैक्यदर्शनात्। द्वासुपर्णेत्यादिवेदा
ज्जीवेशद्वित्वदर्शनात् २४ स्वेन भिन्नाभिन्नतया ज्ञेयब्रह्मविचारयोः। पर्यायेण ब्रह्मबोधांगत्वेन प्राप्तयोर्द्वयोः २५ श्रोतव्य
इति वेदेन स्वाभिन्नब्रह्मगोचरः। विचार एव कर्तव्यो नान्यस्त्विति नियम्यते २६ स्वाभिन्नब्रह्मगोचर एव विचारः कर्तव्यो न्य
स्तु स्वभिन्नब्रह्मगोचरेण कर्तव्य इति नियम्यते। यथा व्रीहीनवहंतीत्यवघातो नियम्यते ❀ अत्र नियमविधित्वेनाभिम १०

४ सुरेश्वरपद्मपादहस्तामलकतोटकाचार्यशिष्याश्चत्वारो भगवत्पादशिष्या मस्करीन्द्राः। ४।

श्रीगणेशाय नमः। दृङ्गा जड्डुणस्त्राच्छ्र ब्रह्मसूत्रोर्जितश्रियं। विश्वसद्व्यवहारार्थं वेदव्यासं हरिं भजे १ अद्वैतस्थाप
काचार्यान् भगवत्पादसंज्ञकान्। वंदे श्रीशंकराचार्यान् परिव्राजो जगद्गुरून् २ अब्रह्मण्यतमःसूर्यान् ब्रह्मण्यानुकंपिनः
। वंदे सुरेश्वरमुखांश्चतुरो विबुधोत्तमान् ३ श्रीशंकरार्यवरदपाणिपद्मसमुद्भवाः। वेदा इवात्र चत्वारो वद्वीर्ये मिज
यंति हि ४ भगवद्व्याससूत्राणामर्थसंग्रहकारिकाः। सुब्रह्मण्येन रच्यंते शीघ्रबोधाय कारिकाः ५ ओम्। अथातो ब्रह्म
जिज्ञासा। १। अहं ममेति चाध्यासादनाद्यध्यस्तमायया। सदा संसरतः पुंसः पूर्वपुण्योदये सति १ नित्यस्वाध्यायविधिना
धीतस्वाध्यायतः श्रुतेः। आपातज्ञानिनः काम्यफलानित्यत्वसंश्रवात् २ मोक्षस्य सुखरूपस्य नित्यत्वावगमाच्छ्रुतेः। काम्ये
स्वल्पादरो भूत्वा नित्यं कर्मानुतिष्ठति। किंचित्सुखैककर्मफले संभाव्यास्याद्विरक्तता ३ शमादिषट्कसंपत्तिर्नित्यानित्यविवेच
नात् संभाव्यते हि वेदोक्तनिष्कामानुष्ठितेर्बलात् ४ संभाव्यत्वध्यासनेस्त्वविश्वासो वर्धते श्रुतौ। स्वतः प्रमाण आम्नाये दृढ
विश्वासयोगतः। प्रत्यवायो भवेद्यस्मिन्वेदोक्तेप्यननुष्ठिते ५ तदेव कर्म कुरुते नान्यत्त्रैयत्वनिश्चयात्। बहुकालमनुष्ठाना
दाम्नायप्रोक्तकर्मणां ६ नितांतनिर्मलस्वांतो दुःखहेतौ विरक्तिमान्। प्रवर्तते सुखोपाये सदा नित्यसुखेच्छया। वेदप्रो
क्तशमादीनि साधनान्यनुतिष्ठति ७ अनाद्यध्यस्ताविद्यानिमित्तकाहंममाभिमानेन सदा जन्ममरणादिप्रवाहनिम

पर्यायविचारहेतुत्वं तदनः शब्देनानूद्यते। अनुवादफलं तु उक्तरीत्या हेतुत्वासंभावनानिरासेन साधनचतुष्टयस्य विचारहेतुत्वसंभाव्य
११ ता॥ जिज्ञासेत्यत्र ज्ञाधातुना सन्प्रत्ययप्रकृतिभूतेन ब्रह्मविषयिणी निर्विकल्पकचरमवृत्तिः फलभूता लक्ष्यते सन्प्रत्ययेन विचार
णा। नावेदविन्मनुते तं बृहंतमिति श्रुत्या तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यत इत्यादिश्रुत्या खंडाहंब्रह्मावबोधस्य निःश्रेयससा
धनत्वं तादृशज्ञानस्य वेदैकगम्यत्वमिति वेदांतानां विचार्यतार्थाल्लभ्यते। अस्य शारीरकब्रह्ममीमांसाशास्त्रस्याध्यायचतुष्टयात्म
कस्य सूत्ररूपस्य भगवद्व्यासप्रणीतस्य ब्रह्मविचारपूर्वांगकर्मकांडोत्तरांगोपासनाकांडसहितज्ञानकांडात्मकसकलवेदनिर्णया
र्थं प्रवृत्तत्वादत्र प्रवर्तको य आत्मा वा अरे द्रष्टव्यः श्रोतव्य इति आत्मदर्शनोद्देश्यकः श्रोतः श्रवणापरपर्यायब्रह्मविचारविधिस्ते
न विधेयविचारे प्रवृत्त्यौपयिकमागमोक्तमधिकार्याद्यनुबंधचतुष्टयं न्यायेन निर्णेतुं भगवान् श्रीवेदव्यासः शास्त्रारंभे
जिज्ञासासूत्रं प्रणयामास। स त्वनुबंधचतुष्टयनिर्णयप्रकारः प्राग् निहित एव। श्रवणविधिविषयवेदांतवाक्यैः स्वार्थनि
र्णयार्थमस्य सूत्रस्यापेक्षितत्वाच्छ्रुतिसंगतिः। ब्रह्मविचारशास्त्रोपक्रमज्ञानमंतरा समारब्धविचारशास्त्रावबोधेच्छाया
असंभवेन मुमुक्षूणामेतच्छास्त्रावबोधेच्छासिद्धये ब्रह्मविचारशास्त्रोपक्रमावबोधकस्यास्य सूत्रस्य शास्त्रादौ प्रणयना
दुपदेशौपयिकाधिकार्यादिसमर्पकत्वेन समन्वयाद्यखिलविचारोपोद्घातत्वसूत्र ता च शास्त्रारंभसंगतिः। समन्वयाध्या ११

यसंगतिः। स्पष्टब्रह्मलिंगकवाक्यसमन्वयाख्यप्रथमपादसंगतिश्च। प्राथम्यादस्याधिकरणसंगतिर्नापेक्षिता। अनंतरा
भिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वं संगतिः॥ विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरः। निर्णयश्चेति पंचांगं शास्त्रे
धिकरणं स्मृतं। निर्णयः प्रयोजनापरपर्यायफलनिश्चयः। अत्र सर्वत्र पूर्वोत्तरपक्षयुक्ती संशयबीजमुक्ते। संशयस्य विचार
प्रवृत्त्यौपयिकत्वेन विचारांगत्वं सर्वत्र। विपर्यस्तमविपर्यस्तं वा संदिग्धं सद्विचारविषयो भवति। अत्र पूर्वपक्षः। ब्रह्मविचा
रशास्त्रं नारंभणीयं विषयप्रयोजनयोरभावात्। तथा हि। ब्रह्म तु जीवात्मना वा तिरिक्तब्रह्मपदार्थात्मना वा ईश्वरात्मना
वा न संदिग्धं। अहंप्रत्ययेन। सत्यं ज्ञानमनंतं ब्रह्म। यः सर्वज्ञः सर्ववित्। यस्य ज्ञानमयं तपः। इति श्रुतिभिश्चाबाधिताहंप्रत्य
येनाविरोधादैक्यबोधकश्रुतीनामुपचरितार्थकत्वपरत्वेन च ब्रह्मणो निश्चितत्वात् स्वप्रकाशात्मनि अध्यासायोगेनाहंप्रत्य
यस्याध्यस्तात्मविषयत्वाभावेन बाधितत्वाभावाच्च न विषयसंभवः। नापि प्रयोजनं संभवति। जीवात्मत्वेन ब्रह्मपदार्थस्वरू
पलक्षणप्रतिपादकवाक्यैर्नेश्वरात्मत्वेन वा ब्रह्मणो निश्चितेपि भवदभिमतमुक्तेरदर्शनादिति प्राप्ते राद्धांतः। शास्त्रमारंभ
णीयं। विषयप्रयोजनयोः संभवात्। श्रुत्युक्तब्रह्माभिन्नाहंप्रत्ययस्य प्रत्यक्षत्वाविरोधेन जीवाभिन्नब्रह्मणः संदिग्धत्वेन वि
षयत्वसंभवति। न चैक्यश्रुतेरुपचरितार्थत्वं। उपक्रमादितात्पर्यलिंगोपेतानेकवाक्यानामुपचरितार्थत्वायोगात्। मनुष्योह

मितिप्रत्यक्षेपि परैरपि शरीरादौ भ्रमत्वस्वीकारात्। कर्तृत्वाद्यंशेपि श्रुतिबलाद्भ्रमत्वमास्थेयमिति नाध्यासानुपपत्तिः। अनाद्य
१२ विद्यावशात्स्वप्रकाशेप्यात्मनि अहमज्ञ इत्यध्यासस्यानुभवात्। चिद्रूपानित्यस्वरूपज्ञानस्याध्यासाविरोधित्वात्। अनाद्यज्ञानाध्या
ना साधिष्ठानसाक्षात्कारात्मकचिद्रूपज्ञानावच्छेदकवृत्तेरेवाध्यासविरोधित्वेन तादृशवृत्तेर्विदेहकैवल्यात्प्रागनुदयान्न स्वप्रकाशे
ध्यासानुपपत्तिः। असंभावनाविपरीतभावनादिशंकारूपप्रतिबंधकेन महावाक्यकरणकनिर्गुणात्मसाक्षात्कारस्येदानीमसंभ
वेपि श्रवणादिभिः शंकायां निरस्तायां महावाक्यकरणकनिर्गुणात्मसाक्षात्कारेणाविद्यानिवृत्तौ सत्यां निखिलदुःखात्यंतिक
निवृत्त्युपलक्षितसच्चिदानंदरूपाखंडब्रह्मस्वरूपेणावस्थानरूपविदेहकैवल्याख्यमुक्तिरूपप्रयोजनमपि संभवति। तस्माद्विष
यप्रयोजनयोर्मुमुक्षूणां ब्रह्मविचाराख्यशास्त्रप्रवृत्त्युपयोगिनोः संभवाच्छास्त्रमारंभणीयमिति सिध्यति। सत्यानृताविवेके
न भानमध्यास उच्यत इत्यध्यासलक्षणस्य सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति नैसर्गिकोयं लोकव्यवहार इति भाष्य
कारवचनज्ञापितस्य सत्यादहमिति चिदचिदात्माहंकारयोरविवेके न भानस्य ममेति संसर्गभानस्य चाध्यासरूपत्वेनाध्यासवि
षयस्यानृतस्याहंकारस्य संसर्गस्य चाध्यस्तत्वेनाध्यस्ताधिष्ठानयथार्थज्ञाननिवर्त्यत्वरूपमिथ्यात्वेनाहं ब्रह्मास्मीत्यखंडयाच
रमया ब्रह्मसाक्षात्काररूपब्रह्मविद्यया बाधः सिध्यति। यद्यपि अद्वैतसिध्यादौ निर्दुष्टानि पंच मिथ्यात्वलक्षणानि कथितानि सं १२

तव्यप्रत्ययेन कर्तव्यतयोच्यत इत्यर्थः। प्रवर्तको लिङ्लोट्लेट्तव्यप्रत्ययाद्यन्यतमः शब्दो विधिः। कर्तव्यत्वेन कथनं विधानं २६
श्रुतितुल्यार्थतासिध्यै कर्तव्यपदमत्राह। अध्याहर्तव्यमित्याहाचार्यो विवरणाभिधः २७ वैराग्यादिसाधनचतुष्टयसंपन्नेनानंत
रं साधनचतुष्टयस्यान्याय्याद्वेदांतवाक्यकरणकज्ञेयब्रह्मविचारहेतुत्वाज्जिज्ञासुवास्तवस्वरूपाभिन्नत्वेनैव ज्ञेयब्रह्मविचारः क
र्तव्यो निखिलदुःखात्यंतिकनिवृत्तिपूर्वकमखंडानंदावाप्तये। न तु स्वभिन्नतया ज्ञेयत्वेन ब्रह्मविचारः कर्तव्य इति विवरणाचार्या
भिते। जिज्ञासासूत्रार्थः। चातुर्मास्यसोमयागादिक्रियाफलस्याक्षय्यं २८ ह वै चातुर्मास्ययाजिनः सुकृतं भवति। अपाम सोमममृ
ता अभूमेत्यादिश्रुत्याक्षय्यत्वामृतत्वसंभावनया क्रियाफले वैराग्यासंभवाशंकया। वैराग्यादिसाधनचतुष्टयस्य ब्रह्मज्ञा
नार्थकवेदांतविचारहेतुत्वशंकायाः कृतकत्वहेतुकानित्यत्वानुमानगर्भितया तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र
पुण्यचितो लोकः क्षीयत इति श्रुत्या निरासो भवति। तरति शोकमात्मवित्। ब्रह्मविदाप्नोति परं। तयोर्ध्वमायन्नमृतत्वमेति। एको
वशी सर्वभूतांतरात्मा एकं रूपं बहुधा यः करोति। तमात्मस्थं येनुपश्यंति धीरास्तेषां सुखं शाश्वतं नेतरेषां। इत्यादिश्रुतिभिर्ब्रह्म
विज्ञानान्नित्यसुखस्वरूपपरमपुरुषार्थसिद्धिरिति ब्रह्मज्ञानफलकवेदांतविचारहेतुत्वं साधनचतुष्टयस्यान्याय्यमिति ज्ञापयि
तुं। विचारस्य साधनचतुष्टयानंतर्यं बोधयता अथशब्देनार्थादुक्तं प्रायं यत्साधनचतुष्टयस्य ब्रह्मावगतिफलकवेदांतश्रवणापर

६ स्वशक्तौ ईशशक्तिरूपमायायां गतं स्थितं सत् वृत्तिद्वयस्य प्राणिकर्मसंस्कारस्य स्वशक्तिगतसत्त्वस्मात् ११

वाचोविषयापन्नं हि न तत् ४ एकादशाध्याये। पदं यत् परमं विष्णोस्तदेवाखिलदेहिनां। पदं परममद्वैतं स शिवः सांबविग्रहः ५
१२ प्रथमाध्याये। परमार्थो द्विधा प्रोक्तो मया हे स्वर्गवासिनः। एकः स्वभावतः साक्षात् परमार्थः सदेव तु ६ स शिवः सत्यचैतन्यसु
खानंतस्वलक्षणः। अपरः कल्पितः साक्षाद्ब्रह्मण्यध्यस्तमायया ७ कल्पितानामवस्तूनां मध्ये केवलमायया। परमार्थतया क्लृ
प्ता व्यवहारे सुरर्षभाः ८ व्यवहारेपि संक्लृप्ताः केचनापरमार्थतः। आकाशादिजगत् शुक्तिरूप्यं तत् कथितं मया ९ आत्मसंज्ञः
शिवः शुद्ध एक एवाद्वयः सदा। अग्रे सर्वमिदं देवा आसीत्तन्मात्रमात्मिका: १० प्राणिनां कर्मसंस्कारात् स्वशक्तिगतसत्त्वतः। स
ऐक्षत जगत् सर्वं नु सृजाइ इति शंकरः ११ द्वितीयेध्याये। भावत्वे सत्यजन्यत्वात् ज्ञानं नित्यं सुरोत्तमाः। यज्जगद्भासकं भानं नित्यं
भाति सुरोत्तमाः १२ स एव जगतः साक्षी सर्वात्मा शंकराभिधः। तेन कल्पितसंबंधादज्ञानं भाति निःस्वतः १३ अज्ञानजन्यं चित्तं
च रागद्वेषादयस्तथा। अज्ञानस्पृष्टचैतन्यादेव भांति न च स्वतः १४ प्राणश्चापि तथा बाह्यकरणानि वपुस्तथा। चित्तवृत्त्यभि
संबंधद्वारेणैव दृगन्वयात् १५ भांतीति पूर्वेणानुषंगः। पारमार्थिकभावत्वे सति अजन्यत्वं ब्रह्मण्येव न मायायां। भावत्वं द्विविधं
व्यावहारिकं परमार्थिकं चेति। पारमार्थिकं ब्रह्मणि। व्यावहारिकं प्रतियोगिज्ञाननिरपेक्षतया सत्त्वेन प्रतीयमाने अज्ञाने तत्कार्ये
घटादौ च। तेन प्रतियोगिज्ञानसापेक्षबोधविषये ऽभावे नातिव्याप्तिः। स्वामिन ब्रह्मापरोक्षसाक्षात्कारमात्रनिवर्त्यत्वं व्यावहारि १२

स्व २
कत्वं। तेन परिणामिस्वस्वाधिष्ठानापरोक्षेणापि निवर्त्ये प्रातिभासिके नातिव्याप्तिः। जाग्रत्स्वप्नसुषुप्त्याख्यावस्थात्रयस्यापि प्रत्येकं जाग्र
दादिभेदेन त्रैविध्यस्य सिद्धांतबिंद्वादौ दर्शितत्वात् सर्वास्वप्यवस्थासु स्वप्रकाशसाक्षिणि चिदात्मके अनाद्यध्यस्तमज्ञानं सुखदुःखादि
वदुःखमहमस्वाप्सं न किंचिदवेदिषमित्यादि जाग्रत्कालीनस्मरणान्यथानुपपत्त्या सिध्यति। तथाहि। सुखं वा दुःखं वाहमस्वाप्सं ह
न किंचिदवेदिषमिति स्मरणानुभवोभयात्मकमेकं ज्ञानं। तत्राहमंशेनुभवः सुखदुःखस्वापाज्ञानांशे स्मरणं। स्वापे स्वलब्धी भा
वे मूर्छायामहमो ज्ञाने लीनत्वेन तदंशे स्मरणायोगात्। जाग्रत्काले तस्योद्भूतत्वेन तदंशेनुभव एव। सुषुप्त्यादौ जाग्रत्स्वप्नभोग्यप
दार्थज्ञानाभावेपि साक्ष्याकारमविद्यावृत्तिरूपं सुखाकारं दुःखाकारं वा अज्ञानापरपर्याया विद्याविषयिणी या सुषुप्त्यवस्था अ
ज्ञानवृत्तिरूपज्ञानाकारा तदाकारत्वेन त्वविद्यावृत्तित्रयमभ्युपगम्यते। तदाहंकाराभावेननोक्तवृत्तित्रयविशिष्टाहमाकारा एका
वृत्तिरभ्युपेयते तस्यास्तस्यां सुषुप्त्यभावप्रसंगात्। अहंकारस्तूत्थानसमय एवानुभूयते। अतो ब्युत्थाने हंकाराश्रयसाक्षिचैत
न्यस्य सुखदुःखस्वापाज्ञानविषयकस्मरणाश्रयत्वात् सुखं दुःखं वाहमस्वाप्सं न किंचिदवेदिषमित्यहमाकारानुभवात्मकस्य
सुखदुःखस्वापाज्ञानविषयकस्मरणात्मकस्य च ज्ञानस्याहंकारसामानाधिकरण्येन वृत्तस्वविषयानिरूपितविषयितानत्वं
सुखीति वदहंकाराश्रयतयांतःकरणतद्धर्मानुभवस्य स्मृतिसंशयविपर्ययाणां च साक्षिचैतन्याश्रयत्वनियमादविद्यावृत्तिव
अं

१४ नियमाच्च।मनोब्रह्मेत्युपासीतेत्यादौमनआदिषुब्रह्माध्यासोव्याप्यारोपेणव्यापकारोपकप्रसंजनात्मकतर्कश्चेच्छाधीनतयाभ्रम
प्रमाविलक्षणत्वान्मनोवृत्तिरेव।मायाविद्यान्यतरोपहितचैतन्यंसाक्षीत्युच्यते।सत्तुसर्वाधिष्ठानं।अहंसुखीत्यादिप्रमाजाग्रज्जाग्र
त्।१शुक्तिरजतादिभ्रमोजाग्रत्स्वप्नः२श्रमादिनास्तब्धीभावोजाग्रत्सुषुप्तिः३स्वप्नेयथार्थमंत्रादिप्राप्तिःस्वप्नजाग्रत्४स्वप्नेपि
स्वप्नोमयादृष्टइतिज्ञानंस्वप्नस्वप्नः५स्वप्नदशायामनुभूतंयज्जाग्रद्दशायांकथयितुंनशक्यतेतत्स्वप्नसुषुप्तिः६सुषुप्तेनमसाउप
ष्टब्धासात्विकीसुखाकारासुखमहमस्वाप्समितिपरामर्शयोग्यावृत्तिःसुषुप्तिजाग्रत्७राजसीदुःखाकारादुःखमहमस्वाप्समिति
परामर्शयोग्यासुषुप्तिस्वप्नः८तामसीअज्ञानाकारानकिंचिदवेदिषमितिपरामर्शयोग्यावृत्तिःसुषुप्तिसुषुप्तिः९अज्ञानानुभ
वरूपाऽस्वाप्समित्यनुव्यवसायविषयिणीवृत्तिःसुषुप्तिः।तदेवंसुषुप्त्यवस्थायामप्यस्यानंदस्यपारमार्थिकस्यानंदरूपप्रत्यग्वस्त्वच्छि
न्नस्यभोगः।आरोप्यसन्निकर्षस्थले लोहितःस्फटिकइतिप्रत्ययवदन्यथाख्यातेरभ्युपगमात्।यत्रारोप्यमसन्निकृष्टंशुक्ति ध
रजतादिभ्रमेतत्रानिर्वचनीयख्यातिरभ्युपेयते।अन्यथाख्यातौअन्यत्रप्रसिद्धस्यैवलोहित्यादेःसंसर्गमात्रंस्फटिकादावारोप्य
तेनेनतत्रबाधबुद्धौसत्यांसंसर्गस्यैवबाधोनतुलोहित्यादेः।अनिर्वचनीयख्यातौतुअनिर्वचनीयरजताद्युत्पत्तिस्वीकाराद्रजता १४
दिविषयस्यैवारोपस्तेनतत्ररजतादिरूपविषयस्यापिबाधः।सुषुप्तौआनंदावच्छेदकवृत्तेःपारमार्थिकानंदस्यैसंसर्गस्यैवारोपा

तितथापितदंतर्गतमेवज्ञाननिवर्त्यत्वरूपंमिथ्यात्वलक्षणंघटतिसुबोधमित्यत्रप्रदर्शितं।~~एवमध्यासलक्षणानांनिर्दिष्टानांच~~
~~तेनासत्वेपिसुबोधमेकमेवप्रदर्शितमितिबोध्यं~~ २७ प्रसिद्धमप्रसिद्धंवाविचारात्प्राग्ब्रह्मतत्तु।यदिज्ञातमसंदेहान्नप्रयास्त्यवि
षेयंभवेत् २८ ज्ञातेऽज्ञानायोगतोहितन्निवृत्तिःफलंचन।यद्यज्ञातंतदुद्दिश्यविचारोघटतेकथं २९ अतोविचारनारंभःस
प्राप्तइतिचेच्छृणु।आपाततोब्रह्मपदप्रसिद्धब्रह्मणःश्रुतौ।निर्विकल्पापरोक्षार्थविचारोयंनिरर्गलः ३० ब्रह्मविदाप्नोति
परं।सयोहवैतत्परमंब्रह्मवेदब्रह्मैवभवति।ब्रह्मैवसन्ब्रह्माप्येति।इत्यादिश्रुतौ।नित्यशुद्धबुद्धमुक्तस्वभावत्वसर्वज्ञत्वसर्वश
क्तिमत्वादिरूपसर्वाधिकोत्कर्षरूपबृंहत्यर्थकबृहधातुप्रकृतिकब्रह्मपदायोगशक्त्यात्कार्थवत्वेनसामान्यतःप्रसिद्धब्र
ह्मपदार्थस्य।विशेषतोनिर्विकल्पकापरोक्षार्थंविचारोनिरर्गलोऽनुपपत्तिशून्यः ३० अतोनाद्यध्वस्तदुःखरूपमा
यानिवृत्तये।चिदानंदाद्वयब्रह्मण्यमस्यैकार्यविचारणा ३१ तदेतदुक्तंस्कंदपुराणेसूतसंहितावरमभागेउपनिषद्व्याख्या
नरूपद्वादशाध्यायात्मकब्रह्मगीतायांदशमाध्याये।सर्वाधारेस्वतःसिद्धेशिवसंज्ञेसुनिर्मले।प्रत्यग्रूपेपरानंदेनेहनानास्ति
किंचन १ मृत्योःसमृत्युमाप्नोतियइहनानेवपश्यति।यस्माद्ध्वस्तमज्ञानंतत्कार्यंचात्मरूपतः २ एकधैवमहायासाद्द्रष्टव्यो
हिमुमुक्षुभिः।अयमात्माऽप्रमेयश्चविरजश्चमहान्ध्रुवः ३ तमेवधीरोविज्ञायप्रज्ञांकुर्वीतब्राह्मणः।नानुध्यायाद्बहूञ्छब्दा

सिद्धभावरूपाज्ञानस्यापलपितुमशक्यत्वात्। उपलंभस्तु ज्ञप्त्यवच्छेदकीकाज्ञानत्वेनोप चरितावृत्तिः। वृत्त्यभिव्यक्तचैत
१५ न्यं ज्ञानं १ विषयावच्छिन्नचैतन्याभेदेनाभिव्यक्तचैतन्यस्फुरणं २ प्रियत्वप्रकारकवृत्त्यभिव्यक्तचैतन्यमानंदः ३ देशकाल
वस्तुपरिच्छेदशून्यत्वप्रकारकवृत्त्युपलक्षितचैतन्यमनंतं ४ कालपरिच्छेदशून्यत्वोपलक्षितचैतन्यं नित्यं ५ इति वृत्त्युपाधि
कृतचैतन्यभेदेन ज्ञानादीनामात्मधर्मत्वव्यपदेशः आनंदो विषयानुभवो नित्यत्वमिति संति धर्मा अपृथक्त्वेपि चैतन्यात्पृथगि
ती वावभासंत इति पंचपादिकाकृदुक्तेः। सजातीयविजातीयस्वगतभेदशून्यसच्चिदानंदरूपब्रह्मणः केवलस्य मनोवागगोचरत्वे
पि साक्षित्वेन ग्रहणं विद्यारण्यपादैः स्फुटमेव प्रतिपादितमस्ति। तथाहि। अस्ति भाति प्रियं रूपं नाम चेत्यंशपंचकं। आद्यं त्रयं
ब्रह्मरूपं मायारूपं ततो द्वयं १ इयमात्मा परानंदः परप्रेमास्पदत्वतः। मा न भूवं हि भूयासमिति प्रेमात्मनीक्ष्यते २ इयं चित्र २
तत्प्रेमात्मार्थमन्यत्र नैवमन्यार्थमात्मनि। अतस्तत्परमं तेन परमानंदतात्मनः ३ अभानेन परं प्रेम भानेन विषयस्पृहा। अतो भाने
प्यभातासौ परमानंदतात्मनः ४ अध्येतृमध्यवर्गस्थपुत्राध्ययनशब्दवत्। भानेप्यभानं भानस्य प्रतिबंधेन युज्यते ५ तत्र हेतुः
समानाभिहारः पुत्रध्वनिश्रुतौ। इहानादिरविद्यैव व्यामोहैकनिबंधनं ६ यस्मिन्यस्मिन्श्चास्ति लोके बोधस्तत्तदुपेक्षणे। यद्वा
ध्यमानं तद्ब्रह्मेत्येवं धीर्ब्रह्मनिश्चयः ७ पंचकोशपरित्यागे साक्षिबोधावशेषतः। स्वस्वरूपं स एव स्याच्छून्यत्वं तस्य दुर्घटं ८ विष १५

यीनात्वविषयः स्वत्वान्नास्य परोक्षता। अवेद्योप्यपरोक्षोयः स्वप्रकाशोयमुच्यते ९ परागर्थप्रमेयेषु या फलत्वेन संमता। संवि
त्सैवेह मेयोर्थो वेदांतोक्तिप्रमाणतः १० बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटं। तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत्
११ फलीभूतात्तु या स्फूर्तिर्घटाद्यर्थमपेक्षिता। विषयाणां जडत्वेन स्वतोभातेरसंभवात् १२ स्वप्रकाशे ब्रह्मणि तु नाभासउप
युज्यते। प्रमाणजमनोवृत्तिविषयं निर्गुणं ब्रह्म तत्। प्रमाणजमनोवृत्तेः फलस्याविषयं ब्रह्म तत् १३ फलव्याप्यत्वमेवास्य शास्त्रकृ
द्भिर्निवारितं। ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता १४ अस्यत्वविषयकाज्ञाननिवृत्तिमद्ब्रह्मणः स्वस्वविषयकाज्ञान
निवर्तकाहं ब्रह्मेत्याकारकांतःकरणवृत्त्यवच्छिन्नचैतन्यात्मकविषयपरनामकफलनिरूपितव्याप्त्याश्रयत्वमात्रं निराकृतं। यदा
यदाज्ञाननिवृत्तिमद्ब्रह्म तदा तादृशाविष्यपरनामकं फलमिति नास्ति नियमो ब्रह्मणः स्वप्रकाशत्वेन फलानुपयोगात्। यदा ता
दृशं ब्रह्म तदाऽज्ञाननिवृत्तये तादृशवृत्तिरित्यस्त्येव नियम इति वृत्तिव्याप्यत्वमिति कारिकाफलितार्थः १४ कल्पिता वै विष
यता ब्रह्मण्याद्रियते बुधैः। कल्पितस्तु प्रकारोपि नैव स्वीक्रियते क्वचित् १५ तथाहि। समानाश्रयसमानप्रकारसमानविषय
कज्ञानस्य समानाश्रयसमानप्रकारसमानविषयकाज्ञाननिवर्तकत्वमिति नियमात्सप्रकारकज्ञानेन निष्प्रकारकब्रह्मविषयका
ज्ञाननिवृत्तिर्न स्यादिति ब्रह्मणि ज्ञानेनाज्ञाननिवृत्तिकाले कल्पितोपि कश्चित्प्रकारो ब्रह्मज्ञानविषयो ब्रह्मनिष्ठो नांगीक्रियत इत्यर्थः

१६ १५ एतत्सर्वोपाधिनिराकरणे न साक्षिचैतन्यमात्रज्ञाने तु अज्ञानहत्युपलक्षितो निर्भेदसच्चिदानंदस्वरूपो मोक्ष इति सर्वं शिवं। न निरो
धो न चोत्पत्तिर्न बद्धो न च साधकः। न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता इति मांडूक्यव्याख्याने गौडपादाचार्योक्तेः। अविद्यास्वेत्यवि
द्यायामेवासितात्प्रकल्प्यते। अस्य दृष्टत्वविधेयं न कथं चन युज्यते। तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः। अविद्या सह कार्येण
नासीदस्ति भविष्यतीति वार्तिकाच्च। तदेवं न किंचिदवोद्यमिति स्मरणस्य यद्यत्स्मरणं तत्तद् अनुभवपूर्वकमिति नियमघटितस्य पूर्वपूर्वा
नुभूतानाद्यज्ञानान्यथानुपपत्त्यानाद्यध्यस्ताज्ञानसिद्धिः। सर्वत्राध्यासे दोषारोप्याधिष्ठानगतपूर्वानुभूतत्वा कथ क्वा दिसादृश्य णामा
ज्ञानस्यैव कारणत्वेपि अनाद्याध्यासिकसंबंधेन अनाद्यज्ञानाध्यासं प्रति अनाद्यज्ञानमेव स्वरूपतः कारणं अनादित्वा आत्माश्र
म यत्वादिदोषः। प्रतिस नाद्यज्ञानेनासकृदुत्पद्योत्पद्याज्ञानादौ विलीयमानानामहंकारादिकानां तदध्यासानां च बीजांकुरवदु
ना त्पत्तिविनाशवत्वेनादिपरिवर्तनवतां पूर्वपूर्वाध्यासादिसंस्कार उत्तरोत्तराध्यासं अध्यस्यमानं प्रति च कारणं। तेनानाद्यज्ञा
नाध्यास एवानादिस्तन्मूलका मनोबुद्धिचित्ताहंकारात्मकांतःकरणाद्यध्यासाः उत्पत्तिमत्वेन बीजांकुरवदनादय इति सि
ध्यति। एवमनात्मन्यहंकारादौ पूर्वपूर्वाध्यस्तविशिष्टसास्यात्मनश्चिद्रूपस्य संसर्गाध्यास एव न तु स्वरूपेणाध्यासः। अध्य
स्तस्य मिथ्यात्वेनात्मनो जडत्वप्रसंगात्। आत्मसंसर्गाध्यासे तु आत्मजडसंसर्गस्य मिथ्यात्वेपि नात्मनो जडत्वं। अज्ञा १६

५ तत्संस्कारेणांतःकरणगतसंस्कारेणेत्यर्थः।

दानंदसंसर्गस्यैव बाधात् प्रतिबिंबितत्वेन प्रतीयमान आनंदः परमार्थिक एव। अवच्छेदकानंदवृत्त्या सह वास्तवानंदावि
वेकात्तान्नास्य ब्रह्मवित्वं। वेदांतशास्त्रपरिनिष्ठितस्य तु अवच्छेदकवृत्तिसाक्षितया मुख्यानंदस्य गृहीतुं शक्यत्वाद् ब्रह्मवित्व
सिद्धिः। वृत्तिसाक्षित्वेन ग्रहणेपि निर्विकल्प चरमवृत्त्या अग्रहणान्न विदेहकैवल्यं। तमोगुणेन सात्विकाविद्यावृत्तेरुपष्टंभा
व त्तदानंदोपलंभः। न मस आवरकस्य भावात्। पृथिव्योपष्टब्धसुवर्णादिगततेजसत्ववत्। तदांतःकरणस्याज्ञाने लये
पि तत्संस्कारेणावच्छेदान्न जीवत्वाभावो न वा सर्वज्ञतापत्तिः। तदेश्वराभेदप्रतिपादनं तु शरीरेंद्रियाद्यभिमानरहितत्वेनो
पचारात्। संस्कारस्य निमित्तत्वेन साक्ष्याश्रितकार्योपादानकोटौ प्रवेशान्न संस्कारभेदेन जीवसाक्षिणो भेदः। जागरेत्वं
तःकरणस्य प्रमात्राश्रितकार्योपादानकोटौ प्रवेशादंतःकरणभेदेन साक्षिप्रमात्रोर्भेदः। साक्षिण एवाधिकोपाधिविशिष्ट
स्य प्रमातृत्वात्। सवृत्तिकांतःकरणावच्छिन्नस्यैव चैतन्यस्य प्रमातृत्वनियमात्। इंद्रियवृत्तिकालीनार्थोपलंभो जाग्रत् १
अंतःकरणगतवासनानिमित्त इंद्रियवृत्त्यभावकालीनार्थोपलंभः स्वप्नः २ अविद्यैव प्रकृतिरजतादिवत्स्वाप्नार्थाकारे
ण परिणमते। जायते चाविद्यावच्छिन्नचैतन्येन स्वाप्नार्थ इति निष्कर्षः। कारणमात्रोपलंभः सुषुप्तिः। कार्याणामविद्याप्र ।३।
पर्यायमज्ञानं न तु ज्ञानाभावो ज्ञानं तु ध्यानयोगाधिगमेन पश्यन्देवात्मशक्तिं स्वगुणैर्निगूढामित्यादिश्वेताश्वतरादिश्रुति
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।

चित्संपादेष्वनुक्रमात् २ द्वितीयेस्मृतितर्काभ्यामविरोधोन्यदुष्टता। भूतभोक्तृश्रुतेर्लिंगश्रुतेरप्यविरुद्धता ३ तृतीयेविरतिस्तत्वं
१७ पदार्थपरिशोधनं। गुणोपसंहृतिर्ज्ञाने बहिरंगादिसाधनं ४ चतुर्थेजीवतोमुक्तिरुत्क्रांतिर्गतिरुत्तरा। ब्रह्मप्राप्तिर्ब्रह्मलोकाविति
पादार्थसंग्रहइति ५ नचैतद्ब्रह्ममीमांसाशास्त्रंधर्ममीमांसाशास्त्रेणगतार्थमितिवाच्यं। धर्मजिज्ञासयोः [redacted] फलजि
ज्ञास्यभेदात्। स्वर्गाद्यभ्युदयफलकंधर्मज्ञानमनुष्ठानापेक्षं। मोक्षफलकंब्रह्मज्ञानंतु अन्न ज्ञानातिरिक्तानुष्ठानांतरापेक्ष
मितिधर्मब्रह्मज्ञानयोः सातिशयफलकत्वनिरतिशयफलकत्वाभ्यामनुष्ठानांतरापेक्षत्वनिरपेक्षत्वाभ्यांचवैषम्यं। अनुष्ठानसाध्यो
धर्मोजिज्ञास्योनधर्मज्ञानकालेस्तिपुरुषव्यापारतंत्रत्वात्। इहभूतंब्रह्मजिज्ञास्यंनित्यसिद्धत्वान्नपुरुषव्यापारतंत्रमितिजिज्ञा
स्यधर्मब्रह्मणोःसाध्यत्वसिद्धत्वाभ्यांजिज्ञासावैषम्यमितिनपूर्वतंत्रेणगतार्थता। ब्रह्मविचारप्रयोजकस्यास्यजिज्ञासासूत्रस्य
स्वाध्यायोध्येतव्यइत्यध्ययनविधिवत्स्वेतरसूत्रविचारप्रयोजकत्वाद्ब्रह्मविचारशास्त्रांतर्भावबोध्यः ३१ इतिश्रीभगवद्
द्व्यासप्रणीतशारीरकब्रह्मवेदांतमीमांसाशास्त्रसूत्रेषुसमन्वयाख्यप्रथमाध्यायेस्पष्टब्रह्मलिंगवाक्यसमन्वयाख्येप्रथम
पादेगुणसूत्रसहिताधिकरणार्थसंग्राहककारिकासुअहंब्रह्मास्मीतिबोधपर्यवसायिब्रह्मविषयकज्ञानजनकवेदांतशास्त्र १७
विचारप्रयोजकमेकसूत्रंजिज्ञासाधिकरणंप्रथमं १ जन्माद्यस्ययतः १ जन्मादित्रितयंयस्मादेकस्माज्जगतोस्यहि।

सत्यज्ञानानंतरूपात्तद्ब्रह्मश्रुतिसंमतं ३२ श्रुतिसंमतमितिपदेनजगज्जन्मादिहेतुत्वरूपंतटस्थलक्षणंयतोवाइमानिभूतानि
जायंतइत्यादिभृगुवल्लीप्रभृतिश्रुतिभिःक्रमेणैवेहोपन्यस्तंनतुनैयायिकाभिमतमानुमानिकमितिज्ञापयितुमेवद्वितीयवर्णकाभि
प्रायंशास्त्रयोनित्वाधिकरणंप्रवृत्तमनुमानस्यतुश्रुत्यनुगृहीतस्यैवप्रामाण्यंनतुस्वातंत्र्येणेतितर्काप्रतिष्ठानसूत्रेवक्ष्यमाणत्वा
दितिसूच्यते। सत्यज्ञानानंतरूपपदेनब्रह्मवल्ल्यादिश्रुतिषुसत्यज्ञानानंतानंदपदैः स्वरूपलक्षणस्योक्तत्वेपितल्लक्ष्याखंडस्वरूप
स्यलोकप्रसिद्ध्यभावादुपक्रमोपसंहारांतषड्विधतात्पर्यग्राहकलिंगनिर्णयमंतराझटितिबोद्धुमशक्यत्वात्सत्यादिस्वरूपलक्ष
णेनलक्षितंब्रह्मयत्वेदनानुद्यतस्यझटितिबोधसमंतटस्थलक्षणंजन्मादिसूत्रेणोक्तमितिध्वन्यते। तटस्थलक्षणस्वरूपलक्षण
लक्षणमुक्तमात्मपुराणे। लक्षकाणामपायेपिलक्ष्यंयत्रावतिष्ठते। तटस्थलक्षणंतद्धिविज्ञेयंपंडितैःसदा १ लक्षकाणामपायेन
लक्ष्यापायःप्रसज्यते। यत्रतत्कथितंनित्यंस्वरूपस्यहिलक्षणं २ स्वरूपंलक्षणंयत्रतत्रभेदोधियाकृतः। तटस्थलक्षणाल्लक्ष्यंसाक्षा
न्नैवावधार्यते ३ किंतुसामान्यतःपश्चान्मानानंतरसंगमात्। निश्चीयतेविशेषेणसर्वत्रैवात्रवस्तुनि ४ इति। यथाराहोःशिरोल
क्षणमित्यत्रराहोःशिरोभिन्नत्वेपिशिरश्छेदप्राक्कालीनकरचरणादिरूपोपलक्षणीभूतस्वरूपात्मकधर्मैःशिरोरूपावयवस्यबुद्धि
कृतभेदेनशिरसःस्वरूपलक्षणत्वोपपत्तिवत्किंचिद्धर्मोपलक्षितसत्यादिरूपचैतन्यबुद्धिकृतैर्भेदेनसत्यादिरूपचैतन्यस्यस्वरूपलक्ष चैतन्य
णत्वोपपत्तिरानंदोविषयानुभवोनित्यत्वंचेतिसंतिधर्माअपृथक्त्वेपिचैतन्यात्पृथगिवावभासंतइतिपंचपादिकाकृदुक्तेः। प्रियत्वोप

७ वर्णकांतरमाह। वेदैकमानकत्वाद्वा वेद्यं तन्नान्यमानतः। ३४।

लक्षितचैतन्यमानंदः। विषयित्वोपलक्षितं हृत्यभिव्यक्तचैतन्यं विषयानुभवः। कालत्रयाबाध्यत्वोपलक्षितचैतन्यं सत्यं। देशकाल
१८ वस्तुपरिच्छेदशून्यत्वोपलक्षितचैतन्यमनंतमिति प्रियत्वाद्युपलक्षणप्रकारकवृत्तिभेदभिन्नचैतन्यस्यैव स्वस्वरूपलक्षणत्वमुपपद्य
त इति पंचपादिकाकृदाशयः। उपलक्षणत्वं तु कदाचित्कत्वे सति व्यावर्तकत्वेनावगतधर्मत्वं। ब्रह्मणः सर्वाधिष्ठानत्वात्प्रियत्वाद्यु
पाधिविशिष्टानंदादिरूपचैतन्याश्रयत्वं सुघटमेवेत्यलं पल्लवितेन। एकस्मादिति पदेन जन्मादित्रितयकारणत्वं यत्रैकत्र तत्रा
भिन्ननिमित्तोपादानत्वमिति ज्ञाप्यते ३२ इति श्री० सु० ब्रह्मलक्षणस्तटस्थलक्षणनिरूपकमेकसूत्रं जन्माधिकरणं द्वितीयं २
शास्त्रयोनित्वात् १ यो यो यद्यत्करोत्सद्वाकार्यमालोच्य तस्य सः। ज्ञातेति न्यायतो ब्रह्म सर्वज्ञमिति सिध्यति। तदेवदृढय
न्नाह सार्वज्ञं वेदसर्जनात् ३३ सर्वविदेकवेदस्य कर्तृत्वात्सर्वविद्ध हल्। तेनैव सर्वशक्त्याद्यमित्यर्थादिव सिध्यति ३४
इति श्री भगवद्या० सु० ब्रह्मणः सर्वज्ञत्ववेदैकगम्यत्वबोधकमेकसूत्रं शास्त्रयोनित्वाधिकरणं तृतीयं ३ तत्तु समन्वया
त् १ समन्वयेन वेदांतैस्तद्ब्रह्म प्रतिपाद्यते। न कर्मशेषः कर्तात्मा न वा कर्माधिदेवता ३५ अथवा। तात्पर्येण तु वेदांतैः सा
क्षात्तद्ब्रह्म बोध्यते। नोपासना विधिज्ञान विधिद्वारा न बोध्यते ३६ तात्पर्यग्राहकं तत्रोपक्रमाद्यस्ति षड्विधं। स्वतः सि
द्धब्रह्मबोधो रज्जुधीवद्द्युपापनुत् ३७ प्रसायकत्वमर्थस्योपक्रमाद्यविरोधिनः। शब्दनिष्ठशब्दवृत्तिगम्यं तात्पर्यमुच्यते १८
३८ अत्र सर्वत्र विषयवाक्यान्यधिकरणविषयश्रुतिसंग्रहे ज्ञेयानि। यत्र विशेषस्तन्मात्रमुच्यते ३९ इति

१ कर्मत्वणीता

नादिजडस्य तु स्वरूपेणैवाध्यासस्तत्र मिथ्यात्वस्य जडत्वस्य चेष्टत्वात्। तेन चिदहंकारादीनां परस्पराध्यासेनान्योन्यस्मिन्नन्योन्यधर्मा
रोपाविवेकेन सुखी दुःखीच्छाभिज्ञानामि कर्ता भोक्ता गच्छामि पिबामि जिघ्रामि अंधः पंगुः काणो बधिरः पुत्रभार्यादिषु विकलेषु सकलेषु
अहमेव विकलः सकलोऽहं इत्यादिधर्माध्यासेन धर्म्यध्यासेन ममेदं धनादीत्यादि संसर्गाध्यासेन च जन्ममरणादिदुःखहेतुना नैसर्गिको
यं लोकव्यवहारः। अस्यानर्थहेतोः प्रहाणाय वेदांतैकगम्यात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदांता आरभ्यंते। तदुक्तं पूर्वाचार्यैः। समग्रतादा
त्म्यनयादिकानां विज्ञाय तत्तुल्यसमग्रतादीन्। अध्यस्यतिस्वात्मनि देहयुक्ते देहादिधर्मान्मनसाविशिष्टे १ अज्ञानसाक्ष्यात्मनि चित्त
धर्मान्कामादिकान्कल्पयते हि लोकः। मनो हि साक्षिण्यहमित्यभेदादध्यस्यबाध्यस्य तितस्य धर्मान् २ अथात्मसंसर्गाध्यासमाह।
तच्चाप्यधिष्ठानचिदात्मरूपं संसृष्टरूपेण च तत्र तत्र। स्वरूपतोऽनात्मन एव युक्तोध्यासो न चाप्यात्मन इत्युपेयं ३ तत्राज्ञानके वलस्या
त्मनः स्यात्संसर्गाध्याज्ञातरूपस्य चित्ते। देहादौ स्याच्चित्तयुक्तस्य योगश्चित्ताध्यासात्कर्तृता चात्मनः स्यात् ४ आत्माध्यासाच्चेतन
त्वं च चित्ते स्यादध्यासः सर्वलोकप्रसिद्धः। ब्युत्पन्नानामप्यवर्ज्योस्त्यनादिः कर्तृत्वादेः स्यादनर्थस्य हेतुः ५ आत्यंतिकाध्यासविनाश
सिद्धिरात्मेश्वरैकत्वविबोधतः स्यात्। अशेषवेदांतविचारणेषाताल्लिद्ध्ये संप्रतिसंप्रवृत्ता ६ इति। तथा। शास्त्रं ब्रह्मविचाराख्यम
ध्यायचतुष्टयं। समन्वयाविरोधाख्यौ साधनाख्यः फलाह्वयः १ समन्वये स्पष्टलिंगमस्पष्टत्वेप्युपास्तिगं। ज्ञेयगं पदमात्रं च

१ सेयंदेवतैक्षत अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीतिश्रुतौ।

अत्रसदेवसोम्येत्यादिनोपक्रांतसृष्टिप्रकरणेस्सूत्रस्थस्यात्मशब्दादितिपदस्यसच्छब्दार्थस्यजीवाभिन्नेनात्मच्छब्दपर्यायात्मश
१९ ब्दबोध्यस्वरूपेणजगतिप्रवेशकथनादित्यर्थइत्याह।जीवस्यचेतनस्येत्यादिना जीवेनात्मना।आत्मनामरूपेणजीवेनानुप्रविश्य
नामरूपेव्याकरवाणीतिसासच्छब्दबोध्यादेवतेक्षतेत्यर्थः ४५ नचेतनोऽचेतनस्यत्वात्माभवितुमर्हति।चेतनस्यब्रह्मणस्तुस्व
रूपमितिसांप्रतं ४६ सांप्रतंयुक्तं।४६ प्रायपाठस्तुविशयेनिर्णायकइतिस्थितिः।गौणस्यानजघन्यत्वान्मुख्यएवस्मतिस्त्वि
ह ४७ विशयेसंशये।इहतदैक्षततत्त्वत्र।सतिसंभवेगौणमुख्ययोर्मुख्येकार्यसंप्रत्ययइतिन्यायेनमुख्येक्षणार्थकएवेक्षधा
तुः।तत्तेजऐक्षतेत्यादौतुमुख्यस्यतेजसोऽचेतनस्येक्षणासंभवाद्गौणार्थकईक्षतिरित्यत्र ४७ सूत्रस्थस्यात्मशब्दादितिपदस्या
कः। अत्रानंद पदाभ्यास एवं श्रूयते न त्वानंदमयपदाभ्यासः। आनंदमयशब्दार्थस्यानंदमयपदाभ्यासेन परमात्मत्वं तत्प्रकरणस्थ
त्वेनानंदपदानां लक्षणयानंदमयपरत्वे [redacted] त्यन्योन्याश्रयप्रसंगात् इति प्रथ
मपूर्वपक्षकलापपरिहारः १ अथात्रोपनिषदारंभे आनंदमयकोशसंज्ञकपरमव्योमापरपर्यायाव्याकृतप्रधानरूपगुहानिहितत्वे
न परब्रह्मोपासितुः क्रममुक्तिफलीभूतहिरण्यगर्भभोग्यसर्वकामोपभोगप्राप्तिनिरूपणमपि नात्रानंदमयस्य परमात्मत्वसाधकं। यतो
वाचो निवर्तंते इत्यादिश्रुत्या अस्या उपनिषदो ज्ञेयब्रह्मपरत्वं न तूपास्यब्रह्मपरत्वमिति निर्णयेन गुहानिहितत्वश्रुतेर्निर्विशेषब्रह्मप्रति
पत्त्युपायप्रतिपादनपरत्वमेवेति सिध्यति। तेन यो वेद निहितं गुहायामिति गुहानिहितत्वश्रुतेरुपास्तिफलनिरूपकत्वाभावान्नानंद
मयशब्दस्य परमात्मपरत्वसाधकत्वं वेदेत्यस्योपास्यपर्यायं ध्यानं करोतीति नार्थः। किं तु गुहानिहितत्वोपलक्षणेन स्वात्मत्वेन
ब्रह्म साक्षात्करोतीत्यर्थः। एवं यो वेद निहितं गुहायां सर्वात्मा जीवन्मुक्तः सर्वान् कामान् काम्यंत इति कामाः सर्वसुखोपभोगान् निरतिश स
यानंदलेशभूतायानंतः सुखविशेषा इत्यर्थस्तान् सह युगपदेकक्षणोपात्तत्वेन अश्नुते प्राप्नोति प्राप्तिरत्र व्याप्तिः। स्वात्मत्वेन निश्चिनो ३५

तीति फलितं। सर्वकामतादात्म्येन सर्वकामान् व्याप्नोति। अशू व्याप्ताविति धातुपाठः। केन रूपेण प्राप्नोतीति चेदुच्यते ब्रह्मणा विपश्चितेति। स्वात्म
तया साक्षात्कृतेन सर्वोपहितेन सर्वसाक्षिणा निरावरणतया सर्वदा सवितृप्रकाशवत् सर्वं स्वावभासकेनेति विपश्चितेत्यस्यार्थः। ब्रह्मणेत्य
स्य तु स्वयंप्रकाशमानेन चिद्रूपेण ब्रह्मणा स्वस्वरूपेणेत्यर्थः। जीवेश्वरसाधारणात्मनि प्रतिबिंबितजगन्निष्ठयावच्चैतन्यविषयतापादकत्वमेव स
र्वस्वावभासकत्वं। ब्रह्मणेति इत्थंभूतलक्षणे तृतीया अश्वेन छत्रेण राजानमद्राक्षीदित्यत्रेव। एवमुक्तरीत्या स्वात्मत्वेन निर्भेदब्रह्मसाक्षात्कारवंतं जी
वन्मुक्तं जन्ममरणप्रवाहापादकपुण्यपापनिमित्तकदुःखचिंतासंतापकारिणी नैवोदेतीति तात्पर्येणाह चरमानुवाकांतश्रुतिः। एतं ह वाव
न तपति। किमहं साधु नाकरवं। किमहं पापमकरवमिति। स्वमानसचिंताविशेष इति शेषः। न तपति नैव संतापयतीत्यर्थः। न तपतीत्यत्र हेतु
माह। स य एवं विद्वानेते आत्मानं स्पृणुते। इति। एते पुण्यपापे आत्मानं स्वचिदानंदब्रह्मरूपं संस्पृणुते ब्रह्मदृष्ट्या स्वात्मत्वेनावगच्छति।
अत्र स्पृधातुः प्रीणनार्थको न तु छेदनार्थकः। तप्यतापकरूपेण विभातमखिलं जगत्। प्रत्यगात्मन पाप्मानमति ज्ञानादेहांते वाक्यजादिति प्रकृत
श्रुतिव्याख्यानरूपब्रह्मगीतास्य श्लोके भातीति ज्ञानार्थकभाधातुप्रयोगात्। ब्रह्मदृष्ट्या जगतस्तुच्छत्वात्। किं च जीवदृष्ट्या मिथ्यात्वा
त्स्वातिरिक्तं नैव किंचिदपि पारमार्थिकं पश्यति विद्वान्येनासौ तप्येतेति भावः। देहात्मवादी लोकायतिकस्तु पुण्यपापं नास्ति केन विषय
जन्यसुखस्य प्रत्यक्षेणास्ति क्व बुद्ध्वा यथेष्टाचारं करोति विद्वांस्तु पुण्यपापे सुखदुःखादिदृश्यमात्रस्य ब्रह्मदृष्ट्या स्वं तासत्वान्मिथ्यात्वा प
अ ह्यौत्तानविलसितस्वाप्निकपुण्यपापादीनामिव प्रबोधे अकिंचित्करत्वं पश्यन् पुण्यपापाचारे उदासीन इति न लोकायतिकादिसमदृत्या

ध्यायेनाह। उभे ह्येवैष एते आत्मानं स्पृणुते य एवं वेद। इति हि मंत्रः। य एवं स्वात्मत्वेन निर्भेदं ब्रह्म वेद अतः स एष एव उभे एते सुकृतदुष्कृते
३६ आत्मानं स्पृणुते। न हि विद्वांसं नित्यजं तिकन कस्यतदात्मतया स्वकृतमनुप्रविष्टमिदमात्मतयावसितमिति श्रुतिगीतोक्तेः। नान्योलो
कापतिकादिरज्ञ उभे एते स्वात्मत्वेन जानाति किंतु लोभात्पापपुण्ये नास्तिक्येन जानाति। अतोऽज्ञः पापपुण्याभ्यां संसरति। विज्ञान लिप्त
त्व इति भावः। इत्युपनिषत्। ब्रह्मवल्ल्याख्योपनिषद्वेदांतशास्त्रसारभूता ब्रह्मविद्या इति समाप्तेस्यर्थः। इति द्वितीयपूर्वपक्षकक्षापरिहा
रः २ आनंदमयस्य सर्वांतरत्वरूपलिंगं परमात्मत्वेन लिंगं। आनंदमयादप्यांतरस्य पुच्छपदेन वक्ष्यमाणयुक्त्या सर्वाधारब्रह्मणो वक्ष्य
माणत्वयानंदमयस्य सर्वांतरत्वासिद्धेः। इति तृतीयपूर्वपक्षकक्षापरिहारः ३ सर्वांतरत्वासिद्धेरेव विकारप्रायपाठबाधान्यथासिद्धी
अपि न संभवतः। इति चतुर्थपूर्वपक्षकक्षापरिहारः ४ अथानंदमयशब्दस्थमयट्प्रत्ययस्य स्वप्रकृत्यर्थगतप्राचुर्यार्थत्वान्यार्थकत्वे
नात्मप्रायोयज्ञ इतिवत्प्रचुरानंदाधिकरणताप्रतीयेत न तु प्रचुरानंदस्वरूपतेति प्रचुरानंदलक्षणयानंदमयपदस्य परमात्मपरत्वमिष्य
पि वक्तुं न न्याय्यं। तदा तन्न लक्षणाया एव दोषरूपत्वाद्विकारार्थकत्वमते लक्षणाया अभावात्। इति पंचमपूर्वपक्षकक्षापरिहारः ५
अथ मयटः प्राचुर्यविशिष्टस्वप्रकृत्यर्थमात्रार्थकत्वरूपस्वार्थिकत्वेनाथवा केवलस्वार्थिकप्रत्ययत्वेनानंदमयपदस्य परमात्मपरत्व
मुक्तपक्षद्वये लक्षणाया अभावादित्यपि न न्याय्यं। तद्विकारप्रायपाठरूपस्थानेनात्रत्यमयटो विकारार्थकत्वस्यैव न्याय्यत्वात्। वि
कारप्रायपाठरूपस्थानबाधकसर्वांतरत्वलिंगासिद्धेस्तृतीयकक्षायां प्राग्दर्शितत्वादानंदपदानां लक्षणयानंदमयपरत्वमाहत्या ३६

यादिति विद्यारण्यपादा आहुरिति पूर्वेणानुषंगः। किंच। आनंदमयकोशोत्तरोदाहृते असन्नेव स भवति। तिस्लोकेपि चोदना न श्रूयते ततस्तस्या
पि कोशस्य निर्विशेषब्रह्मप्रतिपत्त्युपायत्वमेव न्याय्यं। यतो वाच इत्यादिपूर्वोक्तश्रुतितात्पर्याच्च। अथ यदि आनंदमयशब्दबोध्यस्य परमा
त्मत्वपक्षेपि तस्योपास्यत्वांगीकारे ~~[illegible]~~ यतो वाचो निवर्तत इत्याद्यग्रत्यश्रुतीनां निर्विशेषवाङ्मनसा
तीतब्रह्मावबोधकत्वस्यार्थसत्त्वसार्थक्यायानंदमयस्योपास्यत्वाभाव एव लिंगमस्तु न तत्त्वन्नप्राणविज्ञानोपास्त्यभावे बाधकाभावात्। तत्र सर्वं वै
तेन्नमाप्नुवंति येन्नं ब्रह्मोपासते। सर्वमेव त आयुर्यंति ये प्राणं ब्रह्मोपासते। विज्ञानं देवाः सर्वे। ब्रह्म ज्येष्ठमुपासते। विज्ञानं ब्रह्म चेद्वेद। तस्माच्चेन्न
प्रमाद्यति। शरीरे पाप्मनो हित्वा सर्वान्कामान्समश्नुत इति। अन्नादित्रयोपास्तिषु साक्षाद्विधिफलयोः श्रवणाच्छ्रुतविधिना बलवत्तरानुपप
त्तिं विना परित्यागेन तत्कोशवाक्यैकवाक्यताकल्पने प्रमाणाभावाद्वाक्यभेदस्य फलमुखत्वेनादोषत्वाच्चान्नादित्रितयोपासनाः स्वीक्रियंते।
तत्सामान्यादितरेषु तथात्वमिति न्यायेनोपास्तिप्रायपाठात्मकं स्थानमितरयोर्मनोमयानंदमययोरुपास्तिविधित्वात्सर्वग्राहकमस्त्विति आ
शंक्य तर्हि यतो वाच इत्यादिश्रुतिनिष्ठनिर्विशेषब्रह्मावबोधकत्वलिंगमुपास्तिप्रायपाठात्मकं स्थानं बाधत इति नोपास्तिप्रायपाठ नंदम आ
यस्योपास्यत्वसाधक इति कृत्वाचिंतान्यायेन परिहारो ज्ञेयः। श्रुतिलिंगाधिकरणन्यायेन लिंगस्य स्थानाद्बलीयस्त्वं प्राग्वृत्तिकृन्मते [illegible] श्लो
के दर्शितमेवास्ति। कृत्वाचिंतान्याय[illegible]त्रैवाग्रे वक्ष्यते। इत्याद्यः परिहारः १ आनंदमयस्य विज्ञानमयशारीरत्वोक्तेः २ प्रियशिरआद्यवय
वोपेतपक्षित्वेन निरूपणं च। ३ नोपास्यत्वसाधकमन्नादिविज्ञानांतानामुपास्यत्वाभावस्य प्राग्दर्शितश्रीविद्यारण्यपादरीत्या साधितत्वा
त

२ सप्तमपूर्वपक्षकक्षापरिहारे

पुरुषार्थत्वेनाविहितानृतवदननिषेधा

त्विरूपचयोर्हि भेद इति निर्गुणब्रह्मविद्यासु तैत्तिरीयादिशाखोक्तप्रियशिरस्त्वाद्युपास्यसगुणब्रह्मधर्मानुपसंहृतिनिरूपणं निषेधस्य प्रा
३८ प्तिपूर्वकत्वन्यायेनानंदमयाधिकरणस्योपास्तिसमर्थनपरत्वे लिंगमिति यदुक्तं तन्नोपपद्यते। प्रियशिरस्त्वाद्युपसंहृतिकथनस्य कृत्वा
चिंतान्यायोक्तिरूपत्वात्। तथाहि। स्वीकृत्यपूर्वपक्षीष्टं तन्मूलोयः प्रवर्तितः। सिद्धांतिना विचारः स कृत्वाचिंताख्य उच्यते। यथा नारभ्या
धीताभ्यां नानृतं वदेदिति श्रुतिस्मृतिभ्यां पुरुषार्थत्वेन विहितस्यानृतवदननिषेधस्य श्रौतकर्मणि प्राप्तत्वेपि दर्शपूर्णमासादौ नानृतं वद
देति क्रत्वर्थपुनर्निषेधः। संभवति हि अर्थादिलोभेन पुरुषार्थोल्लंघनेपि क्रतुवैगुण्यं मन्यमानस्य प्राप्तिरिति। एवं च पुरुषार्थत्वेन विहि
तानुष्ठानाकरणजन्यप्रत्यवायं सहे क्रतुवैगुण्यमात्रं न सहिष्ये इति पूर्वपक्षिमतमभ्युपेत्य तन्मतेनाप्राप्तमनृतवदनं पुनः क्रत्वर्थं विधीयते। ३
यथा वा अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतं। तथापि त्वं महाबाहो नैनं शोचितुमर्हसि। जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येर्थे न त्वं शोचितुमर्हसि। इति गीतास्मृतिरपि सिद्धांते नित्यस्य जीवात्मनः पूर्वपक्षिमते नित्यजातत्वनित्यमृतत्वाभ्यु
पगमेन परिहारकथनरूपत्वात्कृत्वाचिंतान्यायोक्तिरूपा। एवं प्रकृते सिद्धांते आनंदमयाधिकरणेन आनंदमयवाक्यस्य प्रबलश्रुति
भिर्ज्ञेयब्रह्मपरत्वसमर्थनेपि उपासनाश्रयाजाड्येन प्रबलश्रुत्यालोचनमांद्येन यत्किंचिद्युक्त्यवलंबनेनोपास्तिपरत्वं स्वीकृत्य प्रि
यशिरस्त्वादिधर्माणां [illegible] आनंदादिस्वरूपभूतधर्मवद्ब्रह्मधर्मताविशेषात्तेषां निर्गुणब्रह्मविद्यासूपसंहृतिरस्त्विति पूर्व ३८
पक्षिशंकायां प्रियशिरस्त्वादिधर्माणां ब्रह्मप्रतिपत्त्युपायत्वमनंगीकृत्योपास्यधर्मतांगीकारेपि प्रियशिरस्त्वादिधर्माणां ब्रह्मस्वरू

पत्वाभावेन निर्धर्मत्वेन ज्ञेयब्रह्मविद्यासूपयोगाभावात्तत्रोपसंहृतिरित्युपसंहृतिशंकासमाधानं कृत्वाचिंतान्यायेनोक्तमिति नानंदमयाधि
करणस्योपास्तिसमर्थपरत्वे लिंगं। इतिरत्नप्रभोक्तपूर्वपक्षकस्य परिहारः ७ पुच्छपदस्य पक्षिपश्वाद्यंगेलक्षणायां प्रियमूर्धाद्यवयववा
चकप्रायपुच्छपदपाठात्मकं स्थानं न साधकं। अन्नमयादिकोशवदानंदमयेपि ब्रह्मप्रतिपत्त्यर्थं पक्षित्वेन निरूपिते शिरःपक्षाद्यवयवत्व
तुल्यत्वकथनं। नरमूर्धादिवाचकशब्दप्रायपठितपुच्छरूपावयवबोधकशब्दक्रमस्य स्मृततत्वाद्यत्किंचित्तुच्छवक्तव्यमिति प्रागुक्तपक्षा
वयवपंचकसाम्यात्प्रागुक्तपुच्छपदार्थातिरिक्ताधारार्थकपुच्छपदप्रयोगः। दृश्यते तार्थभेदेपि शब्दसाम्येन प्रायपाठनिर्वाहोब
हुलमन्यत्र। यथा॥ इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः। महतः परमव्यक्तमव्यक्तात्पुरु
षः परः। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरित्यादिश्रुतिषु सोपानारोहणन्यायेन पूर्वस्मात्पूर्वस्मादुत्तरोत्तरस्योत्कर्षबोध
नपूर्वकं सर्वतः परं ब्रह्मेति बोधयितुं प्रवृत्तस्य प्रतिवाक्यमावर्तितपरशब्दस्य पुरुषविषयेर्थभेदेसत्यपि शब्दसाम्यमात्रेण प्रायपा
ठनिर्वाहः। पुरुषे परमात्मनि परमपुरुषार्थत्वाख्यबुद्धिग्राह्यत्वसूक्ष्मत्वव्यापकत्वस्वप्रकाशत्वनिरतिशयानंदत्वनिरतिशय
स्फुटत्वाद्युत्कर्षविशेषाः परशब्देन विवक्षिताः। अन्यत्र तु पूर्वोत्कर्षमात्रमुत्तरोत्तरस्मिन्नित्यस्त्यर्थभेदः। एतच्च भाष्यमतोपोद्घा
ते दर्शितमेव प्राग्विस्तरेण। न च पुच्छपदसमानविभक्तिकब्रह्मपदस्य नामार्थयोरभेदान्वयव्युत्पत्त्यनुरोधेन सामानाधिकरण्यानि
र्वाहाय ब्रह्मपुच्छमिति पदद्वयरूपवाक्यात्प्रतीयमानावयवपरत्वमेव न्याय्यमिति वाच्यं। वाक्यात्प्रतीयमानावयवत्वस्य परमात्म

शक्यब्रह्मपदश्रुत्याबाधात्। श्रुतेर्हि वाक्याद्बलीयस्त्वस्य श्रुतिलिंगाधिकरणे पूर्वमीमांसायां साधितत्वात्। न च लांगूलशक्तपुच्छपद
३८ श्रुत्यावयवप्रायपाठानुगतत्वेन प्रबलया निरनुग्रहब्रह्मपदश्रुतेर्दुर्बलत्वमिति वाच्यं। लांगूलवाचकपुच्छपदस्य पक्षिपश्वाद्यंगगत
यापि लक्षणाया अंगीकार्यत्वेन पुच्छपदस्य मुख्यार्थबाधकत्वरूपश्रुतित्वासंभवात्। प्रायपाठस्य शब्दसाम्येनापि निर्वाहसंभवेन
प्रायपाठानुगृहीतत्वरूपप्राबल्याभावाच्च। तस्मात्पुच्छपदस्य पक्षिपश्वाद्यंगलक्षणायां प्रायपाठेन साधकः शब्दसाम्येनापि प्राय
पाठनिर्वाहात् ब्रह्मपदश्रुत्या पुच्छपदस्यावयवपरत्वस्यावयवप्रायपाठात्मकस्थानलब्धस्य बाधात् पुच्छपदस्याधारलक्षणा
यां तु स्वावस्थितिप्रयुक्तान्यस्थितिहेतुपरत्वप्रतिष्ठापदंतात्पर्यग्राहकमस्तीति पुच्छपदस्याधारलक्षणोपपन्ना। इत्यष्टमपूर्वपक्षस्य परि
हारः ८ आनंदमयांतर्यत्वको शात्मक सर्वजगदाधारं ब्रह्मेति आनंदमयोऽभ्यासादिति सूत्रेण समर्थनपक्षे सूत्रस्थानंदमयवा नंदमयपदस्य
क्यस्थब्रह्मशब्दे लक्षणाख्यो दोष आनंदमयशब्दस्य परमात्मपरत्वे नास्तीति लाघवमिति वक्तुं न्याय्यं। अस्मत्पक्षे सूत्रस्थानंद
मयशब्दस्य ब्रह्मशब्दे लक्षणा तत्पक्षे ब्रह्मपुच्छं प्रतिष्ठेति श्रुतौ ब्रह्मपदस्यावयवे लक्षणा नास्मन्मत इति तुल्यत्वात्तत्र लाघवाभावात्।
पुच्छपदलक्षणात् उभयपक्षेऽपि समेव। त्वत्पक्षे [illegible] लक्षणाबीजस्य प्रागुक्तरीत्या खंडितत्वात्। मत्पक्षे ब्रह्मपदस्य स्वमुख्यार्थप
रत्वे समभिव्याहृतप्रतिष्ठापदादिबहुतात्पर्यग्राहकसत्वानुरोधेनानंदमयश्रुतितात्पर्यनिर्णयार्थप्रवृत्तेनानंदमयाधिकरण
सूत्रगतानंदमयपदस्य ब्रह्मशब्दे लक्षणान्याय्यैवेत्यलं पल्लवितेन। इति नवमपूर्वपक्षस्य परिहारः ९ एवं चानंदमयश ३८

६ तदिति प्रथमांतात्प्रकृतवचने मयडिति फलितं। यत्र न द्यत्र प्रकृतस्यैव
६ विवक्षितः। प्रकृतस्य भावेधिकरणे वा मयडित्यर्थः।

नंदमयपदाभ्यासस्य परमात्मपरत्वसाधकत्वेऽन्योन्याश्रयदोषप्रसंगस्य प्रागाधकस्यायामेव दर्शितत्वाच्च। मयडनुशासनं तु प्रा
ग्दिशो विभक्तिः। दिक्शब्देभ्यः सप्तमीपंचमीप्रथमाभ्यः इत्यतः प्राक्तनार्थिका वक्ष्यमाणाः प्रत्यया विभक्तिसंज्ञाः स्युरित्यधिकृत्य।
तत्प्रकृतवचने मयडिति पाणिनिसूत्रं। अत्र सिद्धांतकौमुदी। प्राचुर्येण प्रस्तुतं [illegible] तस्य वचनं प्रतिपादनं। भावेधिकरणे वा ल्युट्। आद्ये प्रस्तुतं
प्रकृतमन्नमन्नमयं। अपूपमयं। यवागूमयी। द्वितीये अन्नमयो यज्ञः। अपूपमयं पर्व। समूहवच्च बहुषु। इति सूत्रं। सामूहिकाः प्रत्ययास्त
दितिप्रथमांतात्प्रकृतवचने तदिति दिश्यंते बहुषु प्रकृतेषु विवक्षितेषु वा मयट्। मोदकाः प्रकृता मोदकिकं। मोदकमयं। शाष्कुलिकं। शाष्कु
लीमयं। द्वितीयेधिकरणरूपेर्थे तु मोदकिको यज्ञो मोदकमय इति। प्रस्तुतत्वमावश्यकमित्यर्थः। एतद्व्याख्याने शब्देंदुशेखरे। तद्ग्रहणं वाक्य
भेदेन प्राचुर्याभावेपि अस्त्येतस्वार्थिकमयडर्थं। तेन चिन्मयं ब्रह्मेत्यादि सिध्यतीत्युक्तौ वाक्यभेदेन योगविभागे नेत्यर्थः। एवं च प्राचुर्येण
प्रस्तुत [illegible]। प्राचुर्येण प्रस्तुतस्याधिकरणे केवलस्वार्थे वा यथायथं मयडिति सिध्यति। विकारे मयडनुशासनं तु। तस्य विकारः। यं
इति प्राग्दीव्यतोऽणिति अण्प्रत्ययाधिकारे तस्य विकार इत्यर्थोधिक्रियते। अवयवे च प्राण्योषधिवृक्षेभ्यश्चाद्विकारः। मयूरस्य विका
रोवयवो वा मायूरः १ मौर्वंकांडं २ पैप्पलं ३ मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः। प्रकृतिमात्रान्मयट् स्याद्विकारावयवयोः। अ
श्ममयं। आश्मनं। अभक्ष्याच्छादनयोरिति किं। मौद्गः सूपः। कार्पासमाच्छादनं। नित्यं वृद्धशरादिभ्यः। एकाचो नित्यं मयट् भवती
त्यर्थः। आम्रमयं। शरमयं। त्वङ्मयं इति नित्यं मयट्। इति मयडनुशासनं। इति षष्ठपूर्वपक्षस्य परिहारः ६ प्रियशिरस्त्वाद्यप्रा

यंपर्वगोच्छ इतीर्यते। गेच्छाहृक्ता मनीयस्यक्तोमगेच्छः सउच्यते १४ धनलाभायवीणायां येगायंतिजगत्सतिं। एषएवादित्यचक्षुः
३९ पुरुषः सइतीरणात् १५ हिरण्यकेशश्मश्र्वादियत्तनोपारमार्थिकं। किंतुध्यानार्थमुक्तंतत्तस्मात्सपरमेश्वरः १६ कपिपुच्छा
धःप्रदेशभास्वरंश्वेतपंकजं। यथातथास्यनयने ध्येयेवेश्शुक्रभास्वरे। धनस्यलाभोयस्यासावधश्धनसनिर्मतः १७ भेदव्यप
देशाच्चान्यः २ रविनस्कमंडलांतःपुरुषोजीवतःपृथक्। अंतर्यामिब्राह्मणस्थांतःपदस्मारितेश्वरः १८ आदित्यांतर्यामित्वयेश
भेदव्यपदेशतः। बृहदारण्यकगततृतीयाध्यायगेस्फुटं। सप्तमब्राह्मणतस्मात्पुरुषोत्रेश्वरोमतः १९ बृहदारण्यकतृतीयाध्या
यसप्तमेंतर्यामिब्राह्मणेस्यमादित्याख्यदेवतारूपजीवांतर्यामित्वेनेशस्यजीवभेदेननिरूपणाद्रविचक्षमंडलांतःस्थितत्वे
आदि नश्रूयमाणःपुरुषः आदित्याख्यजीवादन्योंत्यांतर्यामिब्राह्मणस्थांतर्यामिपदैकदेशीभूतांतःशब्देनयएषोंतरादित्ये यए
षोंतरक्षिणिपुरुषोदृश्यतइतिश्रुतिद्वयस्थेनप्रत्यभिज्ञापितपरमेश्वरएव। तस्मात्पूर्वसूत्रोक्तधर्मोपदेशेनसूत्रोक्तभे
दव्यपदेशरूपहेतुद्वयादत्रांतरादित्येंतरक्षिणिउक्तःपुरुषःपरमेश्वरएवेष्टः। अत्रविषयवाक्यंमदुक्ताधिकरणश्रुतिसंग्रहा
द्विज्ञेयं १९ इतिश्रीं॰सुअंतरादित्येंतरक्षिणिचोपास्यत्वेनश्रुतपुरुषबोधकस्यपुरुषशब्दस्यपरमेश्वरपरत्वसाधकंद्विसूत्रंतद्ध
र्मोपदेशाधिकरणंसप्तमं ७ आकाशस्तल्लिंगात् १ आकाशरूपेणोद्गीथोयउपास्यतयेरितः। तत्राकाशःपरंब्रह्मब्रह्मबोधकलिंगा ३९
तः २० छांदोग्यप्रथमाध्यायेप्रारभ्याष्टमखंडकं। नवमेखंडउद्गीथोपासनाविहितास्तिहि २१ सर्वभूतस्रष्टृताकाशादेवेत्यवधारणं। अनंत

५ परोवरीयसोलोकान्प्राप्नोत्येवमुपासकः। परोवरीयोलोकेस्मिन्भवत्यप्यस्यजीवनं २९

त्वंवरीयस्त्वेपरत्वंलिंगमत्रहि २२ भूताकाशपरायत्ररूढ्याकाशपदश्रुतिः। बाध्यतेऽनवकाशेनलिंगेनाव्यभिचारिणा २३ आनर्थक्यंहृ
तानोहिविपरीतंबलाबलात्। श्रुतिलिंगाधिकरणन्यायस्यावसरोत्रन २४ परत्वंवज्ज्वरीयस्त्वात्समस्तेकपदेरितः। परोवरीयानाकाशोऽ
नंतश्चांतस्यवर्जनात् २५ ओत्कृष्ट्यक्रमपर्याप्तेर्वरीयान्परमेश्वरः। श्रेष्ठ्याद्रसतमत्वादिगुणैःपरइतीर्यते २६ सारभूताःपदार्थायेतेर
साःपरिकीर्तिताः। तेषप्यंत्यत्वसारत्वात्सोक्तोरसतमोहरिः २७ यस्तुकालत्रयेप्यस्यत्याधारःसपरायणः। उद्गीथशब्दउद्गीथावयवोंका
रगोत्रहि २८ परोवरीयसोलोकान्ब्रह्मरूपाकाशलोकांतान्। परोवरीयोजीवनंयावदायुःसर्वोत्कृष्टत्वेनसर्वरसतमत्वेनचेहलोकेजीव
नंचभवतिपरोवरीयस्त्वादिगुणविशिष्टाकाशरूपेणोद्गीथावयवोंकारोपास्तिमतइत्यर्थः २९ अत्रेवमाख्यायिकोद्गीथविद्यास्तुत्यर्थो
च्यते। तथाहि। शालावत्यस्तुशिलकोदाल्भ्योवैचेकितायनः। इमौविप्रौक्षत्रियोत्रजैवालिस्तुप्रवाहणः ३० इतीमेसंगतादेवाउद्गी
थकुशलास्त्रयः। वदामउद्गीथकथामित्यासतविवक्षया ३१ राजाप्रवाहणःप्राहादौविप्रौवदतामिति। पृच्छामिदाल्भ्येत्यामंत्र्यशिलकोदा
ल्भ्यमाहहि ३२ कासाम्नोगतिरित्येषपृष्टवान्शिलकस्ततं। दाल्भ्योक्तायासामगतिस्तस्याअप्यस्तिकागतिः इतिपप्रच्छशिलकोदाल्भ्यंतंवैपुनः
पुनः ३३ शब्दःप्राणोन्नमुदकंस्वर्लोकोदृष्टिमानिति। उत्कोत्तरोत्तरगतीर्नास्तीत्यहतलोगतिः ३४ गतिशब्देनजनकोहेतुरत्रविवक्षितः। ज
नकत्वस्यपर्याप्तिश्चान्यमत्राप्रतिष्ठितं ३५ पृथ्वीप्रतिष्ठाशब्देनद्वितीयांतेनकथ्यते। स्वर्गलोकोद्ध्यसौलोकइतिशब्देनकीर्तितः ३६ अप्रतिष्ठि
तादोषाद्दाल्भ्यपक्षोविनिंदितः। दाल्भ्यःपप्रच्छशिलकंदृष्टिलोकगतिंततः ३७ शिलकोदृष्टिलोकस्यभूलोकंगतिमाहहि। भूलोकोयागदा
नाद्यैर्दृष्टिंसंपादयेदिति ३८ अनवस्थाख्यदोषेणनिनिंदशिलकंनृपः। शिलकोभूमिलोकस्यगतिंनृपपृच्छतान्नृपं ३९ राजाप्रवाहणःप्रा

हत्वाकाशो गतिरित्यमुं। एतद्ध इति पदस्यार्थोत्यस्मिन्काल इतीह वै ४० अमुमिमं धूलालावलोपत्वं शालावत्यं धिलकं ४० इतिश्रीसु
४० आकाशत्वेनोपास्यो द्गीथाकाशस्य परमात्मत्वसाधकमेकसूत्रमष्टममाकाशाधिकरणं ८ अतएवप्राणः १ आकाशवाक्यादेवात्रा
नुश्रूयंत उपासनाः। प्राणादित्यान्नबुध्यात्रय उपास्यतये रिताः। प्रस्तावोद्गीथकप्रतिहाराः कर्मसमृध्दये ४१ तत्रप्राणः परं ब्रह्मपंचवृत्तिर
नः सन। पूर्वसूत्रेरितादेवतल्लिंगादितिहेतुतः। तल्लिंगं सर्वभूतानां प्राणादेवलयोद्गमौ ४२ पंचप्राणात्मको ऽनःप्राणः। प्रस्तावोद्गीथप्र
तिहाराः क्रमेणप्रस्तोतुरुद्गातृप्रतिहर्तृसंज्ञकसामगर्त्विक्प्रयोज्यसामभक्तिविशेषाः ४२ पूर्वाधिकरणेनैवगतार्थत्वे इदं पुनः। अधिका
क्षेपसंशांत्यै प्राणाधिकरणं मुनिः ४३ ज्ञानकर्मेंद्रियादीनां प्राण एव लयोद्गमौ। सुप्तौ सुप्ते रुपरमे श्रूयेते श्रुतिगाविति ४४ सपंचवृत्तिः
प्राणोत्राप्यस्तु प्रस्तावदेवता। इत्याक्षेपे समाधानं सर्वभूतलयोद्गमौ। अत्र प्रोक्तौ न घटेते प्राणवायावेतः सन ४५ सप्राणवायुनीत्र प्रस्ता
वदेवता किंतु प्राणशब्दवाच्यः परमात्मैवेत्यर्थः ४५ प्राणस्य प्राणमित्यादौ मनोहि प्राणबंधनं। इत्यत्र प्राणशब्दस्तु परमात्मन्यपि श्रुतः ४६
छांदोग्योपनिषत्तुर्याध्याये खंडे तृतीयके। संवर्गगुणकप्राणोपास्तौ प्राणस्तु लौकिकः। ज्ञानकर्मेंद्रियमनोमात्रस्य हि लयो कृतः ४७
अत्र ब्रह्मैव हि प्राणः पंचवृत्तिरनस्तु न। सर्वभूतलयोत्पत्ती ब्रह्मलिंगस्य सत्वतः ४८ अत्रैव माख्यायिका काशप्रकरणानंतरं श्रूयते।
तथाहि। मटच्यपरपर्याया धानिक्षि दैवयोगतः। नष्टेषु कुरुसस्येषु दुर्भिक्षे समुपस्थिते। ४९ आटिक्यपरपर्यायाऽजात्यया वनुभार्यया।
सहितः कुरुदेशस्थउषस्तिर्नाम तो द्विजः ५० प्रद्राणक श्वदन्भिक्षुमिभ्यग्रामउवास ह। अतिदारिद्र्यसंयुक्तः प्रद्राणकइलीयते। त कुल्मा
षमितिसचाकायणाइतीरितः ५१ सोदंतं कुल्मितान्माषानिभ्यारोहमयाचत। सोब्रवीन्नमे दुच्छिष्टा इति तं प्रस्तुदावसः ५२ तानेवमेभद ४०

त्र बोध्यस्योपास्यत्व परिहारे पूर्वोक्तास्ति स्थः २ आनंदमयस्य परमात्मत्व परिहारेनवे १ तिद्वादश पूर्वपक्षकक्षा परिहारा अ
त्र संगृहीताः। तथा च पूर्वपक्षे अभ्यस्यमानानंदपदनामानंदमयेलक्षणा १ ब्रह्मपदमुख्यार्थत्यागेनावयवेलक्षणा २ वि
कारप्रायपाठभग ३ इतिदूषणत्रयं। सिद्धांते तु ब्रह्मपरस्तु त्यावाक्यात्प्रतीयमानावयवपरत्वबाधे शब्दसाम्येनाप्यवयवप्रायपा
ठनिर्वाहेर्थतोऽवयवप्रायपाठभंगः १ ब्रह्मपदमुख्यार्थसंरक्षणाय सोत्रानंदमयपदस्य ब्रह्मशब्दे लक्षणेति फलमुखदूषण
द्वयमितिलाघवं। इतिश्री॰ सुतैत्तिरीयकशाखागतब्रह्मवल्ल्युपनिषद्गतानंदमयवाक्यांतर्गतपुच्छवाक्यस्थब्रह्मपदस्य
ज्ञेयत्वेनोपक्रांतसत्यज्ञानानंतस्वरूपमुख्यपरब्रह्मपरत्वसाधकं पुच्छपदस्य लक्षणया धारार्थकत्वसाधकं ब्रह्मपदार्थस्या
नंदमयपदार्थावयवत्वासंभवसूचकमानंदमयशब्दार्थस्य परमात्मपर लाघटनद्वारानंदमयकोशोपाधिकजीवपरत्वसा
धकमेवमुक्तार्थसमर्थनद्वारा सर्वस्या ब्रह्मवल्ल्या उपास्य ब्रह्मपरताघटनद्वारा निर्विशेषत्वेन ज्ञेयब्रह्मपरत्वसमर्थनपरम
ष्टसूत्रात्मकमानंदमयाधिकरणं षष्ठं ६ अंतस्तद्धर्मोपदेशात् १ श्रुतः सयोंतरादित्ये पुरुषोयो नरक्षिणि। सार्वात्म्यात्स
र्वदुरितराहित्यात्परमेश्वरः। सादित्यरूपो जीवः ससार्वात्म्यादेरसंभवात् २१० छांदोग्यप्रथमाध्यायषष्ठसप्तमखंडयोः।
आदित्याक्षिस्थपुरुषोपास्ति। स्तोविहितेक्रमात् ११ उद्गतः सर्वपाप्मभ्य इत्युत्संज्ञउदीरितः। तक्तामध्यात्मकं तोक्यासार्वा
त्म्यं समुदीरितं। १२ उन्नामत्वात्तथक्तामिगच्छताच्च परः पुमान्। उद्गीथाख्यः सध्येयः सर्वपाप्मनिवृत्तये १३ विभागापरपर्या

४१ चाक्रायणमुनिः प्रस्तोतारमुवाचेह ७२ उद्गातारं पृष्ट आदित्यं माहोद्गीथस्य देवतां। प्रतिहर्तुः प्राह सोऽन्नं प्रतिहारस्य देवतां ७३ सर्वाणीमानि भू
तानि खे सतं सदा दिवि। गायंत्यादित्यमिति स आदित्यं प्रशशंस ह ७४ अन्नमेव प्रतिहरमाणानि निखिलानि हि। भूतानि जीवंति स देवस्यान्नं संप्र
शशंस ह ७५ इति श्री॰सु॰एकसूत्रमाकाशाधिकरणात् इति दिष्टं प्रस्तावदेवता प्राणस्य परमात्मत्वसाधकं प्राणाधिकरणं नवमं ९ ज्योतिश्चरणा
भिधानात् १ गायत्र्याख्यब्रह्मविद्या छांदोग्यस्य तृतीयके। अध्याये द्वादशे खंडे मारभ्योक्ता त्रयोदशे ७६ खंडे तत्र जाठराग्नेर्ज्योतिष्ट्वेन ह्यु
पासनं। लोकसंदर्शनीयत्वप्रख्यातेः प्राप्तये श्रुतं ७७ तत्रादौ यदतः परो दिवो ज्योतिरिति श्रुतौ। ज्योतिःशब्देरितं ज्योतिर्भौतिकं नेह किंतु तत्। प
रब्रह्मैव कुक्षिस्थं यावुपास्य यदीरितं ७८ सूत्रार्थस्तु। गायत्र्याख्यब्रह्मणस्तु चतुष्पात्वेन कीर्तनात्। तत्र त्रिपाद संसारि सर्वेश्वरस्य हृदयस्य दात्।
परामर्शादिह ज्योतिः परब्रह्मैव संमतं ७९ पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि। इति प्राग्द्युसंबंधि प्रक्रांतममृतं त्रिपात् ८० द्युसंबं
धितमत्रस्यं द्युत्रिपादमृतस्य हि। शब्दतः स्मारकं तस्माद्यच्छब्दस्तद्ब्रवीत्ययं ८१ यदतः परो दिवो ज्योतिर्दीप्यत इति श्रुत्यर्थस्तु अस्माद्दिवो
लोकात् सरः परमुपरीत्यर्थः। लिंगव्यत्ययश्छांदसः। ज्योतिरवभासकत्वेनोपलक्षितं स्वप्रकाशं वस्तु दीप्यते स्वयंप्रभं सदा प्रकाशमानतया
दीप्यत इव ज्वलतीव दीप्यत इत्युच्यते स्यादिव ज्वलनलक्षणाया दीप्तेरसंभवात्। भास्वररूपं दीप्तिः। रूपभास्वरत्वावगमको रूपवह्नि
णो व्यापारो दीपनक्रिया। दिवः परं कं दीप्यत इत्याशंकायामाह। विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विति। विश्वतः सर्वस्मात् सं
सारिप्राणिवर्गात् पृष्ठेषु परिस्थितेषु क्रममुक्तियोग्येषु महरादिसत्यलोकांतलोकस्थेषु विश्वतः इत्यस्य कर्तियं सर्वप्राणिवर्गसंकोचं व्याव ४१
प

र्तयितुमाह सर्वतः पृष्ठेष्विति भूरादिलोकात्मकनिःशेषसंसारमंडलादुपरिस्थलोकस्थेष्वित्यर्थः। अत एव अनुत्तमेषु न विद्यंते उत्तमाः श्रेष्ठा
येभ्यस्तेषु हिरण्यगर्भांतजीवमुक्तजीवेषु दीप्यते। किंचोत्तमेषु लोकेषु महरादिसत्यांतलोकेषु च यत्त्रिपादमृतरूपं ज्योतिर्दीप्यते। त
तेजसः स्यैं पुरुषांतःस्थजाठरतेजस्यध्यासमाह। इदं वाव तद्यदिदमस्मिन्नंतः पुरुषे ज्योतिरिति। यदिदमौदर्यमस्मिन्पुरुषे तर्मध्ये ज्योतिरग्निः।
तद्दीप्त्यात्मकं ज्योतिरिदं वाव। इदं त्रिपादमृतस्वरूपज्योतिरेव। जाठरवह्नावध्यस्तपरमात्मरूपज्योतिषो दृष्टत्वेन श्रुतत्वेन चोपासना
माह। तस्यैषा दृष्टिर्यत्रैतदस्मिञ्छरीरे संस्पर्शेनोष्णिमानं विजानाति। तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेरिव ज्व
लत उपशृणोति तदेतद्दृष्टं च श्रुतं चेत्युपासीत चक्षुष्यः श्रुतो भवति य एवं वेद य एवं वेद इति। तस्य त्रिपादमृतरूपज्योतिष एषा वक्ष्यमा
णप्रकारा दृष्टिश्चक्षुषावलोकनसदृशं संदर्शनं मंतव्यमिति शेषः। एवमग्रेऽपि तस्यैषा श्रुतिराकर्णनं। यत्रास्मिञ्छरीरे संस्पर्शेन त्वगिं
द्रियेणोष्णिमानमौष्ण्यं विजानाति एतदिति क्रियाविशेषणं एतल्लिंगेंद्रियजन्यशारीरोष्ण्यज्ञानमेव तस्य दर्शनं। निनदमिव रथघो
षमिव। नदथुरिव वृषभकूजितमिव। ज्वलतोऽग्नेः शब्दमिव। उपशृणोति एतदेव श्रवणं तस्य श्रवणं मंतव्यं तदेतद्दृष्टं च श्रुतं चेत्युपासीत।
औदरो जाठराग्निं ब्रह्म ज्योतिष्ट्वेन ध्यात्वा तदेतद्दृष्टात्मकं ज्योतिरुक्तरीत्या दृष्टं श्रुतं चेति ध्यायेत्। य एवं ध्यायति स लोके चक्षुष्यो द
र्शनीयः श्रुतः प्रख्यातश्च भवतीत्यर्थः। एवं चात्र ज्योतिष्पूर्वाधरीभावरूपं द्युसंबंधित्वं दिवः परं ज्योतिरिति शब्देनोपस्थितं त्रिपादमृत
शब्दसमभिव्याहृतात्तस्य दिवः शब्दसमानजातीयाद् दिवु प्रातिपदिकबोध्यद्युसंबंधि त्रिपादमृतं स्मारयति यस्मात्तस्माद् यच्छब्दोऽनुवदति ८१
त्रिपादमृतरूपत्वं ज्योतिषः स्पष्टमत्र हि। ब्रह्मलिंगमतो ज्योतिरिदं ब्रह्मैव नेतरत्। द्युमर्यादाद्युपास्त्यर्थं ज्योतिषो वास्तवं न हि ८२॥॥

त्रिपादस्यामृतं दिवीत्यस्य ~~अस्य~~ ब्रह्मणश्चतुष्पदैकैकपादशब्दोपलक्षितैकदेश एवायं सर्वभूतात्मकः प्रपंचः। त्रिपाच्छब्दोपलक्षितमनंतम
४२ विनाशिस्वरूपं दिविद्योतते स्वरूपभूतप्रकाशरूपेणावतिष्ठत इति द्योः प्रकाशात्मकस्वरूपं तस्यां तादात्म्येन स्थितमित्यर्थः। द्योदिवृशब्दयोः
प्रथमैकवचनं समं। दिव ओ दिति सोपरत ओत्वविधानात् ८२ छंदोभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथा हि दर्शनं २ गायत्री छंद
सस्त्वेव पूर्ववाक्ये ह्युप / क्रमात्। न ब्रह्मणः प्रकृतत्वमिति चेन्न तथास्तितत् ८३ गायत्रीद्वारतस्तत्र सर्वगे परमात्मनि। चेतोर्पणस्य कथना
द्ब्रह्मप्रकृतमत्र हि ८४ गायत्री वा इदं सर्वमित्युपक्रम एव हि। सार्वात्म्यं यत्स कथितं गायत्र्यां तदसंभवात्। उपक्रमगगायत्रीपदं हि ब्रह्मलक्षकं
८५ अपवर्गश्रियः प्राप्त्यै गायत्रीद्वारिका शुभा। ब्रह्मोपास्तिः प्रकथिता तो त्र तत्सत्कृतं द्वहत् तु ८६ विकारद्वारतो ब्रह्मोपास्तिस्त्रयथेरिता।
तथा ह्यन्यत्रैतरेयारण्यके स्ति निदर्शनं ८७ निदर्शनं दृष्टांतः ८७ एतं ह्येव बह्वृचा महदुक्थे मीमांसंते। एतमग्नावध्वर्यव एतं महाव्रते छं
दोगा इति ८८ एतमेवात्मानमृग्वेदिनो महति मुख्य उक्थशास्त्रे तदनुगतं मीमांसंते उपासते। अध्वर्यवो यजुर्वेदिनोऽग्नौ अग्निसाध्यकर्म
तौ छंदोगाः सामवेदिनो महाव्रतनाम्यक्रतौ स्वस्वविकारानुगतं ब्रह्म मीमांसंत इत्यैतरेयारण्यकोपनिषद्युक्तमस्तीत्यर्थः ८८ तथा चे
तोर्पणनिगदात्तथा हि दर्शनमिति सूत्रभागस्य वर्णकांतरमाह। छंदोभिधानसूत्रस्य वर्णकांतरमुच्यते। गायत्रीछंदसस्त्वेव पूर्ववाक्ये ह्युप
क्रमात्। न ब्रह्मणः प्रकृतत्वमिति ज्योतिः श्रुतौ ह्यहत् ८९ यच्छब्देन परामृष्टं मथाक्यमिति तन्न हि। यच्छब्दार्थब्रह्मरूपं न ज्योतिरिति चेन्न तत् ९०
चतुष्पात्वेन गायत्री साहश्येन जगत्सतो। तद्ध्यानस्य कथनाद्गायत्रीपदमेव तत् ९१ गौण्यावृत्त्या लाक्षणिकं परब्रह्मणि तत्र वै। अतो नात्र ४२
कृतं ब्रह्म यच्छब्देन यदीरितं ९२ यथा षडक्षरैः पादैर्गायत्र्युक्ता चतुष्पदा। भूतपृथ्व्यादिपादोक्तेश्चतुष्पाच्च तथा ह्यहत् ९३ तस्माच्चतुष्पात्

हीति प्रददौ तान्द्विजायसः। उदकं च गृहाणेति स चाक्रायणमुक्तवान् ५३ न गृह्णामि तवोच्छिष्टं जलमित्युक्तवान्द्विजः। नोच्छिष्टाः किमि
मे माषा इत्युक्तः प्राह तं द्विजः ५४ न जीवेयमिकुल्माषानन्नदास्मीति तद्ग्रहः। उदकं तु बहिर्भूयोऽस्ति तिमास्तुतवोदकं ५५ इत्युक्त्वा तान्स
से भक्ष्य शिष्टान्पत्न्यै ददौ मुनिः। सान्यत्र प्राप्तसद्भिक्षा गृहीत्वाऽरक्षपयद्गृहे ५६ तदालक्ष्य स्थितस्तूष्णीं रात्रौ सुष्वाप मंदिरे। प्रातरुत्थाय
भार्यांस्वामीत्वेजिगमिषुर्मुनिः ५७ लभेमहि धनं किंचिद्यद्यद्यान्नं लभेमहि। राजासौ यक्ष्यते मां स सर्वार्त्विज्ये वरिष्यते ५८ श्रुत्वेति पत्युर्नोक्तं
सा कुल्माषोस्त इमे पते। पूर्वोच्छिष्टैस्त्वया दत्ता इत्युवाच निजं पतिं ५९ खादित्वा तानुषस्तिः स यज्ञवाटं जगाम ह। तत्रास्तावे स्तोष्यामोद्गातॄणां णो
स उपाविशत् ६० आस्तावो नाम तत्स्थानं यत्र गायंति सामगाः ६१ तत्रोपविश्य उद्गातॄन्प्राह प्रस्तावदेवतां। उद्गीथदेवतां चाथ प्रतिहारस्य
देवतां। अविद्वांसस्तास्तोष्यथ चेन्मूर्धा वो निपतिष्यति ६२ श्रुत्वेति वाक्यं ते भीतास्तूष्णीमासन्नलक्रियाः ६३ यजमानो नृपः प्राह मुनिं चा
क्रायणं तदा। ज्ञातुमिच्छामि भवतो नाम यत्प्रार्थितं त्विति ६४ चाक्रायणो मुनिरहमुषस्तिरिति सोऽब्रवीत्। अथ राजा मुनिं प्राह समर्थ्य स्तिम
या श्रुतेः ६५ सर्वार्त्विक्कर्मकरणाय त्वमान्विष्टो मया पुरा। भवतोनुपलब्ध्या मा वृत्विजो वृतवानहं ६६ अधुनापि त्वमेवेदं सर्वार्त्विक्कर्म कुर्विति। ६७
इति राजा मुनिं प्राह निपूर्वेणाञ्चयः ६७ तथास्त्विस्युररीकृत्य मुनिः प्राह नृपं प्रति। यावदेष्या धनं दद्यास्तावन्मे दीयते यदि ६८ तथे
ते मदनुज्ञाताः स्तुवंतु यदि रोचते। इति तद्वाक्यमाकर्ण्य नृपः प्राह तथास्त्विति ६९ अथ चाक्रायणमृषिं [illegible] प्रस्तोता विनयान्वितः
प्रस्तावदेवता का सा यामविज्ञाय हि स्तुतो। मूर्धपातस्त्वया प्रोक्तस्तां मे ब्रूहीति पृष्टवान्॥ सर्वाणीमानि भूतानि प्राणमेवाभिसंविशंति। प्रा
पादेवबाहिर्यंति सैषा प्रस्तावदेवता ७१ तां चेद विद्वान्प्रास्तोष्यो व्यपतिष्यच्छिरस्तदा। इत्युक्ते नतयान्तस्तोऽस्थितं सम्यक्तं न हि तत्र। इति

७ अन्नविप्रकृष्टानांपदानामिधिमन्तंयः। तेवाएते पंचान्येपंचान्ये दशसंपद्यंते। तत्कृतं। तस्मादेवदशसर्वासुदिक्षुसंतः कृतंचअन्नं। सैषाविराडन्नादीचेति।

आदौचतुष्ठिङ्गतांश्चत्वारः संख्याप्रथमा ४ चतुर्थस्त्रयः ३ त्रिषुद्वौ २ द्वयोरेकः संख्या १। संकलनायांचतसृणांसंख्यानांदशात्मकत्वं
४३ आदेचतुष्ठिङ्गताश्चत्वारः संख्यापथमा ४ वायुप्राणयोरविप्रायुक्तरीत्यादशत्वसंख्यावत्ताद्वायु
पु सिध्यति। एवंचकृतसंज्ञकः पाशश्चतुरंकैर्दशांतर्भावेनदशत्वसंख्यावान्भवति। वायुप्राणयोरविप्रायुक्तरीत्यादशत्वसंख्यावत्ताद्वायु
प्राणात्मकेदशत्वसंख्यावतिसमुदायिनिकृतशब्दाद्दशत्वसंख्यारूपगुणयोगेनगौण्यात्तयालाक्षणिकइतिकृतशब्देनवायुप्राणा
वुच्येते। एवंदशत्वगुणयोगेनगौण्यालक्षणयाछंदोभिधायिविराट्पदेनापिश्रुतौवायुप्राणोक्तत्वंचचिंतनायव्युह्यीयते २ चतुः
सुषिरपाशस्थचतुःसंख्यादरेस्तिहि। दशसंख्यसंख्यायोर्दशकेकृतशब्दस्माकृ ३ दशत्वगुणयोगेनकृतशब्दः श्रुतौतयोः। विराट्श
ब्दः प्राणवाद्योःप्रयुक्तोस्तिकृतेपिचे ४ तेवाएतेपंचान्येपंचान्येदशसंतस्तत्कृतंतस्मात्सर्वासुदिक्ष्वन्नमेवदशकृतं ५ सैषाविराडन्ना
दीतयेदं सर्वंदृष्ट ५ सर्वमस्येदंदृष्टंभवत्यन्नादोभवतियएवंवेदयएवंवेदेतिश्रुतावित्यर्थः। तयोर्वायुप्राणयोः। अन्नादीअन्नादिनी। श्रु
मिलिवाद स्यर्थस्तु। तेवाएतेअग्न्यादयोवागादयौकृतमित्युच्यंते तस्मादेवदशत्वगुणयोगाद्दशाग्न्यादयः। सर्वासुदशादिक्षुविद्यमानाः कृतं कृतशब्द संतो
शातत् दशक वाच्यः कृताभिधः पाशश्चअन्नंअन्नापरपर्यायविराट्शब्दलक्ष्यागौण्यालक्षणयाविराट्दबोध्याइत्यर्थः। दशाक्षराविराड्विराउन्नमि भवंती
तिश्रुत्यंतरस्यसत्वात्। तादृशलाक्षणिकविराट्दस्यार्थेअन्नत्वेनान्नादिनीत्वेनध्यानमाह सैषेतिसावायादिदशकात्मिकाएषाकृता
त्मिका विरा[illegible]ड्विराउंपरनामकमन्नमन्नादीअन्नादिनीचेतिध्येयेत्यर्थः। तत्राग्न्यादिरूपत्वेनान्नदृष्ट्यासर्वदिक्षुभीष्टान्नलाभः। दश ४३
संख्यांतर्भाविपित्वकृतरूपत्वेनान्नादीत्वदृष्ट्याभीष्टान्नभोक्तृत्वशक्तिलाभइतिविवेकः। तया विराजान्नरूपयाइदंसर्वंदशादिक्संबंधि

२ अन्नापरपर्यायाविराट्

भोज्यंदृष्टमवलोकितं। तयादृष्टं सर्वमिदमन्नमस्यान्नत्वेनोपासकस्यभवतिप्राप्तंभवति। कृतत्वेनोपासकस्तुप्राप्तान्नादोन्नभक्षण
शक्तिमान्भवति। यउपासकएवंपूर्वोक्तरीत्यावेदउपास्तेसः। वाक्यार्थ्यासउपास्तिसमाप्तिद्योतकः ४ चत्वारः प्रथमासंख्यात्र
यः संतिचतुर्थ्यां। त्रिषुद्वौस्तोद्वयोरेकएवंसंख्यादशात्मिका ५ एवंचतुःसंख्यादशसंख्यात्मिकाभवति। गायत्रीपदमप्येवंचतु
ष्पात्त्वस्ययोगात्वः। गौण्यालक्षणयाछंत्योपरब्रह्मणिवर्तते ६ भूतादिपादव्यपदेशोपपत्तेश्चैवं ३ इतश्चमहत्तब्रह्मात्रेत्याहेवंचशब्द
तः ७ स्तत्रगतस्यएवंचेतिनिपातद्वयस्यसंभूयइतश्चकारणादित्यर्थः ७ भूतभूवर्ष्महृदयरूपाःपादायईरिताः। गायत्र्याब्रह्मरू
पत्वउपपन्नाभवंतिते। नेवाक्षरसन्निवेशरूपायाः संभवंतिते ८ किंच। चतुष्पदाषड्विधाचतथापूर्णाऽप्रवर्तिनी। हार्दाकाशेध्येपतेया
गायत्रीसमुदीरिता। वाक्प्राणसहितैः पादैःषाड्विध्यंपरिकीर्तितं। ९ ध्येयस्थानंतुहृदयस्वर्गत्वेनप्रकीर्तितं। हृदश्छिद्राणिदिक्षूर्ध्वेचेति
पंचेरितानिहि १० स्वर्गद्वारतयोक्तान्यद्वारपाः पंचकीर्तिताः। प्राच्यांप्राणोदक्षिणस्यांव्यानोपानश्चपश्चिमे ११ उदग्वृत्तिसमानोत्त
चं दानुऊर्ध्वकपाटकाः। रविचंद्राग्निपर्जन्याब्रत्वेनेरिताहिते १२ रव्यादित्वेनाध्यानफलान्युक्तान्यनुक्रमात्। अवांतरफलान्येवमुक्तानिते
समुदीरितं १३ पंचेतेब्रह्मपुरुषाः स्वर्गलोककपाटपाः। एनानुपास्तेयः पंचसस्वर्गंप्रतिपद्यते १४ स्वर्गोत्रहृदयंतस्यप्राप्तिर्ध्येयकता
नता। तथापूर्णाप्रवर्तित्वगुणब्रह्माधिगच्छति १५ इतिहृत्कृपरब्रह्मपुरुषत्वेनतेश्रुतौ। व्यपदिष्टाद्वारपालाव्यपदेशोहिसश्रुतौ १६
गायत्र्याब्रह्मरूपत्वएवतत्रोपपद्यते। छंदोमात्रपरत्वेतुब्रह्मसंबंधितानहि १७ घटतेपुरुषाणांसाऽतोगायत्र्याभिधंपरं। ब्रह्मोक्तमिति

विज्ञेयं गायत्री पदतः श्रुतौ १८ किंच। गाया चासौ त्रीयमिति गायत्रीत्यब्रवीच्छ्रुतिः। गायति त्रायते सर्वान् गायत्री वाक्स्वरूपतः १९ अथो
४४ यं गौरियमिति त्यभिधत्ते खिलं जगत्। भाभेषी स्त्वा महं त्रास्ये इति शब्दात्मनार्जनात् २० त्रायते ही तिवेदेन गायत्रीति निगद्यते। गाना
त्राणाच्चोक्त्री सा गायत्री संज्ञकं बृहत् २१ नैवाक्षरसंनिवेशरूपा या घटते त्वदः। अतो वागादिसार्वात्म्यं ब्रह्मण्येव समंजसं २२ तदे
वात्रत्युसंबंधात्सत्य मित्रायते बृहत्। उक्तोभयोपपत्त्यापि ब्रह्मात्र प्रकृतं मतं २३ भूतादिपादद्वारपुरुषत्वस्य ब्रह्मसंबंधित्वमप
देष्टुरूपोभयोपपत्तिरूपादस्मादपि कारणादिति पूर्वोक्त हेतुः समुच्चीयते २३ उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ४ स
वेस् सम्यंतं पूर्ववाक्ये दिवीति श्रूयते पदं। इह पंचम्यंतमिति तूपदेशोभिदा ततः २४ प्रागुक्तस्य द्युसंबंधिब्रह्मणः प्रकृतश्रुतौ। पंचम्यंतद्युपदतः स्मरणं
नेति चेन्नतत् २५ विभक्तिभेदतो भिन्नेप्युपदेशद्वये यमात्। पूर्वस्य प्रत्यभिज्ञाया अविरोधाद्धि हि श्रुतौ। प्रागुक्तस्य द्युसंबंधिब्रह्मणो द्युप
दात्स्मृतिः २६ प्रधानप्रातिपदिकार्थेन प्राक्तनसंस्मृतेः। अप्रधानो विभक्त्यर्थो न खलु प्रतिबंधकः २७ वाक्यार्थधीहितु न पारस्वतंत्रा
हि पदार्थधीः। वाक्यार्थबुद्धिस्तज्जत्वाज्ञप्त्या न विरोधिनी। पदार्थोपस्थितिकाले नुत्पन्नत्वादिति शेषः २८ विभक्त्यंतपदार्थोत्रवा
क्यार्थस्तदपेक्षया। केवलप्रातिपदिकार्थः पदार्थ इहेष्यते २९ उच्यते हि पदं शक्तं पदद्वयमिहास्ति हि। प्रकृतिप्रत्ययश्चेति विशिष्टं वाक्य
मत्र तु ३० इति श्री०सुपदतः परोदिवो ज्योतिरिति कुक्षिस्थाग्नेः समुपास्यतया प्रोक्त ज्योतिः पदार्थस्य परब्रह्मत्वसाधकं चतुःसूत्रं
ज्योतिरधिकरणं दशमं १० प्राणस्तथानुगमात् १ त्वं वेदांतर्गतो कोषीतकि ब्राह्मणस्ति तत्रहि। आरण्यकोपनिषदि प्राणोपा ४४

गुणयोगाद्धीष्यत्र लक्षणा। उपक्रमगगायत्री पदस्य परमात्मनि १४ तेनात्र प्रकृतं ब्रह्म यच्छंदेन तदीर्यते १५ छंदोभिधायिशब्दस्य
सादृश्यादितरत्र च। प्रयोगोस्ति निदर्शनात् तथाहीत्याह सूत्रकृत् १६ छंदोभिधायिशब्दस्य प्रयोगोप्यत्र लक्षणा। स्फुटं संवर्गविद्यायां
तथाह्यस्ति निदर्शनं १७ छांदोग्योपनिषत्तुर्याध्यायखंडे तृतीयके। अन्नादता प्रये सर्वदिक्स्वभीष्टान्नसिद्धये। संवर्गगुणकप्राणवा
य्वुपास्तिरुदीरिता १८ स्वस्मिंस्तु वायुः संहृत्य क्रमाद्वह्न्यर्कचंद्राप इत्ययं। यस्मात्संगृह्णात्यत्र संवर्ग इति कथ्यते १९ प्राणः स्वस्मिंस्तु संहृत्य केवा
क्चक्षुः श्रोत्रहृदिति संवर्ग इति तौ ध्येयौ वायुप्राणौ क्रमाद्धृदि ३० वाक्चक्षुः श्रोत्रहृदि इति द्वितीया बहुवचनं त्वमनः ३०० ध्यातेवंतौ हृदिअतइति पदविभागः।
स्वेन सह पंच पंचेति तावुभौ। दश संपद्येते इति कृतत्वेन विचिंतयेत् १ तत्कृतं च विराट्त्वेन वायुप्राणौ विचिंतयेत्। इतीरितं तत्र कृतं चतु
श्छिद्राख्य उच्यते २ वायुप्राणावधिदेवाध्यात्मरूपौ संवर्गगुणकौ विशिष्य ध्यात्वा अग्निसूर्यचंद्रांबूनि चत्वारि तेषां संहृत्रा स्वेन वायुनात्म
गिंद्रियदेवतारूपेण सह पंच। एवं वाक्चक्षुः श्रोत्रमनांसि चत्वारि तेषां संहृत्रा स्वेन प्राणेन प्राणापानाद्यात्मकेनेंद्रियस्थानीयेन सह पं
चेति वायुप्राणौ मिलित्वा दशसंख्यात्मकौ संपद्येते इ उभावपि मिलित्वा दशसंख्यायाः स्वयोरंतर्भावाद्दशसंख्यांतर्भावं च चतुःसंख्या
कः सूक्ष्मश्छिद्र इत्युत काष्ठादिमयद्यूतसंबंधिपाशात्मक कृतनाख्यास्त इतिं तथा दशाक्षरच्छंदोविशेषरूपविराडिति च वायुप्राणौ ध्यायेत्। ध्यायेत्
कृतत्वेन ध्यानस्यान्नात्तृता शक्तिः फलं। विराट्त्वेन ध्यानस्य दशादिग्भ्योभीष्टान्नलाभः फलं अन्नं वै विराडिति श्रुतेरिति विवेकः। कृतसं
ज्ञके पाशे द्यूतक्रीडायां सर्वमुखचतुश्छिद्ररूपेण देवाङ्कोपातनक्रियया पातिते सति जयो भवति। तत्र पाशे दशसंख्यांतर्भावस्त्विति॥
३कृतं

स्तिप्रकाशकः। अष्टखंडात्मकोध्यायस्तत्रखंडे द्वितीयके ३१ प्राणोस्मि प्रज्ञात्मा तं मां त्वमायुरमृतं त्विति। उपास्वेति सुरेशेन प्रतर्दनं प्र
ति ३२ इहायुष्यस्य तत्काले त्वमृतत्वस्य चाप्तये। आयुष्ट्वेनामृतत्वेन प्राणोपास्तिरुदीरिता ३३ स एष प्राणः प्रज्ञात्मा तथानंदोमृतोज
रः। इत्युपास्त्युपसंहारः कृतोस्मिन्नष्टमखंडके ३४ सूत्रार्थस्तु। यथा पूर्वाधिकरणे ज्योतिःशब्दः परे ब्रह्मणि। तथात्र प्राणशब्दोपि परमात्मपरो मतः।
३५ आद्यंतयोरैकरूप्यादसाधारणलिंगतः। अत्र प्राणपदार्थस्य ब्रह्मत्वावगमाच्छ्रुतौ ३६ प्राणशब्दः परमात्मपर इति पूर्वेणानुषंगः ३६
आद्यंताभ्यां ब्रह्मपरमेकं वाक्यं भवत्यतः। प्राणोस्मि प्रज्ञात्मेत्यत्र प्राणो ब्रह्म न कादिकं ३७ आद्यंताभ्यामुपक्रमोपसंहाराभ्यां। कः प्रा
णाख्यो वायुस्तदादिकं प्राणवायुरूपेंद्रात्मकदेवताविशेषजीवात्मात्र प्राणपदार्थस्तल्लिंगान्यथासिध्यादिवक्ष्यमाणत्वादिति भावः ३७ न द
प्रज्ञात्मा प्राण एवेदं परिगृह्य शरीरकं। उत्थापयेदिति प्राणस्य लिंगं खंडे तृतीयके ३८ न विजिज्ञासीत वाचं विद्याद्वक्तारमत्र हि। इत्यादिकं
जीवलिंगं दृश्यतेष्टमखंडके ३९ अथासाधारणानीह ब्रह्मलिंगानि यानि तु। यथावदवबोधाय प्रदर्श्यंतेत्र तान्यपि ४० विद्यायां
हिततमत्वं धर्माधर्माद्यसंगिता। धर्मादेः कारयितृत्वं तथा सर्वनियंतृता ४१ इति ब्रह्मलिंगानि दृश्यंते ब्रह्मणो न हि। प्रज्ञानंदामृ
तत्वादिस्त्वनुकूलं च विद्यते ४२ अत्रैवमाख्यायिका श्रूयते। तथाहि। प्रतर्दनो नाम राजा दैवोदासिः पराक्रमात्। युद्धेन हेतुनेंद्रस्य
प्रियं धाम जगाम ह ४३ तं दृष्ट्वेंद्रस्तुष्ट आह दातुमिच्छामि ते वरं। इत्युक्तो नृपतिः प्राह त्वं मे हिततमं वरं। ४४ मन्यसे तं त्वमेवेंद्र देही
त्युक्तः सुरेश्वरः। मामेव त्वं विजानीहीत्याह तं नृपतिं प्रति ४५ मामिति ब्रह्मबुध्याह शास्त्रदृष्ट्या सुरेश्वरः। ब्रह्मज्ञानं हिततमं मनुर्मन्यत इति चा
ब्रवीत् ४६

किंचब्रह्मैवाहमितिदृढनिश्चयवानहं। प्रारब्धवधतोविघ्नंतादृग्वैहतवान्खलु ४७ वेदांतवाक्यंरुलोकेनद्येषांनास्तिवैमुखे। बाहमु
४५ खास्ताहृशायैतेहिपोक्ताअरुन्मुखा: ४८ आरण्यकास्तुयेश्वानस्तेत्रसालावृकामता:। सालावृकेभ्य:प्रायच्छंयतीनहमरुन्मुखा
न् ४९ बहुमर्माण्यतिक्रम्यप्रान्हादीनहनंदिवि। अंतरिक्षेतुपौलोमान्कालखंजांस्तथाभुवि ५० तेनमेविदुषोलोममात्रापिमहलोहसा।
स्फूदृढत्रानमाहात्म्याज्जीवन्मुक्तिर्नहिंस्यते ५१ योवाहितनमेच्छु:समांविजानातितत्वत:। नास्यमोक्ष:केनचनकर्मणाहिंस्यतेखलु ५२
नमातापितृवधतोनस्तेयभ्रूणहत्यया। इत्याद्यखंडेदेवेंद्र:समुवाचप्रतर्दनं ५३ अष्टमेचरमेखंडेसंतिलिंगान्तराणिच। सत्यंप्राणोनाभू
यान्कर्मणासाधुनापिच। असाधुनानोकनीयान्समएवाहसर्वदा ५४ एषएवसाधुकर्मतंकारयतियंनरं। लोकेभ्यएभ्यऊर्ध्वंतुह्युपर्येने
तुमिच्छति ५५ एषएवासाधुकर्मतंकारयतियंनरं। लोकेभ्यएभ्योधोलोकंनियहैर्नेतुमिच्छति ५६ एषप्राणोलोकपालएषलोका
धिपोमत:। एषसर्वेश्वर:प्राणोविद्यादात्मामभेतितं। इतींद्र:प्राणविद्यांवैनृपायोपदिदेशह ५७ पूर्वप्राणाधिकरणेलिंगान्ताण्यपदश्रुति:।
नीताब्रह्मपरत्वेनबहुलिंगेषुसत्स्विह ५८ आद्यंतैकार्थ्यादिनात्रबलाबलविनिर्णय:। लिंगानांक्रियतेतेननपूर्वपागतार्थता ५९ श्लोक
द्वयमेकंवाक्यं। पूर्वप्राणाधिकरणेप्राणुक्तेनएवप्राणइतिप्रस्तावप्राणाधिकरणे। बहुलिंगेषुजीवप्राणब्रह्मलिंगेषुसत्सु। आद्यं
तैकार्थ्यादिनाउपक्रमोपसंहारैकवाक्यत्वादिनावक्ष्यमाणेन। ब्रह्मलिंगस्यबलिष्ठतांसाधयित्वातेनलिंगेनात्रप्राणश्रुतिर्ब्रह्मपरत्वे ४५

मिति। प्रज्ञात्मप्राणस्य स्फूर्तिमद्त्वेनास्तित्वे सर्वेंद्रियाणां निःश्रेयसापरपर्याया स्थितिर्निर्णीयते। किंच। अष्टमखंडादौ। नवाचं जिज्ञासीत वक्तारं विद्यान्न
४६ गंधं विजिज्ञासीत घ्रातारं विद्यादित्याद्युपक्रम्यांते। नयथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञा
मात्राः प्राणेर्पिताः स एष प्राण एव प्रज्ञात्मानंदोऽजरोऽमृत इति विषयेंद्रियनाभिभूतं प्रत्यगात्मस्वरूपं प्राणमेवोपसंहरति श्रुतिः। भूतानि भूत्यादी
नि मात्राः शब्दस्पर्शादयः पंच विषयाः। गत्यादानविसर्गानंदाख्याश्च विषयाः। प्रज्ञामात्रासु स्वस्वविषयबोधकेषु ज्ञानेंद्रियेषु स्वस्वविषयप्रवर्तक
कर्मेंद्रियेषु चार्पिताः। इत्याद्यध्यात्मसंबंधबाहुल्यात्प्राणस्वरूपब्रह्मोपदेश एवायं न देवतारूपप्राणोपदेश इति सिध्यति ६३ शास्त्रदृष्ट्या तूप
देशो वामदेववत् ३ जीवस्य ब्रह्मरूपत्वबोधकश्रुतिसंविदा। प्राणोस्मि मामितीदृशोपदेशः स्याद्वामदेववत् ६४ नधैतत्पश्यन्नृषिर्वामः प्रतिपदेऽ
हं मनुरभवं सूर्यश्चेति हि बृहदारण्यकश्रुतिः ६४ जीवमुख्यप्राणलिंगान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ४ सत्यप्यध्या
त्मसंबंधभूम्नि प्राणवचस्तु न। ब्रह्ममात्रपरं किंतु जीवाऽसुपरमप्यदः। ब्रह्मलिंगाज्जीवलिंगान्मुख्याऽसोरपि लिंगतः। ६५ अदइदं प्राणो
स्मि प्रज्ञात्मा तं मामायुरमृतमुपास्वेति प्राणवाक्यं। मुख्यासोः पंचवृत्तिदैहिकवायूनां प्राणापानादिकानां मध्ये मुख्यस्य प्राणाख्यस्यासोर्दै
हिकवायोर्लिंगाच्चेति पदयोजना। प्राणवायुपरत्वपक्षे प्राणस्य ज्ञानेंद्रियाश्रयत्वयोपचारिकं प्रज्ञात्मत्वं पूर्वपक्षिणांगीकृत्य ब्रह्मजीवप्राणवा
युनां स्वातंत्र्येणोपास्तिपराण्युपक्रमोपसंहाराभ्यां पूर्वापरपर्यालोचनया ब्रह्ममात्रपरत्वेन प्रतीयमानमप्येकं वाक्यं भिन्नलिंगत्रयबला
द्वाक्यभेदेन त्रीणि वाक्यानि स्वीकृत्याक्षिप्यते प्राणवाक्यं ब्रह्मजीवप्राणवायुपरमस्त्विति। ब्रह्मपरैकवाक्यार्थप्रतीतावपि तस्या जीवमु ४६

ख्यप्राणरूपपदार्थप्रतीतिजन्यत्वेनामुख्यत्वादेकवाक्यार्थप्रतीतिमुख्यामपोह्य मुख्यपदार्थप्रतीत्यनुरोधेन वाक्यभेद एव न्याय्य इति पूर्वप
क्षाशयः। सिद्धांत्याशयस्तु प्रयाजाद्यंगानां प्रधानयागोपकारकत्वेन पारार्थ्याद्गुणत्ववत्। पदार्थप्रतीतेः पारार्थ्याद्वाक्यार्थप्रतीतिशेषत्वे
नामुख्यत्वं वाक्यार्थप्रतीतेः शेषित्वान्मुख्यत्वमिति पदार्थप्रतीत्यनुरोधेन वाक्यभेदो न न्याय्य इति। तर्हि ज्योतिरधिकरणे उपदेशभेदाद
दिति चेन्नोभयस्मिन्नप्यविरोधादिति कथं वाक्यार्थप्रतीतेः पदार्थप्रतीत्यपेक्षया जघन्यत्वेनाप्राधान्यमुक्तमिति चेच्छृणु। पदजन्यपदार्थोपिति स्थि
स्मारितवाक्यांतरार्थबुद्धिं प्रति पदार्थधीजन्यप्रकृतवाक्यार्थबुद्धेः पदार्थोपस्थितिकाले नुत्पन्नत्वेनाप्रतिबंधकत्वाभिप्रायेण जघन्यत्वमु
क्तं न तु पदार्थधीशेषत्वेन ६५ इति चेन्न तथात्वे तूपास्तित्रैविध्यतो न हि। तिस्रः स्वतंत्राः प्रत्येकं प्रसज्जेरन्नुपास्तयः ६६ तेनायुः प्राणममृत
मुपास्वेत्यर्थभेदतः। त्रिरभ्यासप्रसक्त्यात्र वाक्यभेदः समापतेत्। संभवत्येकवाक्यत्वे वाक्यभेदो न युज्यते ६७ प्रस्तावदेवताप्रश्नोत्तरे प्राण
इतीरितं। ब्रह्मणि प्राणशब्दस्य दृष्टेस्तत्राश्रितत्वतः ६८ ब्रह्मलिंगस्य हि हिततमत्वादेर्हि योगतः। ब्रह्मसंबंधभूम्नश्च प्राणो ब्रह्मैव नेतरे ६९
न प्राणवायुर्नो जीवो नासुरेशाख्यदेवता। प्राणः किंतु परब्रह्म प्राणोत्यत्रोक्तयुक्तितः ७० ईशायत्ता यतः सर्वव्यापाराः प्रभवंत्यतः। प्राणवाय्वा
दिलिंगानां ब्रह्मलिंगैकदेशता ७१ इति भाष्यकृतां व्याख्यारीत्या सूत्रार्थ ईरितः। वृत्तिकारास्त्वाहुरस्य सूत्रस्यार्थांतरं हि यत्। भाष्यकारैः खं
डनाय संगृहीतं तदुच्यते ७२ तथाहि। जीवमुख्यप्राणलिंगान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ४ सत्यप्यध्यात्मसंबंध
भूम्नि प्राणवचस्तु न। ब्रह्ममात्रपरं जीवप्राणलिंगविरोधतः। इति चेन्न प्राणजीवलिंगयोः स्याद्द्विरूपता ७३ जीवधर्मैः प्राणधर्मैर्ब्रह्मधर्मैस्त्रि
भिः सह। एकस्यैवोपासनस्य त्रैविध्यस्य विवक्षणात् ७४ अतो न धर्मभेदेपि ब्रह्ममात्रपरत्वता। व्याहन्यते नापि वाक्यभेदोत्र प्रतिपद्यते ७५

४७ नप्रतिपद्यते नप्राप्नोति ७५ मनोमयः प्राणशरीरो भारूप इति श्रुतौ। उपाधिधर्मैरेकस्या उपास्तेराश्रितत्वतः ७६ इहाप्युपाधिधर्माणां योगा
देकमुपासनं। इत्याह इतिकारस्तन्न सम्यगिति भाष्यकृत ७७ उक्तं चैतदन्यत्राप्यभियुक्तैः। तथाहि। नानाधर्मविशिष्टैकोपासनस्य विधायिनः।
वाक्यस्याश्रवणान्नेतद्युक्तं इति सूत्रांमतं ७८ तं मामायुरिति श्रुत्या स्वस्वधर्मसमन्वितैः। जीवप्राणामृताख्यैर्युक्तोपास्तिर्विधीयतां ७९
तन्मिति प्राणमनूद्य तदभिन्नेन मामिति जीवेन आयुरिति प्राणेन २ अमृतमिति अमृताख्येन ब्रह्मणा ३ चेति त्रिभिर्युक्ता एकोपास्तिरेकेनैव
वाक्येन विधीयतामित्याशंक्याग्रिमश्लोकेन दूषयति। इति चेन्नैतदेवं स्यात्सर्वधर्माश्रुतत्वतः। ब्रह्मश्रुतेरभावाच्च प्राणस्यैवामृतत्वतः ८० प्रा
णो वा आयुः। प्राण एवामृतमिति मूलश्रुतावेव प्राणस्यैवायुष्ट्वामृतत्वोक्त्या तं मामायुरित्यत्र प्राणातिरिक्तब्रह्मश्रुतेरभावात्। तं मामायुरमृ
तमुपास्स्वेत्युपास्तिविधायकवाक्ये सर्वेषां विधेयत्वेन विवक्षितगुणानामश्रुतत्वाच्च न स्वस्वधर्मसमन्वितैकोपास्तिर्विधातुं शक्यत इति भावः ८०
विधित्रयं स्यादहङ्कारं विद्यादित्यादिकं पृथक्। अन्ये गुणविधानार्था इति वक्तुं न शक्यते ८१ येऽन्ये त्रयाणां धर्मा अत्रोक्तास्ते गुणविधानार्था इति
वक्तुमित्यपि वाक्यत्रयभेदेनोपास्तित्रयं वक्तुमित्यर्थः ८१ उपक्रमावसानाभ्यामेकवाक्यत्वनिश्चयात्। तस्मात्सर्वोत्कृष्टरीत्येदं ज्ञेयं ब्रह्मपरं श्रु
तमिति ८२ न वाचं विजिज्ञासीत वक्तारं विद्यात् १ एतदेवोक्थमुपासीत २ अध्यायान्ते। स म आत्मेति विद्यात् ३ इति विधित्रयं पृथक्पृथक्
स्वतंत्रमेवास्तीति शंकित्वा समाधत्ते इति वक्तुं न शक्यत इत्यादिना। देहादिकमुत्थापयतीत्युक्थं प्राणवायुः ८२ साभासबुद्धिरूपायाः प्रज्ञा
यायदिहेरितं। दृश्यतो विषयित्वं तज्जीवधर्मो साक्षिणि ८३ परमात्मनि कूटस्थे इदृष्टताध्यासहेतुना। प्रज्ञायायेरितासादिधर्मोत्याभासगः
खलु ८४ दृश्यतो दृश्यमप्युक्तं विषयित्वं। ८३ याईरिता ८४ विनाजीवाख्यमाभासं घटते न द्वयं त्वदः। अत उक्ता विमोधर्मै ज्ञायते जीवगा इति ८५ ४७
वि

न निश्चीयत इति भावः। तस्मादसाधारणब्रह्मलिंगघटितोपक्रमोपसंहारयोरेकवाक्यतया प्राणपदस्य ब्रह्मपरत्वावगमादत्र प्राणशब्दो
ब्रह्मपर इति सूत्रार्थः। अत्र जीवप्राणाख्यशरीरवायुब्रह्मणां त्रयाणामपि लिंगानां सत्वात्त्रयाणामुपास्यानां प्रत्येकं स्यात्त्रैधेणोपास्यत्व
मिति पूर्वपक्षः। लिंगत्रयसत्वेऽपि जीवमुख्यप्राणलिंगघटितोपक्रमोपसंहारैक्याभावेन ब्रह्मलिंगघटितोपक्रमोपसंहारैक्याद त्र ब्र
ह्मैव प्राणपदार्थ उपास्य इति समाधानकोटिरिति तात्पर्यं ५९ न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबंधभूमा ह्यस्मिन् २ उपास्तिव
क्तुर्देवेशाकर्तृकाद्धि श्रुतौ। उपक्रम्यते यतयास्वस्योपास्यत्वकीर्तनात्। न प्राणो ब्रह्म किंतु स्यात्प्राण इद्द इहेति चेत् ६० ब्रह्मविला
त्वस्य सर्वपापासंसर्गकीर्तनं। प्राणोऽस्मि तं मामित्यस्य लिंगत्वेनानुगुणं खलु ६१ प्राणोऽस्मीत्युत्तमपुरुषवाच्यकारकवाच्यहं शब्दस्य
ति मीमिंद्रद्वितीयां नास्मच्छब्दस्य वाच्यत्वेनेंद्रत्वेनास्यमेतत्रनलोमत्वमीयत इति स्वस्य ब्रह्मवित्वेन ज्ञानप्रभावाद्दोपासंगित्वकथनम
नुगुणं तात्पर्यग्राहकं ६२ तस्मादिंद्राख्यदेवता विशेषरूपः प्राण इहोपास्यो न परब्रह्मार्थक प्राणशब्दार्थ इति चेदत्रोच्यतेऽध्या
त्मसंबंधभूमेत्यादिना। अस्मिन्प्राणोपास्तिपरेऽध्याये कोपीतकीरिते। ब्रह्मसंबंधबाहुल्यमुपलभ्यत इत्यदः। प्राणोऽस्मि मामुपास्स्वेति त्युपदेश इह
शगः ६२ नेदेवताजीवपरोन्याय्यत्वाद्रुसंमतेः। ६३ तथाहि। द्वितीये खंडे। प्राणोऽस्मि प्रज्ञात्मेत्युपक्रम्य यावद्ध्यस्मिञ्छरीरे प्राणो वसति तावदा
युरिति प्रज्ञात्मनः परमात्मरूपप्राणस्यायुःप्रदानोपसंहरयोः स्वातंत्र्यं दृश्यते सकारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः इ
ति श्वेताश्वतरश्रुत्या स्पष्टं सर्वकारणत्वसर्वकरणाधिपनियंतृत्वयोः स्वातंत्र्यस्याम्नानात्। किंच द्वितीयखंडान्ते। अस्ति त्वेव प्राणानां निःश्रेयस

।सच्चिदाभासा बुद्धिः प्रज्ञा। सेवाहं इति रूपा जीव इदं इति रूपा ज्ञानं। चिदाभासता तादात्म्याध्यासस्तु प्रज्ञाप्राप्यैव

दिनिष्ठविषयतानिरूपितविषयित्वरूपः प्रज्ञाधर्म एव जीवधर्मत्वेन निरूप्यते। अथ प्रथमं ज्ञानं आदिमारभ्य पञ्चखंडांतं प्रज्ञया वाचं समा
४८ रुह्य वाचा सर्वाणि नामान्याप्नोति प्रज्ञया घ्राणं समारुह्य घ्राणेन सर्वान् गंधानाप्नोति प्रज्ञया चक्षुः समारुह्य चक्षुषा सर्वाणि रूपा
ण्याप्नोति इत्यादिरीत्या साक्षिणि चिद्रूपे वक्तव्यत्वद्रष्टृत्वाद्यध्याससंपादकत्वरूपः प्रज्ञाधर्मो जीवधर्मत्वेन निरूप्यते। श्रुत्यर्थस्तु। प्र
ज्ञाप्राणयोर्ज्ञानशक्तिक्रियाशक्तिमतोः साक्ष्युपाधिभूतयोरात्मावबोधकत्वं पूर्वमेवोक्तः। ततस्ताभ्यामुपलक्ष्यस्य ब्रह्मणः प्राणा
परपर्यायस्य विबोधनाय सहवाससहोत्क्रमणधर्मसाधारण्येनाभेद उक्तस्तयोरात्मोपलक्षकयोः। अतः प्राणप्रज्ञाधर्म ब्रह्मध
र्मपुरस्कारेण ब्रह्मोपास्त्यर्थं प्राणवायुप्रज्ञयोर्निरूपणमिति पूर्वपक्षानसंभवतीति तयोः स्वोपलक्ष्यब्रह्मापरनामकप्राणावबोधा
र्थकत्वेसार्थक्यादिति भावः। प्राणशब्दस्योपक्रमगतस्य तु ब्रह्मपरत्वमानंदाजरामरत्वादिसाधारणब्रह्मलिंगादुपक्रमोपसंहा
रैक्येनोक्तात्। अथ पञ्चास्यै प्रज्ञायै सर्वाणि भूतानीत्यस्यार्थः। सहवासः सहोत्क्रांतिश्चेत्युक्त्यानंतर्यमथशब्दार्थः। अस्माजीवा
त्मप्रज्ञायाः संबंधीनि पृक्त्वा सर्वाणि भूतानि तद्दृश्यत्वेन कल्पितानि यथा यदस्त्वन्येकी भवंतीति तथा तदस्तु व्याख्यास्याम इत्यु
पक्रम्योक्तं वागेवास्या एकमंगमदूदुहदित्यादि। बुद्धेः सच्चिदाभासायाः स्वरूपत उत्पत्तौ वाविषयित्वरूपं पूर्णशरीरमिंद्रियसा
ध्यं। तत्र वाचकापरपर्यायनामविषयित्वमर्धशरीरं बुद्धेरहंकारलक्षणायास्तथावाचकशब्दवाच्यरूपप्रपंचविषयित्वमर्धशरी
रं। तथा च कर्मेंद्रियमध्ये वागेवास्याः प्रज्ञाया एकमंगं शरीरार्धभागमदूदुहत्पूरयामास। वाचकनामात्मकप्रपंचे वागिंद्रियद्वा ४८

रा वाविषया बुद्धिर्नामस्वरूपप्रपंचविषयित्वलक्षणं शरीरार्धमाप्नोतीति यावत्। तस्याः प्रज्ञायाः पुनर्नाम किल परस्मात् शरीरस्यापरभा
गरूपशरीरार्धस्थाने भूतमात्रा पंचभूतान्यतमः शब्दस्य शब्दादिपंचतन्मात्रान्यतमो नामापरपर्यायशब्दगम्योऽर्थप्रपंचः। प्रतिविहिता च
श्रुत्यादिनाउपनीतभानविधया प्रकाशिता सती एकमंगं प्रज्ञायाः शरीरार्धभागमदूदुहत्पूरयामास। शब्दद्वारा शब्दगम्यार्थरूपप्रपं
चे प्रविष्टा प्रज्ञा शब्दगम्यार्थप्रपंचविषयविषयित्वलक्षणं शरीरार्धमाप्नोतीति यावत्। तेन जीवात्मनोऽहंकाररूपप्रज्ञा वागिंद्रियद्वा
रकनामप्रपंचविषयित्वरूपशरीरार्धभागनामगम्यार्थात्मकप्रपंचविषयित्वरूपशरीरार्धभागाभ्यां पूर्णविषयित्वलक्षणमेकं ना
मरूपात्मकं शरीरं प्राप्य द्रष्टी भवतीति सिध्यति। अथ प्रज्ञोपहितचैतन्यद्वारा स्वस्वरूपे बिंबभूते चिद्रूपे साक्षिणि द्रष्टृत्वाद्यध्या
समाह प्रज्ञया वाचं समारुह्येत्यादिना। प्रज्ञयाक्षरीभूतया वाचं वागिंद्रियरूपकरणं समारुह्याहं वक्तेति रूपया वाचा तादात्म्याध्या ति
सममनुभूय चिदात्मा साक्षी वाचाकरणेन सर्वाणि नामानि वक्तृत्वेनाप्नोति वक्तव्यशब्दद्रष्टृत्वात्मकं इति रूपज्ञानस्वरूपमध्यासम
नुभवस्तु का अध्यासात्मकानुभववान् भवतीत्यर्थः। एवमग्रेऽपि घ्राणेन सर्वान् गंधानाप्नोति। चक्षुषा सर्वाणि रूपाण्याप्नोतीत्यादौ
प्रज्ञाद्वारा तत्तदिंद्रियधर्मपुरस्कारेण तत्तदिंद्रियतादात्म्याध्यासानुभवपूर्वकं तत्तदिंद्रियविषयद्रष्टृत्वरूपाध्यासात्मकानुभव
वत्त्वे साक्षिणि व्याख्येयं। तथा च सर्वभूतविषयित्वं। साक्षिणि स्वप्रकाशे तत्तदिंद्रियतादात्म्याध्यासपूर्वकतत्तदिंद्रियविषयद्रष्टृत्व
रूपाध्याससंपादकत्वं च बुद्धेर्धर्म इति फलितं। अथ सार्वधारत्वानंदत्वादिर्ब्रह्मधर्म इत्याह तावा एता इत्यादिना नंदोऽजरोऽमृत इत्य

एवमग्रेऽपि द्वे।
मात्रा भूतमात्रा
प्रज्ञामात्राभ्यामेकं शरी
रं प्राप्य द्रष्टेर्हि।

४९ त्वेन। तथाहि। अष्टमखंडे। तावा एता दशैव भूतमात्रा अधिप्रज्ञं दश प्रज्ञामात्रा अधिभूतं यद्धि भूतमात्रा न स्युर्न प्रज्ञामात्राः स्युर्यद्वा प्रज्ञामात्रा न स्यु
र्न भूतमात्राः स्युर्न ह्यन्यतरतो रूपं किंचन सिध्येन्नो एतन्नाना तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रा
स्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः स एष प्राण एव प्रज्ञात्मानंदोऽजरोऽमृत इति। अस्यार्थः। तावै एताः एव दश पृथिव्यादीनि भूतानि पंच शब्दस्पर्शा
दयो मात्रा विषयाः पंचेति दश भूतमात्राः अधिप्रज्ञं प्रज्ञा इंद्रियाणि तदुत्थ ज्ञानानि चाध्यपेक्ष्य सिध्यंती अधिप्रज्ञं मानाधीना मेयसिद्धिरिति न्या
यात्। अथ दश प्रज्ञामात्रा ज्ञानेंद्रियाणि पंच तदुत्थ ज्ञानानि च पंचेति दश अधिभूतं पृथिव्यादिभूतानि पंच तन्मात्राः शब्दादयो वा पंचाध्यपेक्ष्य
सिध्यंती अधिभूतं स्वस्वमेयग्राहकत्वेनैव तेषां प्रमाणत्वसिद्धेः। अनयोः परस्परापेक्षैव सिद्धिर्न स्वतः सिद्धात्मेव स्वतः सिद्धिरित्याह यद्धीत्या
दिना किं च न सिध्येदित्यंतेन। अथान्योन्यापेक्षत्वहेतुना ग्राह्यग्राहकात्मकं जगतो मिथ्यात्वात् स्वतः सिद्धस्वप्रकाशपरमार्थवस्तुनो न पृथक्त्वं
मिथ्यावस्तुनोऽधिष्ठानानतिरेकादीत्यन्यारोपितमिदं सर्वं जगदित्याह नो एतन्नानेत्यादिना प्राणेऽर्पिता इत्यंतेन। तेन सर्वाधारत्वादिकं ब्रह्मलिंगमिदमत्र
अन्यानपेक्षत्व स्वप्रकाशत्वआदिपदग्राह्यं। दर्शितमिति सिध्यति। तस्मात्प्राणापरपर्यायब्रह्मण एव धर्मत्रयेणोपासनमेकमत्र विवक्षितमन्यत्रापि मनोमयः प्राणशरीरो भारूप इत्यादावुपाधि
धर्मेण ब्रह्मोपासनस्याश्रितत्वादिहापि तद्युज्यते तस्मादिदमिंद्रप्रतर्दन प्राणवाक्यं प्राणवायुजीवब्रह्मधर्मत्रयोपेतैकब्रह्मोपास्तिपरमित्येकदेशिम
तं। इदमयुक्तं। तथाहि। किमत्रोपासनात्रयविशिष्टं ब्रह्म विधेयमुत ब्रह्मविशिष्टोपासनात्रयं किं वा ब्रह्मानुवादेन तदाश्रितोपासनात्रयमेकं। नाद्यः।
ब्रह्मणः सिद्धत्वेन विध्ययोगात्। १ नापि द्वितीयः। वाक्यांतरेऽब्रह्मणो यथावज्ज्ञातत्वेन ज्ञातज्ञापकत्वेन विधेयत्वासंभवात्। नापि तृतीयः। ब्रह्म ४९

देहोऽस्याप्यनमात्तुप्यमन्नत्वमिति त्रयः। प्राणधर्माः प्रतीयंत इहोपास्त्यै श्रुतीरिताः ८६ विद्यायां हिततमत्वं धर्माधर्मायसंगिता। धर्मादेः कारयितृत्वं
तथा सर्वनियंतृता ८७ प्रज्ञानंदामृतत्वाद्या ब्रह्मधर्मा इहेरिताः। प्रतीयंते तथापि वाक्यभेदान्नोपासनात्रयं ८८ ईशायत्तायतः सर्वे व्यापाराः प्रभवं
त्यतः। प्राणवाय्वादिलिंगानां ब्रह्मलिंगैकदेशता ८९ चिदाभासेन सहिता बुद्धिः प्रज्ञेति भण्यते। चिदाभासेनैक्यमाप्यासेवाहंकारसंज्ञिका ९०
सोऽहंकारो जीव उक्तः कर्ता द्रष्टा स उच्यते। प्रज्ञारूपां बुद्धिमेवं जीव इत्यागमा जगुः ९१ अहंवृत्तिरिदंवृत्तिरित्यंतःकरणं द्विधा। जीवसंज्ञमहंवृत्ती
दंवृत्त्या तु प्रमाणकं ९२ अहंकारस्य तादात्म्यं चिच्छायादेहसाक्षिभिः। सहजं कर्मजं भ्रांतिजन्यं च त्रिविधं क्रमात् ९३ चिदाभासाहंकारयोः
स्वाभाविको हमिति तादात्म्याध्यासः। स त्वामुक्तेर्न निवर्तते। अध्यासोपाधिभूताहंकारचिदाभासयोरनादित्वात् संबद्धयोर्मुक्तिमंतरा अनिवर्तना
त्। गच्छामि तिष्ठामीत्यादि देहधर्मपुरस्कारेण देहतादात्म्यं कर्मकाल एव। अहंकारस्य साक्षिणा तादात्म्यं चिद्रूपोऽहं श्रोता मंता वक्तेत्याद्याकार
मात्मानात्मस्वभावाविवेकजन्यं। तच्चाहं ब्रह्मास्मीति शास्त्रीयमहावाक्यजज्ञानेनाखंडेन निवर्तते। इदमाकारे कांतःकरणवृत्तिस्तु प्रत्यक्षादि
प्रमाणरूपाप्रमाणाभासरूपा तदुपहिता फलीभूता चिद्विषयप्रमा प्रमाभासो वा दोषवशात्। तस्मात्प्रज्ञारूपबुद्धिधर्मा एव तदुपहितचि
दाभासधर्मा इति सिध्यति उपाधेः प्रतिबिंबपक्षपातित्वात्। उक्तधर्मद्वयप्रत्यायिका अत्रत्यश्रुतयः प्रदर्श्यंते। तथाहि। यो वै प्राणः सा प्रज्ञा या
वा प्रज्ञा स प्राणः सह ह्येतावस्मिञ्छरीरे वसतः सहोत्क्रामतो यथास्य प्रज्ञायै सर्वाणि भूतान्येकं भवंतीति तद्व्याख्यास्याम इति चतुर्थखंडांतो
पक्रम्य पंचमखंडादिमारभ्य पंचमखंडांतं। वागेवास्या एकमंगमदूदुहत्तस्यै नाम परस्तात्प्रतिविहिता भूतमात्रा घ्राणमेवास्या एकमंगमदू
दुहत्तस्य गंधः परस्तात्प्रतिविहिता भूतमात्रा इत्यादिरीत्या वाग्घ्राणचक्षुःश्रोत्रजिह्वाहस्तशरीरोपस्थपादप्रज्ञांतर्देशेंद्रियद्वारा तद्विषयनामा

१ अदूदुहदित्यस्य स्थाने अदूक्षमिति पाठः क्वचिद्दृश्यते।

संकल्पोक्तंच ध्यानापरपर्यायः ९७ श्रुत्या यथा क्रतुरिति प्रतिपादितत्वादेवेन यं यमिति साधुसमीरितत्वात्। तद्दिव्यरूपपरिचिंतनतो भवेयं तद्
५० पदवभगवन्नवमांप्रपन्नं ९८ यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवतीति श्रुत्या। श्रीकृष्णदेवेन गीतायां। यं यं वापि स्मरन्भावं त्यजे
त्यंते कलेवरं। तं तमेवैति कौंतेय सदा तद्भावभावित इति स्मृत्या च ९९ इति कामयते यः सक्रतुं कुर्वत शांतिमान्। इति ध्यानविधायात्र ध्येयध
मऊदीरिताः। मनोमयत्व प्रमुखास्तद्विशेष्यं नकीर्तितं ९९ अतः। सर्ववेदशिरोभागे जगद्धेतुनयेरितं। यत्तसिद्धं ब्रह्मतत्स्यतत्रोपक्रमई रणात्।
मनोमयत्वादिगुणं तदेवोपास्यमत्र हि ४०० मनोमयोपि जीवोत्र नोपास्यो ऽप्रकृतत्वतः १ तज्जत्वात्तल्लयत्वाच्च तदनत्वादिदं जगत्। सर्वं ब्रह्म
खल्विमोक्तं तज्जलानिति शब्दतः २ ब्रह्मोपास्तिमनूद्यात्र गुणः शांतिर्विधीयते ३ सक्रतुं कुर्वीतेति ब्रह्मोपास्तिमनूद्य शांतउपासीतेति तत्र शांति
गुणो विधीयते ३ त्वं स्त्री पुमानिति श्रुत्या परब्रह्मणि मायया। जीवादि सर्वधर्मा अप्युपदिष्टा भवंति हि ४ त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कु
मारी। त्वं जीर्णो दंडेन वंचसि त्वं जातो भवसि विश्वतोमुखः। इति श्रुत्या सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखमित्यादि गीतास्मृत्या च। वृध
रूपेण दंडं गृही त्वा त्वमेव वंचसि गच्छसि इति त्वपि जीवादि सर्वधर्मा विश्वतोमुखत्वेन त्वं जातो भवसीत्युपपद्यंत इत्यर्थः ४ अप्राणो ह्यमनाः शुभ्र
इति वेदमुंडक श्रुतिः। आचष्टे निर्गुणं ब्रह्म तस्य विरुद्धा मिथः श्रुती ५ अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः पर इति तृतीयमुंडक श्रुतिः ५ विवक्षितगु
णोपपत्तेश्च २ विवक्षिता उपास्यो य उपादेयतया गुणाः। तेषां ब्रह्मण्येव योगाद्ब्रह्मैवोपास्यमत्र तु ६ अत्र विवक्षित गुणास्तु। मनोमयः प्राचुर्येण म
यट्। प्राचुर्यमाधिक्यं यथान्नमयो यज्ञ इत्युक्ते प्रचुरान्नविशिष्टो यज्ञो [redacted]न्न प्राचुर्येणैव त्वं र[redacted] निर[redacted]न्न यज्ञोपस्य यात्र प्रचुरो लक्ष्यते ५०
दित

एवं मनसि प्रतिबिंबित आत्मा विषयग्रहणाय वृत्तिरूपेण प्रचुरमनसा विशिष्टो मनोमयः सन्मनः प्राचुर्येणैव मनः प्रादुर्भावकालीन स्वापेक्षया
प्रचुरो लक्ष्यते प्रतिबिंबित इति मनोमयः। मनसि प्रवृत्ते प्रवृत्त इव लक्ष्यते निवृत्ते निवृत्त इव लक्ष्यत इति फलितं। प्राणशरीरः प्राणः लिंगात्मा ज्ञान
क्रियाशक्तिमच्छरीरं यस्य स प्राणशरीरः। यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राण इति श्रुतेः। मनोमयः प्राणशरीर नेतेति श्रुत्यंतरा च्चामादीप्रिश्वेत
न्य लक्षणा स्वरूपं यस्य स भारूपः। सत्यो वितथः संकल्पो यस्य स सत्यसंकल्पः। आकाश इव सर्वगतः सूक्ष्मो रूपादिहीनो वा आत्मा स्वरूपं य
स्य स आकाशात्मा। सर्वं जगत्कर्म क्रियते उत्पाद्यत इति कर्म यस्य स सर्वकर्मा सर्वं जगत्कर्तेति यावत्। सर्वकामाः संकल्पा धर्माविरुद्धा विभूत
स यायस्य सर्वकामः। धर्माविरुद्धो भूतेषु कामोस्मीति स्मृतेः। एवं सर्वगंधः। सर्वरसः। पुण्यो गंधः पृथिव्यां च। रसोहमप्सु कौंतेय इति स्मृतेः। रसः सु
रुचिः। अविति पृथिव्युपलक्षणं। सर्वमिदमभ्यात्तो व्याप्तः। आङ्पूर्वादतेर्व्याप्त्यर्थकात्क्तेरिनि षष्ठप्रत्ययः। अवाकी। वाको वागिंद्रियं विद्य
तेयस्य स वाकी न वाकी अवाकी। वागिंद्रियप्रतिषेधः सर्वेंद्रियप्रतिषेधोपलक्षणं। अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्ण
इत्यादिमंत्रवर्णात्। त्वमकरणः स्वराडखिलकारकशक्तिधर इति श्रीमद्भागवतस्थ श्रुतिगीतास्मृतेश्च। अनादरः। आदरः संप्रीतिरिच्छा तद्रहितः आ
प्तकामस्य का स्पृहेति श्रुतेः। एवं यथोक्त गुणः परमात्मा मे मम प्राणी च आत्मा स्वरूपं। अंतर्हृदये हृदयपुंडरीकमध्ये णीयानणुतरः। ब्रीहेर्वेत्यादि त्वं त त
सूक्ष्मत्व प्रदर्शनार्थं। अणुपरिमाणवत्तस्य स्वरूपतः प्राप्तस्य प्रतिषेधार्थं ज्यायम आत्मांतर्हृदये ज्यायान्पृथिव्या इत्यादि। उक्तगुणविशिष्ट एव ध्येयो
न तत्तु क्तगुणोपलक्ष्यत्वेनेति ज्ञापनाय सर्वकर्मेत्यादेः पुनरनुवादः। सर्वकर्मा सर्वकामः सर्वगंधः सर्वरसः सर्वमिदमभ्यात्तो वाक्यनादर एष म आ
त्मांतर्हृदय इत्यंतानुवादः। न तत्त्वमसीति वाक्यवदिदं प्रकरणं केवल ज्ञेयमात्र प्रकिं तूपास्तिपरमिति ख्यापनायाह एतद्ब्रह्मेतमितः प्रेत्याभिसं
हि ई

प्रविताऽस्मीति यस्य स्यादद्धा अस्या निश्चयः। न विचिकित्सास्ति यस्य। विचिकित्सा संशयो यस्य नास्ति स तथैवेश्वरभावं प्रतिपद्यत एवं विद्वानिति
५१ शेषः। एतदुक्तगुणकं ध्येयं वस्तु ब्रह्मैव नान्यो जीवः। एतं परमात्मानमितोस्माल्लोकात्प्रेत्य मृत्वाभिसंभवितास्मि प्राप्स्यामीति यस्य स्यादद्धास्तः।
इति ह स्माह शाण्डिल्यः शांडिल्यः इत्युक्तवान्किल शांडिल्यो नाम ऋषिः। अभ्यास उक्तोपासनादरार्थः। इति शांडिल्यब्रह्मविद्या ६ सत्यसंकल्प
कत्वादेरनुरोधादिमे गुणाः। ब्रह्मण्येवोपपद्यंते न जीवेऽल्पशक्तिके ७ अनुपपत्तेरवाह। अनुपपत्तेस्तु शारीरः ३ सत्यसंकल्पकत्वादेर्ज न
वेत्यनुपपत्तितः। नेह शारीरको जीवः समुपास्यतयोक्तः ८ कर्मकर्तृव्यपदेशाच्च। ४ कर्मत्वेनोपदिशति ध्येय[redacted]मेतदिति श्रुतिः। प्रे चि
त्याभिसंभवितास्मीत्याह कर्तृतया परं ९ इतरं ध्यातारं प्रापकरूपतया। ध्येयं प्राप्यं कर्मतया व्यपदिशति एतमितः प्रेत्याभिसंभवितास्मीति शाति
यस्य स्यादद्धेति श्रुतिः ९ नह्येकस्मिन्कर्मकर्तृभावः स त्वागतो हितः। कर्मकर्तृत्वेन व्यपदेशाद्दर्शितो हि वै। न हि शारीरको जीवः समुपा
स्यतयोक्तः १० ~~कर्मकर्तृव्यपदेशाच्च ४ कर्मत्वेनोपदिशति ध्येयमेतमिति श्रुतिः~~। शब्दविशेषात् ५ मनोमयत्वादिगुणः परमात्मैव न शारीरः।
कुतः। शब्दविशेषात्। व्रीहिर्वा यवो वेति वक्ष्यमाणश्रुत्यंतरे पुरुषो हिरण्मय इति परमात्माभिधायी यः प्रथमांतः शब्दोऽस्ति तस्यांतरात्मन्निति लु
प्तसप्तम्यंताज्जीववाचकशब्दाद्विशेषो विभक्तिभेदेनार्थभेदस्तस्मात्। तेन मनोमयत्वादिगुणविशिष्टपरमात्माभिधायकस्य प्रथमां
तशब्दस्य श्रुत्यंतरे दृष्टस्य हापि सत्त्वादित्यर्थः। तथाहि। मनोमयत्वादिगुणविशिष्टस्य परमात्मत्वप्रतिपादकत्वेन समानप्रकरणश्रुत्यंतरे व्रीहि
र्वा यवो वा श्यामाको वा श्यामाकतंडुलो वा। एवमयमंतरात्मन्पुरुषो हिरण्मय इत्यादौ पुरुषो हिरण्मय इति प्रथमांतपदेन मनोमयत्वादिविशि
ष्टपरमाभिधानं। अंतरात्मन्निति लुप्तसप्तम्यंतेन आत्मनो मनसोंतर्मध्ये तिष्ठतीत्यंतरात्मा जीव इत्यर्थकेन शारीराभिधानं दृष्टमिति इहापि प्रथमां ५१
त्मा

उपादेनोपास्तित्रैविध्यविधानुपक्रमोपसंहाराभ्यामेकप्राणरूपविशेष्याधिकारादुपास्तिधर्माणां मिथोनभिसंबंधादेकस्मिन्विशेष्ये प्रति धर्मोपा
स्तिविध्याहृत्या वाक्यभेदस्य दुरपह्नवत्वात्। तस्मादायुष्ट्वामृतत्वोपेतप्राणशब्दाभिहितब्रह्मणस्तं मामायुरमृतमुपास्स्वेत्येकेनैव वाक्येनानेकोपा
स्तिर्विधीयत इति सिद्धं १३ इतिश्री० सु० इंद्रेणायुष्ट्वामृतत्वाभ्यां क्षितं न मत्तेनोपास्यतया प्रतर्दनायोपदिष्टस्य प्राणस्य ब्रह्मत्वसमर्थनपरं चतुः
सूत्रमिदं प्रतर्दनप्राणाधिकरणमेकादशं ११ इतिश्रीसु० समन्वयाध्याये प्रथमस्य स्पष्टब्रह्मलिंगकवाक्यं नामैकत्रिंशत्सूत्रैकादशाधिकरणः ए
प्रथमः पादः १ आद्ये पादे स्फुटब्रह्मलिंगवाक्यसमन्वयः। ब्रह्मण्यस्फुटब्रह्मलिंगवाक्यसमन्वयः १४ द्वितीये उच्यते पादे तृतीये पि द्वि
तीयके। उपास्तिगास्फुटब्रह्मलिंगवाक्यसमन्वयः १५ तृतीये तु ज्ञेयमात्रपरवाक्यसमन्वयः। प्रायेण कथ्यते तेन पादेनत्रामको क्रमात् १६
सर्वत्रप्रसिद्धोपदेशात् १ छांदोग्यगे तृतीये थाध्याये खंडे चतुर्दशे। सर्वं खल्विदमित्युपक्रम्योक्तं परमात्मनः। मनोमयत्वादिगुणैर्ध्यानं भगवद
तये १७ सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीताथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कु
र्वीत मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगंधः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्मांत
र्हृदयेणीयानित्यादि। एष म आत्मांतर्हृदये ज्यायानित्यादि। एतद्ब्रह्मैतमितः प्रेत्याभिसंभवितास्मीति यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शा
ण्डिल्यः शांडिल्य इति श्रूयते। सर्वात्मके ब्रह्मणि जीवधर्मानपि दर्शयति श्रुत्यंतरं श्वेताश्वतरस्थं। त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी। त्वं जीर्णो
दंडेन वंचसि त्वं जातो भवसि विश्वतोमुख इति। अथापाणो ह्यमनाः शुभ्रोक्षरात्परतः पर इति तृतीयमुंडकगता श्रुतिस्तु निर्गुणब्रह्मविषया। क्रतुः

५२ भोगसंप्राप्तिरितिचेन्नविशेषतः। अनश्नन्नन्यइत्यादिर्विशेषोऽस्तिश्रुतौश्रुतः २१ तस्मान्मनोमयत्वाद्यैरुपास्योऽत्रेशएवहि २२ इतिश्री॰सुअस्य
सूत्रअस्पष्टलिंगवाक्यसमन्वयाख्येप्रथमाध्यायद्वितीयपादेअष्टसूत्रंमनोमयत्वप्राणशरीरत्वादिगुणकेशोपास्त्यधिकरणंप्रथमं १
अत्ताचराचरग्रहणात् १ कठोपनिषदध्यायआद्यवल्लीत्रयात्मके। द्वितीयवल्ल्युत्तरार्धेपरमात्मानमेवतु। नजायतेम्रियतेवेत्यधिकृत्यततः
परं २३ नाविरतोदुश्चरितान्नाशान्तोनासमाहितः। नाशान्तमानसोवापिप्रज्ञानेनैनमाप्नुयात् २४ इतिश्रुतिः। इत्युक्त्वोपायरहितोनाप
रोक्षीकरोतितं। इत्युक्त्वोपायहीनस्यपुंसोदुर्ज्ञेयतेर्यते २५ यस्यब्रह्मचक्षत्रंचोभेभवतओदनः। मृत्युर्यस्योपसेचनंकइत्थावेदयत्रसः २६
इतीहविषयवाक्यं। उक्तसाधनहीनेनदुर्ज्ञेयइतिकीर्तनात्। उक्तोपायैरिहज्ञेयःपरमात्मेतिलक्ष्यते। अतोध्येयपरानेयंकिंतुज्ञेयपराश्रुतिः
२७ श्रुत्यर्थघटितसूत्रार्थस्तु। ब्रह्मक्षत्रंचयस्योभेओदनःसर्वमारकः। मृत्युर्यस्यघृतंसोऽस्यसर्वस्यात्ताजगत्पतिः २८ निर्विशेषयत्र
रूपआत्मारामइतीर्यते। निर्गुणत्वाविरतइत्युक्तैःसाधनैर्युतः। यथावेत्तीत्थमन्यस्तुकोविद्यात्साधनैर्विना २९ विषयीनाक्षविषयःस्व
त्वान्नस्यपरोक्षता। अवेद्योऽप्यपरोक्षोऽतःस्वप्रकाशोयमुच्यतइतिरिशाययथावेत्तिनतथान्यःसाधनविहीनोवेत्तीत्यर्थः २९ इतिश्रुतोक
ठोक्त्याकर्ताकश्चिन्निर्णीयते ३० तयोरन्यःपिप्पलंस्वाद्वत्तिजीवइतिश्रुतेः। अग्निरत्तादइतिचश्रुतेःसंशयउत्थितः ३१ द्वासुपर्णासयु
जासखायासमानंवृक्षंपरिषस्वजाते। तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीतीतिश्रुतिः। पिप्पलंकर्मफलंसुखदुःखे। अन्यई
शोनश्नन्नित्यमुक्तत्वात्कर्मफलभूतसुखदुःखेनतुभवन्नभिचाकशीतीतिनित्यतृप्तःसन्प्रकाशतेचिंस्वाद्भुतनिजशक्त्यासर्वजगत्कर्तापिसन्। ५२

अत्रजीवस्यपिप्पलात्तृत्वंनेशस्येतिकथ्यते। अथअग्निरत्तादेत्रपतिरत्त्यस्येशसमेनंददातीतिअग्निरत्तात्वेनप्रतिपाद्यतइतिकोत्रप्रतीयमा
नोत्तेतिसंशयउत्पन्नोभवति ३१ अत्रोच्यते। सोत्तात्रपरमात्मैवनजीवोग्निरपीहन। चराचरस्याद्यतयाप्रतीतेरत्ताहिश्रुतौ ३२ मृत्युविप्रक्षत्र
मुखसर्वात्तृत्वंनचानयोः। ३३ अनयोरग्निजीवयोः। मुखपदप्रभृत्यर्थकं ३३ अत्रत्यमोदनपदंसंहार्यपरमिष्यते। मृत्यूपसेकःसंहारेतास्य
र्यग्राहकोत्रहि। तेनप्रतीयमानोत्तासंहर्तेनीहसिध्यति ३४ दुर्विज्ञेयत्वलिंगेनानन्यसाधारणेनच। इहात्तापरमात्मैवनेजीवोनाग्निरिष्य
ते ३५ दुर्विज्ञेयत्वमवेद्यं ३५ प्रकरणाच्च २ नजायतेम्रियतेवाविपश्चिदितिहिश्रुतेः। ईशस्यैवप्रकरणादप्यत्तात्रमहेश्वरः ३६
इतिश्री॰सुब्रह्मसूत्रार्थद्युत्तेनप्रतीयमानस्यपरमात्मत्वेनज्ञेयत्वसाधकंद्विसूत्रमत्तृत्वाधिकरणंद्वितीयं २ गुहांप्रविष्टावात्मानौहि
तद्दर्शनात् १ प्रागुक्तोदनवाक्योर्ध्वंकठोपनिषदिश्रुतिः। ऋतंपिबंतावितितुश्रूयतेतत्रसंशयः। गुहांप्रविष्टोजीवेशौकिंवाजीवमतीइति
३७ ऋतंपिबंतौसुकृतस्यलोकेगुहांप्रविष्टौपरमेपरार्ध्ये। छायातपौब्रह्मविदोवदंतिपंचाग्नयोयेचत्रिणाचिकेताः। इतिकठश्रुतिः। ऋतमा
वश्यककर्मफलंपिबंतौभोक्तारौजीवेश्वरौछत्रिन्यायेनजीवस्यैवभोक्तृत्वेपिब्रह्मणोपिभोक्तृत्वव्यपदेशः। सुकृतस्यात्मतान्यासेनाची
र्णस्यपुण्यस्यपापस्यवाकार्यभूतेदेहरूपलोकेवर्तमानौ। परस्यार्धस्थानमर्हतीतिपरार्ध्येहृदयागुहाहृदयाच्छिद्ररूपाकाशरूपातां
प्रविश्यवर्तमानौ। छायातपवन्मिथोविरुद्धौकर्मफलभोक्तृत्वाभोक्तृत्वादिनेतिछायातपौइतिब्रह्मविदः। पंचाग्नयःकर्मिणः। त्रिर्नाचिकेता
नामाग्निर्यैश्चितस्तेत्रिणाचिकेताश्चवदंति ३७ अत्रोच्यते। गुहांप्रविष्टौजीवेशावेवेहश्रुतिसम्मतौ। यतस्तौचेतनात्मानावतस्तावेवसम्मतौ।

साजात्ता ३८ नजीवबुद्धौ अन्वेष्टैभावतस्त्वयोः। संख्यावतोः श्रुतो लोके साजात्यस्यैवदर्शनात् ३९ अन्वेष्टव्यो द्वितीयस्य गोरित्युक्ते प्रतीयते। अ
५२ अन्वेष्टव्यो द्वितीयो गोनाश्वान्यो वा प्रतीयते ४० विशेषणाच्च ३ अस्यामेवोपनिषदि सुजीवपरमात्मनोः। गन्तृगंतव्यभावेन मंतृमंतव्यभा
वतः। विशेषितत्वादप्यत्र जीवेशावेव संमतौ ४१ विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः। सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदं ४२ इति
स्तं विवृत्ता विति श्रुत्याग्रिमस्थया गन्तृगंतव्यभावेन शुद्धजीवपरमात्मनो क्रमेण विशेषितौ। गंतृत्वगंतव्यत्वरूपविशेषेणाश्रयत्वेन बोधितौ ४२
तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ४३ इति द्वितीयवल्ल्यामेवेत्तत
मिति श्रुतिपूर्वश्रुत्या मंतृमंतव्यभावेनतो विशेषितो। विशेषो विशेषणं तत्तु मिथो व्यावर्तकं। विशेषणाच्चेति सूत्रोक्षरार्थस्तु श्रुत्या उक्त विशे
षणविशिष्टत्वेन जीवपरात्मनोर्बोधितत्वादपीत्यर्थः ४३ तत्त्वंपदार्थौ जीवेशौ तद्दिसन्निहितावुभौ। ऐक्ये नसाक्षात्के तौ निःशोको जायते नरः। इ
ति श्रुतेरभिप्रायादियं ज्ञेयपरास्तुतिः ४४ नतु ध्येयपरे निःश्रेयः ४४ इति श्री॰ सूत्रार्थविवृतावितिमंत्रे गुहामविष्टत्वेन श्रुतयो र्बुद्धिजीवत्वरूप
त्वव्यावृत्ति फलक जीवेशत्व साधकं गुहाधिकरणं द्वितीयं तृतीयं ३ अंतर उपपत्तेः १ ध्येयः कं ब्रह्म खं ब्रह्मेत्युक्तो स्तिय उपक्रमे। सुखस्वरू
प आकाशः परमात्मा स एव हि ४५ एषोऽस्यंतः स्थितो ध्येयो ज्ञायते पुरुषोत्तमः। अत्रोपदिष्टधर्माणामस्मिन्नेवोपपत्तितः ४६ इदृक्च्छाया
थवा जीवोथवा स्याद्देवतार्कवि। नेत्यत्र प्रोक्तधर्माणामशाऽन्यानुपपत्तितः ४७ छांदोग्यगचतुर्थेध्यायेखंडेऽधारे दु १५के। श्रूयते स्मिरस्थपु ५३
रुषोपास्ति जाबालकीर्तिता ४८ विद्याफलब्रह्मलोकप्रापकेणार्चिरादिना। देवयानाख्यमार्गेणोपासहहोपास्तिरीर्यते ४९ छांदोग्यचतुर्थे

तत्वेन श्रुतो मनोमयादिशब्दः परमात्मपर एवेति स एवोपास्य इति। इतरेतराकांक्षयान्यतराकांक्षया वाक्येनैवाक्यसामर्थ्यमारभ्याधीतविषयं प्रकरणं।
अथाक्करी त्या सूत्रार्थसंग्राहककारिकाः॥ विशेषत्रानुभेदार्थ इह सूत्रे विवक्षितः ११ मनोमयत्वादियुत परब्रह्माभिधायिनः। प्रथमांतस्यशब्दस्य
छस्यान्यत्र न श्रुतेः। सत्यमनाज्जीववाचि शब्दाद्दर्थविभेदतः। १२ इति सूत्राक्षरार्थोपि तल्लक्ष्यार्थः प्रदर्श्यते। १३ मनोमयत्वादियुत परमात्माभि
धायिनः। प्रथमांतस्यशब्दस्य तुल्यप्रकरणश्रुतो १४ अन्यत्रदृष्टस्येहापि सत्यादीशाभिधायिनः। मनोमयत्वादिगुण ईशएवेह नेतरः १५ अ
अन्यत्र हिरण्मयः पुरुष इति मनोमयत्वादियुते शाभिधायि प्रथमांतशब्दस्येहापि मनोमयः प्राणशरीरो भारूप इत्यादरीशाभिधानयोग्यप्रथमांत सत्यसंकल्प
शब्दस्य सत्वान्मनोमयत्वादिगुणक ईश एवेहोपास्यो नेतरः शारीरो जीव उपास्य इति भावः १५ कर्मकर्तृव्यपदेशात्संभवो ब्रह्मजीवयोः। तद्भेदा
दिति प्रष्टुः स्मृतेश्चेत्याह तूत्तरं १६ स्मृतेश्च ६ आत्मुक्तिभेददर्शिन्याः श्रुतेः सत्वात्स्मृतेरपि। कर्मकर्तृव्यपदेशायुक्तो जीवेशयोरिह १७ ईशानः
सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपति रित्याद्याश्रुतिः। ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन्सर्वभूतानि यंत्रारू
ढानि मायये त्यादिस्मृतिश्च व्यावहारिकं नियम्यनियंतृत्वादिभावेन जीवेशभेदं दर्शयितः १७ अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्य
त्वादेवं व्योमवच्च ७ ननु नेशइहोपास्योत्तद्रूपाल्पायतनत्वतः। अणीयस्त्वोपदेशाच्च जीवोत्रोपास्य इष्यतां। इति चेन्न व्यापकस्याप्येवं ध्येयत्वसं
भवात् १८ सूचीपाशाद्यवच्छेदतश्छिद्राभ्यां यथा नभः। अर्भकौकोप्यणीयोपितथेशोव्यपदिश्यते १९ अणीयस्त्वार्भकौकस्त्वेएवं शब्दाद्विव
क्षिते। निचाय्यत्वमुपास्यत्वमर्भकत्वमिहाल्पता २० संभोगप्राप्तिरितिचेन्नवैशेष्यात् ८ ननु सर्वगतेशस्य शारीराद पृथक्त्वतः। दुःखादि

२ विशिष्टस्यैकदेशेवच्छेदः। १९।

५४ दिलोकान्वावर्तेवोचन्न तु सा कृत्स्नेन ब्रह्मविद्योक्तेति तुभ्यमुत्तरेरं वीघनाशिनीं सगुणब्रह्मविद्यां वक्ष्यामीति प्रतिज्ञायाक्षिपुरुषब्रह्मवि
द्यामुपदिश्य विद्याफलं ब्रह्मलोकप्रापकार्चिरादिगतिमुपदिदेश। तत्रेदं श्रूयते। य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृ
तमभयमेतद्ब्रह्मेति। तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिंचंति वर्त्मनी एव गच्छत्येतं संयद्वाम इत्याचक्षत एतं हि सर्वाणि वामान्यभि
संयंति। सर्वाण्येनं वामान्यभिसंयंति य एवं वेद। एष उ एव वामनीरेष हि सर्वाणि वामानि नयति सर्वाणि वामानि नयति य एवं वेद। एष उ एव भा
मनीरेष हि सर्वेषु लोकेषु भाति सर्वेषु लोकेषु भाति य एवं वेद। अथ यदु चैवास्मिञ्छव्यं कुर्वंति यदि च न। अर्चिषमेवाभिसंभवंत्यर्चिषो ऽह्न आ
८ पूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चंद्रमसं चंद्रमसो विद्युतं तत्पु
रुषोऽमानवः स एतान्ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तंते नावर्तंते इति। यः पूर्वमुपक्रम
ग्निभिः सुखात्मको हृदयस्थः आकाशे ब्रह्मतया ध्येयत्वेनोपदिष्टः स एषोऽक्षिणि पुरुषः परमात्मा दृश्यते ध्येयत्वेनास्मादेव वक्ष्यमा २
णवेदाक्षाप्यते। एषोऽक्षिस्थः पुरुष आत्मेति जगन्मात्रस्य वास्तवं स्वरूपमिति होवाच जाबालः स्वशिष्यमुपकोसलं स्मित्याह सर्वजना
[illegible]न्बोधयितुं श्रुतिः॥ प्रतिबिंबात्मकच्छायापुरुषादिसंशयं व्यावृत्त्यर्थमाह एतदमृतमभयमित्यादि ब्रह्मेत्यंतं। संयद्वाममेतं वाम
नीत्वभामनीत्वात्मकध्येयगुणानाह एतमित्यादिना तत्तद्गुणवत्वेन परमात्मध्यानेन ध्यातुस्तद्गुणाविर्भावलक्षणमवांतरफलं चा ५४
ह य एवं वेद य एवं वेद य एवं वेदेति त्रिरावृत्त्या वेदध्यायिनीत्यर्थः। महाफलं तु अर्चिषमेवाभिसंभवंतीत्यर्चिरादिना ब्रह्मलोकप्राप्तिर

त्रैव वक्ष्यते। तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिंचंति वर्त्मनी एव गच्छतीत्यस्यार्थस्तु। तत्तन्नत्रपुरुषावासभूतेऽक्षिणि यद्यपि सर्पिर्घृतं जलं वा आसिं
चंति जनास्तथापि वर्त्मनी एव पक्ष्मणी एव गच्छति यत्पक्ष्मद्वारा बहिरेव निःसरति न च पक्ष्मणा संबध्यते पद्मपत्रेणेवोदकं। स्थानस्याप्येतन्माहात्म्यं
किं पुनः स्थानिनोऽक्षिपुरुषस्य निरंजनत्वं वक्तव्यमित्याकूतं। संयंति प्राप्नुवंति वामानि शुभानि यस्मादीशात्स संयद्वामः। वामानि पुण्यफलानि प्रा
णिभ्यो नयति प्रापयतीति वामनीः। भामानि ज्ञानानि नयति विषयतां प्रापयति सर्वमिति भामनीः सर्वप्रकाशिक इत्यर्थः। अथ यदु चैवा
स्मिञ्छव्यं कुर्वंति यदि च नेत्यस्यार्थस्तु। यद्यदि अस्मिन्नुपासके मृते सति अस्य शव्यं शवसंबंधि और्ध्वदेहिकसंस्कारं कुर्वंति वा यदि चेन्न कुर्वं
ति बानसुत्राद्यस्तथापि यस्सुखस्वरूपमाकाशमक्षिस्थं संयद्वामो वामनी भामनीरित्येवं गुणमुपासते स आत्मप्राणब्रह्मविद्यासहितामग्नि
भिर्दत्तविद्यां च तेषामन्यत्कर्म भवतु वा मा वा सर्वथापि तेऽर्चिरभिमानिनीं देवतां प्रतिपद्यंते तदुत्क्रमेण ब्रह्मलोकमपुनरावर्तिनं गच्छंतीति
स्म फलितार्थः। देवयानपथोत्क्रमादिकं फलाध्याये अर्चिरादिपादे तृतीये सविस्तरं वक्ष्यते इति अत्र नोक्तं ५० स्थानादिव्यपदेशाच्च २ उ
पास्यत्वं चक्षुरादिस्थानस्यान्यत्रकीर्तनात्। हिरण्यश्मश्रुरित्यादौ रूपवत्त्वस्य चेरणात् ५१ तद्वदत्राप्यल्पत्ववच्चक्षुरंतस्त्वतोपपन्नितः। अक्ष्यंत
स्थः परात्मैव ध्येयोऽस्यानुपपत्तितः ५२ यश्चक्षुषि तिष्ठंश्चक्षुषोऽन्तरो यं चक्षुर्न वेद यस्य चक्षुः शरीरं यश्चक्षुरंतरो यमयत्येष त आत्मांतर्या
म्यमृत इति बृहदारण्यतृतीयाध्याय सप्तमांतर्यामिब्राह्मणाष्टादशखंडिकायां स्थानव्यपदेशः। य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हि
रण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्ण इति छांदोग्यप्रथमाध्याय षष्ठखंडे रूपव्यपदेशः ५२ सुखविशिष्टाभिधानादेव च ३

आदौ सुखविशिष्टस्य कथनात्सरमात्मनः॥ यएषइतिशब्दाभ्यां स एवात्रोपदिश्यते ५३ तारतम्येनैव कखयोर्वैशिष्ट्यस्यत्युपक्रमे॥ उक्ते
५५ श्रोन्द्रयतेसोत्रयआकाशःसुखात्मकः ५४ तेननात्रकृतनभ्छायापुरुषादिरिहेष्यते॥ कंखंब्रह्मेतिवाक्यस्थः कशब्दः सुखवाचकः ५५
किंच। अग्निविद्या आत्मविद्या चोक्तास्ति तत्फलाप्तये॥ आचार्यस्तु गतिं वक्तेत्युक्तत्वादत्र अग्निभिः। अग्नयस्तु कं खं विद्यैवास्मिण्युक्ते स
बसीयते ५६ अवसीयते विज्ञायते। विद्यामुदीर्याग्निभिरुक्ते शेषं वक्ता तवाचार्य इति। रितत्वाद्वक्तृभेदप्रयुक्त विद्याभेद इति न शंका का
र्यवक्तृभेदेपि विद्यां वदिष्यती स्वनुक्ता विद्याफलप्रापकगतिमात्रवक्ष्यमाणत्वोक्त्या वक्ष्यमाणविद्यायाः स्वोक्तविद्योपबृंहणमात्रत्वं न
तु विद्यान्तरत्वमिति ज्ञापनादिति भावः ५६ श्रुतोपनिषत्कस्य गत्यभिधानाच्च ४ अभ्यस्तेशोपास्तिकस्य पुंसो यान्यत्र कीर्तिता। आर्चि
रादिगतिस्तस्या अत्र संकीर्तनादपि। श्रुतो ह्यक्षिस्थपुरुषः परमात्मैव नेतरः ५७ अन्यत्रईशोपासनामात्रसाधारैःसगुणप्राप्तिसाधकार्चि
रादिदेवयानमार्गप्रतिपादकप्रश्नोत्तरस्थश्रुतावित्यर्थः। तथा च श्रुतिः। अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्यादित्यमभि ण
जायन्त एतद्वै प्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्न पुनरावर्तन्त इति। अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं। तत्र प्रया
ता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः। शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते। एकया यात्यनावृत्तिमन्ययावर्तते पुनः। इति गीतास्मृतिप्रमुख
स्मृतिषु च या अपुनरावर्तकगतिरुक्ता ब्रह्मविदः सैवेहाक्षिपुरुषविदोभिधीयमानादृश्यत इतीहाप्यक्षिपुरुषः परमात्मैवोपास्योनेन ५५
रछायापुरुषादिरित्यर्थः। श्रुत्यर्थस्तु। अथ सगुणब्रह्मोपासकादेहपातानन्तरं। तपो ब्रह्मचर्यश्रद्धाभिर्देहपातात्पूर्वं युक्ताः सन्तो विद्यया

ध्याये आदौ खंडत्रयातंजानश्रुतये पौत्रायणाय राज्ञे सयुग्वना रयिक्केण वायुप्राणाख्य संवर्गविद्योक्ता। ततः षड्भिः खंडैर्नवमान्तैः सत्य
कामाय जाबालाय हारिद्रुमतो गौतमेन स्वाशिष्याय यागुरुपरिचर्यया तुष्टैर्वृषभाग्निहंसमद्गु- पक्षिरूपेण प्रकटैरुपदिष्टा
सत्यकामायुषे वपुनश्च तुष्पादषोडशकला ब्रह्मविद्योक्ता। ततः षड्भिः खंडैः पंचदशखंडान्तैरुपकोसलाय कामलायनाय सत्य
कामेन जाबालेनाक्षिस्थपुरुषब्रह्मविद्योक्तास्ति। तत्रादौ सत्यकामाख्याचार्यस्यौताग्निपरिचर्यया तुष्टैस्त्रेताग्निभिरुपकोसला
य विद्याचतुष्टयमुक्तं। तत्र प्रथमं प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति संवर्गप्राणब्रह्मविद्या सुखापरनामक कगुणकाकाशब्रह्मविद्ये समु
च्चित्योपदिष्टे। ततस्त्रिभिरग्निभिः प्रत्येकं स्वस्वाग्निविद्यास्तिस्र उपदिष्टाः। तत्र गार्हपत्येनादित्यपुरुषाग्निविद्या १ अन्वाहार्यपच
नेन चंद्रपुरुषाग्निविद्या २ आहवनीयेन विद्युत्पुरुषाग्निविद्या ३ इति विद्यात्रयमुक्तं। तैस्त्रिभिरप्यग्निभिस्तुष्टैरुक्तं भो उपकोसल
अस्मद्विद्यास्तिस्र आत्मविद्या च प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति यदेव कं तदेव खं यदेव खं तदेव कमिति तुभ्यं प्रोक्ता इत्युक्ता अस्म
दुपदिष्टमेव सुखात्मकाकाशापरनामकं परमात्मानमक्षिस्थपुरुषं संयद्वाम इति वामनी इति भामनी इत्यादि गुणकत्वेनोपास्य तया
स्मदभीष्टं जाबालो वदिष्यतीत्याशयेनाचार्यस्तु ते विद्याफलप्रापकार्चिरादिगतिं वदिष्यतीत्येतावन्मात्रमुक्तं तदर्धिरेवयः। अ
थाचार्यः प्रवासादेत्य शिष्यं विद्योर्जितं दृष्ट्वा पप्रच्छ स तु अग्निभिरुक्तां विद्यां वक्तुमुपचक्रमे। ततो जाबालो गुरुः शिष्यं प्राह पृथिव्या

५६ दि दृष्टत्वामूर्तत्वादिधर्माणामिहोक्तिनः ६१ तत्राभिमान्यधिदेवादिर्नियंतासुरोथवा। अंतःप्रविष्टोयोगीवानांतर्यामितयेष्यते ६२ अंतर्या
मित्वपर्याप्तेरीशान्यस्मिन्नसंभवात्। ईशान्यांतर्यामिणात्रानवस्थाचग्रहभवेत् ६३ ईशादन्यस्यात्रांतर्यामिणोग्रहस्वीकारेतस्यान्यो
तर्यामीतस्याप्यन्यस्तस्याप्यन्यइत्यनवस्थाचस्यादितिभावस्तस्मात्सर्वांतर्यामीशएवनयोगभभावादिनांतःप्रविष्टादेवताविशेषो
योगीवांतर्यामी ६३ अधिदेवाधिभूताध्यात्मादिभिर्विविधश्रुते। अंतर्यामिब्राह्मणेंतर्यामीसंश्रुयतेस्फुटः॥ नियमावर्ण्मणो
वास्ययुज्यतेवेनियंतृता ६४ वर्ण्मशरीरं ६४ नचस्मार्तमतद्धर्माभिलापात् २ सांख्यैःस्मृतंप्रधानंतुनेहांतर्यामिशब्दभाक्॥ त
स्मिन्प्रधानेसंभाव्यादृष्टत्वस्याप्रकीर्तने। अप्यतद्धर्मद्रष्टृत्वादेरपीरणात् ६५ शारीरश्चोभयेपिहिभेदेनैनमधीयते ३ शा
रीरश्चेतनोजीवोयोगीद्रष्टादिरप्यसौ। नांतर्यामीसमस्तस्याव्यापकोपाधिगत्वतः ६६ किंचेनमुभयेजीवंकाण्वामाध्यंदिनाअपि।
अंतर्यामिनियम्यत्वाश्रुयताभ्यामधीयते। भेदेनांतर्यामिणोतोनांतर्यामीसइष्यते ६७ अधीयतेपठंति। अतःसचेतनोजीवःस
रूपायोगीनांतर्यामीष्यते। योविज्ञानेतिष्ठन्विज्ञानादंतरोयंविज्ञानंनवेदयस्यविज्ञानंशरीरंयोविज्ञानमंतरोयमयत्येषत आत्मा
तर्याम्यमृतइतिकाण्वाः स्वांतर्यामिब्राह्मणेंतर्याम्यधिष्ठानतयांतर्यामिनियम्यतपाचांतर्यामिणोभेदेनविज्ञानात्मशब्दवाच्य
मेनंजीवमुभयेकण्वमाध्यंदिनाःस्वस्वांतर्यामिब्राह्मणेपठंतीत्यर्थः ६७ भूताधिदेवादिष्वंतर्यामीहेशएवसीयते ६८ अवसीय ५६
तेनिश्चीयते ६८ इतिश्रीसूत्रिस्वन्नंतर्यामिशाह्नस्येशपरत्वसाधकमंतर्याम्यधिकरणंपंचमं ५ अदृश्यत्वादिगुणकोधर्मोक्तेः १
२ पठंति। यआत्मनितिष्ठन्नात्मनोंतरइत्यादिनामाध्यंदिनाःस्वांतर्यामिब्राह्मणेपठंतिएव

मुंडकाख्योपनिषदिश्रूयतेत्याद्यमुंडके। अदृश्यत्वादिधर्मोपलक्षितंनिर्विशेषकं ६९ भूतयोनिंयथाधीराःसाक्षात्कुर्वंतिविद्य
या। साविद्यापरमाज्ञेयानदन्यात्वपरेतिहि ७० इतिहिश्रूयतइतिपूर्वेणानुषंगः ७० अदृश्यत्वादिगुणकोभूतयोनिरिहेश्व
रः। नप्रधानेनशारीरःपरमात्मगुणोक्तितः ७१ यःसर्वज्ञःसर्वविद्यस्यज्ञानमयंतपः। तस्मादेतद्ब्रह्मनामरूपमन्नंचजायते।
इतिसर्वज्ञत्वमुख्यागुणाःसंतीरिताइह ७२ अथपरायया तदक्षरमधिगम्यतेयत्तदद्रेश्यमग्राह्यमगोत्रवर्णमचक्षुःश्रोत्रंतद
पाणिपादंनित्यंविभुंसर्वगतंसुसूक्ष्मंतदव्ययंयद्भूतयोनिंपरिपश्यंतिधीराः। इतीहविषयवाक्यं। यःसामान्यतःसर्वज्ञोविशेषतः
सर्ववित्यस्यज्ञानमयंस्वार्थमयद्व्यस्यस्वरूपविषयकंज्ञानंतपःतपतिदहत्यज्ञानमितितपः। तपदाहइतिधातुः। तस्मात्परमा
त्मनएतद्ब्रह्महिरण्यगर्भाख्यंकार्यब्रह्मनामसूक्ष्मभूतात्मकःशब्दःरूपंस्थूलभूतात्मकंरूपमाकारः। व्रीह्यादिरूपंसार्वभौतिकमन्नं
चजायतेउत्पद्यते ७२ जीवोपिधर्माधर्माभ्यांभूतजातोपसंग्रहात्। प्रतीयतेभूतयोनिस्तथाव्यक्तंचसर्जनात् ७३ अत्रभूतयो
निपदेनोक्तशरीरस्याशारीरप्रधानयोःप्रतीतेःपरमात्मनस्तुजन्माद्यस्ययतइतिभूतयोनित्वस्यस्पष्टमेवोक्तत्वात्कोत्रभूतयोनिरिति
संशयउक्तिस्तइतिभावः ७३ निमित्तवाचिशारीरपक्षेयोनिपदंतिह। ईशप्रधानपक्षेतुत्पादानपरमतं ७४ विशेषणभेदव्य
पदेशाभ्यांचनेतरौ २ अत्रोक्तोयोभूतयोनिःपरमात्मासनेतरौ। असाधारणदिव्यत्वामूर्तत्वादिविशेषणात् ७५ अक्षरात्स

रतः पर इत्यव्यक्ताद्विदोक्तितः ७६ दिव्योह्यमूर्तःपुरुषः सबाह्याभ्यंतरोह्यजः। अप्राणोह्यमनाः शुभ्रो ऽक्षरात्परतः परइति विशेषण
भेदव्यपदेशाभ्यां चनेतरौ नाव्याकृतजीवौ भूतयोनिशब्देन विवक्षितौ। किंतु भूतयोनिः परमात्मैवेह विवक्षित इति भावः। स्वकार्या
५८ पेक्षया परत उत्कृष्टात्स्वकार्यव्यापकत्वेनाक्षराद्व्याकृतात्परो भूतयोनिरित्यर्थः। दिव्यः स्वयंज्योतिः। अमूर्तो निरवयवः। सबाह्याभ्यं
तरः कल्पितकार्यकारणाभ्यां सहाधिष्ठानत्वेनातिष्ठतीत्यर्थः ७६ रूपोपन्यासाच्च २ सर्वात्मकस्वरूपस्य पौरुषस्यांतईरणात्।
अग्न्याद्युक्तो भूतयोनिः परमात्मैवनेतरौ ७७ आदावुपक्रमे उक्त आद्युक्तः। नेतरौ नाव्याकृतजीवौ ७७ पुरुषएवेदं विश्वं कर्म
तपो ब्रह्म परामृतं। एतद्यो वेद निहितं गुहायां सोऽविद्याग्रंथिं विकिरतीह सोम्य। इत्यंते शौनकं प्राह पौरुषं रूपमं गिराः ७८
इदं विश्वं सर्वं कर्म कर्मसाध्यं तपो ज्ञानं च पुरुषएव एतत्सर्वात्मकं परमुत्कृष्टं चलटमृतम विनश्वरं च हृदयगुहायां पुरिशेते जीवपरात्म
पुरुषेणेति पुरुषरूपं ब्रह्मस्वात्मत्वेन यो वेद सोऽविद्याग्रंथिं अहंममतामूलं लिंगधारी इह विकिरति ज्ञानेन निवर्तयति। अधिष्ठानसाक्षा
त्कारनिवर्त्यत्वादनाद्यध्यस्ताज्ञानस्येति भावः ७८ इति श्री सु० अदृश्यत्वादिगुणक भूतयोन्यात्मकाक्षरस्य परमात्मत्वसाध
कं त्रिसूत्रमदृश्यत्वाधिकरणं षष्ठं ६ वैश्वानरः साधारणशब्दविशेषात् १ छांदोग्यप्रथमाध्यायैकादशखंडमादिं कृ ५८
त्वाचतुर्दशैः खंडैर्विद्या वैश्वानराभिधा। वैश्वानराख्यपरमात्मोपासनपरेरिता ७९ तेजोरूपोग्निः १ रथवाजाठराग्निः २ शरीरस्थत्व।

सं सगुणोपासनयात्मानमन्विष्य परब्रह्मानुध्यायोत्तरेण यथा देवयानसंज्ञकेनोत्तरायणमार्गेण। अर्चिरादिपर्वभिरुपलक्षितेनादित्यं प्राप्य
तद्द्वारा कार्यब्रह्म ब्रह्मलोकस्थमभिजायंते प्राप्नुवंतीत्यर्थः। कार्यब्रह्मविशिनष्टि एतद्वै प्राणानामायतनमिति। एतत्कार्यब्रह्म समष्ट्य
भिमानि हिरण्यगर्भस्वरूपं समस्तप्राणानामिंद्रियाणामायतनं स्थानं। कार्यब्रह्मणो वास्तवस्वरूपमाह एतत् अमृतं १ अभयं २ ए
तत्परायणं स्थावास्थिति प्रयुक्त जगत्स्थितिहेतु ३। एतस्माद्ब्रह्मलोकात्तत्र ब्रह्मविद्यया प्राप्ताः पुनः संसारे नावर्तते न परावर्तते। किंतु
कल्पांते ब्रह्मणा सह विदेहकैवल्यं प्राप्नुवंति। ये तु केवलतप आद्युत्कर्षेणाश्वमेधादिक्रतुना पंचाग्न्यादिविद्यया केवलया ब्रह्मवि
द्याव्यतिरिक्तया ब्रह्मलोकमुत्तरायणमार्गेण प्राप्ता अपि आकल्पांतं तत्रस्थाः संतः कल्पांतरे यथायोग्यं पुनः संसरंतीति फ
लितोर्थः ५७ अनवस्थितेरसंभवाच्च नेतरः ५ छायासंपादकस्याक्षिणि बिंबभूतस्य सर्वदा। असन्निधानाद्दृश्ये न छाया सार्व
कालिकी ५८ अमृतत्वादिधर्माणामत्रोक्तानां छायापुरुषादावसंभवाच्च न छायापुरुषादिरक्षिण्यध्येयः। किंतु तत्र परमात्मैव गुणा
द्याध्येय इत्यर्थः ५९ इति श्री सु० पंचसूत्रं छांदोग्यगतोपकोसलविद्याप्रश्नाक्षिपुरुषस्य संयद्वामत्व वामनीत्व भामनीत्वगुणकत्वेन
ध्येयपरमात्मत्वसाधकमंतराधिकरणं चतुर्थं ४ अंतर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् १ बृहदारण्यकगततृतीयाध्यायइरि
तं। अस्त्यंतर्यामि संज्ञं वै समनं ब्राह्मणं पृथु ६० तत्राधिदैवादिष्वंतर्यामीयः श्रूयते ह्यसौ। अंतर्यामितया ध्येयः परमात्मैव नेतरः। अ
४ अमृतत्वादिधर्माणां छायादावप्यसंभवात्। न छायापुरुषो नापिरव्यादिर्ध्येय इष्यते। किंत्वक्षिस्थः परात्मैव ध्येयोत्रोक्तगुणैर्युतः ५९

अग्न्याख्यादेवतावात्रजीवात्मा ४ वेशा ५ एववा। कोवावैश्वानरः पंचस्वेतेष्विति हि संशयः ७० वैश्वानरपदं प्रोक्तमत्रिब्रयसमं त्विह। कोनआ
त्मेत्यात्मपदं त्विहजीवेशयोः समं ७१ आत्मवैश्वानरपदे इतिसाधारणे इह। अप्यत्रसाधारणयोः शब्दयोरेतयोः सतोः ७२ द्युमूर्धत्वादि
कादीशविशेषात्कुसमंजसात्। वैश्वानरपदार्थोत्र परमात्मैववेनतरे ७३ अत्रविषयवाक्यं। यस्त्वेतमेवंप्रादेशमात्रमभिविमानमात्मानं
वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति तस्य हवा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्रा
णः पृथग्वर्त्मात्मा संदेहो बहुलो वस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोन्वाहार्यपचन आस्यमा
हवनीयः। तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयमित्यादि तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयंते य एतदेवं विद्वा
नग्निहोत्रं जुहोतीत्यादि इत्यग्निहोत्रमुपासत इत्यंतं ७३ एतदुपासनप्रकारस्त्विष्टं दर्शितोस्त्यन्यत्राभियुक्तैः। तथाहि। समस्तवै
श्वानरचिंतनं तु यस्त्वेतमित्यादिगिरा प्रवक्ति। षण्णामृषीणांसमुपागतानां वैश्वानरोपासनतत्ववेदी ७४ अयंसुतेजस्त्वगुणा द्यु
मूर्धा स्याद्विश्वरूपत्वगुणार्कचक्षुः। प्राणास्तु नानागतियुक्तवायुः स्याद्देहमध्यं बहुलत्ववत्वं ७५ आपोधनत्वाख्यगुणाः परस्य
वस्तिः प्रतिष्ठाख्यगुणाधरित्री। पादावुरो वेदिरितीयतेस्य लोमानि बर्हिर्हृदि गार्हपत्यः ७६ वैश्वानराख्यस्य हि दक्षिणाग्निर्मनो
निरुक्तः परमेश्वरस्य। वक्त्रं तु स्याहवनीय उक्त इतीशरूपं परिचिंतनीयं ७७ वस्तिर्मूत्रस्थानं प्रतिष्ठाख्यगुणा धरित्री पादौ ७७

नियम्यभावेन समस्तजीवा अस्येति यद्वात्मतयास्य जीवाः। इति श्रुतौ विश्वनरोयमुक्तो विश्वो नरो वा सकलात्मकत्वात् ७८ नरेपरे
५८ पूर्वपदस्य दैर्घ्ये विश्वानरः स्वार्थिकतद्धिताद्वा। वैश्वानरं तं भजते बुधो यः स सर्वलोकादिग्भोगभाक्स्यात् ७९ समासेऽस्य पविधि
रु नरे संज्ञायामिति पाणिनिसूत्रेण नरे उत्तरपदे पूर्वपदस्य दीर्घः विश्वानर एव वैश्वानरः स्वार्थिकः प्रज्ञादिभ्यश्चेत्यण् ७९ इद
यादिप्रदेशोपमीयते व्यज्यते यतः। किंच मिमीते ह्यपरोक्षरूपं जानातीयः सोऽभिविमान उक्तः। अप्याभिमुख्येन विमीयते तद्ब्रह्मेति यः
सोऽभिविमान उक्तः ८० भूरादयो लोकपदेरिताः स्युर्मूर्धा निदेहास्युरिहात्मशब्दात्। जीवाः स्युरन्नं भवतीह भोग्यमितीह लोकादिप
दार्थ उक्तः ८१ इति। इति अभियुक्तैरुक्तमिति पूर्वेणानुषंगः। इति उक्तप्रकारेण इत्थमस्त्वेनमेवं प्रादेशमात्रमभिविमानमात्मानं वै
श्वानरमुपास्ते इति श्रुतौ लोकादिपदार्था उक्ता इत्यर्थः। आत्मशब्दात् आत्मशब्देन जीवाः स्युः। जीवा उक्ता भवति। श्रुतौ संदेहो बहुल इ
त्यस्य संदेहो देहमध्यमभागो बहुलो बहुलत्वगुणविशिष्ट आकाश इति भावः ८१ तत्रैवं श्रूयते ह्याख्या। विद्याप्तेरीतिबोधि
का। प्राचीनशालोऽथ सत्ययज्ञेन्द्रद्युम्नकावुभौ। जनो बुडिल इत्येवं पंचैते परमर्षयः ८२ श्रुताध्ययनवृत्ताढ्या महाशालानिवासिनः।
अकुर्वन् को न आत्मा किं ब्रह्मेति तु विचारणां ८३ महत्यां शालायां गार्हस्थ्याश्रमे निवसंति गार्हस्थ्यमाश्रित्य वसंतीति महाशाला
निवासिन इति श्रुतिस्थमहाशालपदतात्पर्यमुक्तं। को न आत्मा किं ब्रह्मेति। नोऽस्माकं उपास्यतयाभिप्रेतः आत्मा सर्वात्मा वैश्वानरः कः ५८
द्युलोकाद्यात्मनाध्यातवैश्वानरेषु कः कतमोऽयं वा किमुपाधिकपरब्रह्मस्वरूपः किं द्युलोकाद्यन्यतमव्यष्ट्युपाधिकब्रह्मरूप आहो

पागतः ९९ यः सांगवेदाधीत्यर्थं गुरोरंतिकमिच्छति। तस्योपनयनं कृत्वा वेदमध्यापयेद्गुरुः १०० योन्यत्राधीतविद्यः सन्कांचिद्विद्यां समिच्छति।
५९ अकृत्वैवोपनयनं विद्यां तस्यैव वदेदिति १ तादृशोनुपनीयैव मुनीनेतन्नृपोब्रवीत्। प्राचीनशालमाहादावुपमन्योः सुतं नृपः २ तारकादृशो।
नू तादृशो मुनीविदेकदेशाल्लविद्यामात्रेच्छू नृपः केकेयः प्राहयावदेषामियं विद्या परिचिता स्तितदग्निमविद्याशेषं वस्यामीस्याशयेन पृष्टवानि
तिभावः २ कं त्वं वैश्वानरमात्मानमुपास्स इति सोब्रवीत्। द्युलोकमेव भगवो राजन्निस्युपमन्युजः ३ इत्युक्तवंतं प्राचीनशालं प्रत्याहश्वपतिः।
यं त्वं वैश्वानरात्मैकदेशं वैश्वानरस्त्विति। ध्यायस्य यापि मूर्धेष सुतेजस्त्वगुणः प्रभोः ४ एष द्युलोकः ४ एकदेशं ध्यायतोपि प्रोक्ते मत्स्यफ
लं श्रुतौ। तथापि सर्वांगोपेतध्यानाभावाद्दिवक्षितः। नैवास्य पुनरावृत्तिमार्गो निबाधयोर्ह्यति ५ अघयो रागाग्निसंचितपुण्यपापो न निवृत्तिः
समग्रांगध्यानाभावात् ५ सम्यक्कृतं त्वया सोम्य यस्मात्त्वमामुपागतः। नागमिष्यो यदि त्वं मां व्यपतिष्यच्छिरस्तव ६ मूर्धत्वाद्द्युलोकस्य ध्या
तस्यास्ति हि यत्फलं। नश्वरत्वं तस्य यत्तन्मूर्धपातो विवक्षितः ७ सुतेजा वैश्वानरत्वेन ध्यातस्य द्युलोकस्य श्रुतौ यद्दर्शितं [illegible]। औपमन्यवकं
त्वमात्मानमुपास्से इति। दिवमेव भगवो राजन्निति होवाच एष वै सुतेजा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्तव सुतं प्रसुतमासुतं कुले आत्मा
दृश्यते ऽत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते मूर्धा त्वेष आत्मन इति हो
वाच मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्य इति। इति सुतं प्रसुतमासुतमहीनं गौ०रात्रि प्रयुक्तसमृद्धान्नभोजनं पुत्रपौत्रादिप्रियपदार्थप्रयुक्त
चिरकालसुखानुभवरूपं तस्य जन्यत्वाद्यदाकदाचिन्नाशो यः समूर्धभूतद्युलोकपातः स एव मूर्धपात इति। समग्रांगवैश्वानरध्यानिनु देवयानमा ५९
फलं

क२ । ति१
गेण कार्यं ब्रह्मलोकं प्राप्य तत्र दिव्यभोगान्भुक्त्वांते ब्रह्मणा सह विदेहकैवल्यरूपा पुनरावृत्तिः शाश्वती भावः। सुतं सोमाभिषवं ज्योतिष्टोमादिए
कसुत्याकं प्रोक्तं कर्म सोमाभिषवबद्धं तत्प्रकृतिभूतं प्रसुतं तत्तोपि प्रकृष्टं ज्योतिष्टोमप्रकृतिमष्ट्यामादि। आसुतं ततोप्यत्यंतं प्रकृष्टमहीनद्वादशा
हादिरूपं तव कुले दृश्यते। तत्कुलीना अत्यंतं कर्मिणो दृश्यंत इत्यर्थः ७ समस्तांगोपेत वैश्वानर ध्यानजं फलं। पूर्वोक्तरघनाद्यादितदक्षय्यमि
तीगितं ८ इति इंगितं श्रुतितात्पर्यं ८ वास्तवो मूर्धपातादिर्यदीष्टः स्यात्तदा खलु। पृथग्ध्यानवतां तेषां संप्रश्नोत्तरमेव वै। मूर्धाद्यभावात्संप्र
श्नरूपं तत्कथं नृप ९ एवमेवोत्तरो ग्रंथो व्याख्येयो वैविचक्षणैः। तस्माद्वैश्वानरव्यस्तध्याननिंदामुखेन तु। समस्तध्यानकरणे तात्पर्यमवगम्यते
१० एवमेवोत्तरो ग्रंथोपसंहारोश्वपतिर्नृपः। द्यौ१रादित्यो२ वायु३ रभ्र४ मापः५ पृथ्वी६ ति तु क्रमात् ११ अभ्रमाकाशः ११ ध्येयांशा ये श्रुतास्ते
पुरु तेजस्त्वादिगुणादिकाः मूर्धत्वाद्यंगतास्ते व्यस्तध्याने निनिंदवै १२ मूर्धपातस्तथांधत्वं प्राणानामुत्क्रमस्तथा। शरीरशीर्णता वस्तिभेदश्चरणशो
षणं १२ पृथक्पृथक्ध्यानयोग इति दोषाः प्रदर्शिताः। तत उक्तद्युलोकादेरुक्तवैश्वानरांगतां १४ ततः समस्तावयवोपेतस्य परमात्मनः। वैश्वान
न रस्य सर्वात्मरूपस्योपास्तिमुक्तवान् १५ तत्प्रकारस्तु प्रारंभे प्रदर्शित एवास्तीति नेह पुनरुच्यते १५ स्मर्यमाणमनुमानं स्यादिति २ किंच। पर
मात्मपरत्वे त्वं वैश्वानरपदस्य वै। स्मृत्याप्रोक्तं द्युमूर्धादि स्वरूपमनुमापकं १६ भवतीति स्मृतेरस्या मूलभूताश्रुताविह। द्युमूर्धकादिमद्रूपेण प्रयुक्त
परमात्मगं। वैश्वानरपदबोध्यं नाग्निजीवपरं हि तद्वै १७ द्युमूर्धत्वार्कचक्षुष्ट्व पृथिवीपादकत्वाकाशनाभित्ववदव्ययवत्स्वरमात्म रूपप्रतिपादक
नीशस्य वराजस्मृतिमूलभूतप्रकृतश्रुतौ द्युमूर्धादिमत्त्वरूपेण प्रयुक्तं वैश्वानरपदं परमात्मपरं बोध्यं स्मृतेः श्रुतिमूलकत्वेनैव प्रामाण्यादिति भावः।
सैषा स्मृतिशब्दोक्तानुमापक लिंगपरः १७ यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः। सूर्यश्चक्षुर्दिशः श्रोत्रं तस्मै लोकात्मने नमः १८

इतीश्वररूपं श्रुतिगं प्राह भीष्मस्तवस्मृतिः ।१९ अस्याः स्मृतेर्दिवमेव भगवो राजन्निति होवाच । मूर्धा त्वेष आत्मान एष वै सुतेजा आत्मा वैश्वान
रोयं त्वमात्मानमुपास्से तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूप इत्यादिरूपश्रुतिरेव मूलं । मूलभूतदृष्टश्रुतेः सं
६० भवत्यामदृष्टमूलांतरकल्पनेस्मान्याय्यत्वात् । तथा चास्या महाभारतस्थभीष्मोक्तस्तवराजस्मृतेः परमेश्वरस्यैव द्युमूर्धादिस्वरूपस्यो
क्तत्वात्तन्मूलभूतश्रुतौ द्युमूर्धादिमत्स्वरूपे प्रयुज्यमानं यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्त इति वैश्वानरपदं
परमात्मपरमेवेति तात्पर्यं १९ शब्दादिभ्योऽन्तःप्रतिष्ठानाच्चेति चेन्न तथा दृष्ट्युपदेशादसंभवात्पुरुषमपि चैनमधीयते ३ द्युपृथिव्यं
तरिक्षेषु व्याप्तत्वे केभांतुरूपतः । द्युपृथिव्यादिसंबंधो मंत्राद्ग्नेः प्रतीयते २० यो भानुना पृथिवीं द्यामुतेमामाततान रोदसी अंतरिक्ष
मिति मंत्रात्प्रतीयते आततान व्याप्तवान् । द्यावापृथिव्यात्मके रोदसी अंतरिक्षं तन्मध्यगतं च योऽग्निर्भानुस्वरूपेणाततान २० अग्नौ
वैश्वानरपदं श्रुतं वाजसनेयके । ब्राह्मणेऽग्निरहस्याख्ये तथाप्यस्तु न तथा २१ तत्र वैश्वानरपदं तथाग्निरहस्यब्राह्मणवत् अत्राप्यग्निपरमः
स्त्विति शंका । स चाग्निरिह प्राणाहुत्याधारतालिंगाज्जाठरोस्तु वैश्वानर इति भावः । स एषोऽग्निर्वैश्वानरो यत्पुरुषः स यो हैतमेवमग्निं वैश्वानरं पुरु
षविधं पुरुषेऽन्तः प्रतिष्ठितं वेद इत्यग्निरहस्यब्राह्मणं २१ सूत्रार्थस्तु । वैश्वानरपदं नेशपरं किंतु दराग्निगं । रूढ्या वह्निपराद्वैश्वानरशब्दादि
हश्रुतात् २२ शारीरावयवत्वेनाप्यग्नित्रयनिरूपणात् । प्राणाहुत्याधारत्वोक्तेरपि वैश्वानरस्य हि । पुरुषेऽन्तः प्रतिष्ठानश्रवणाच्चेति चेन्न
त २२ हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः । तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहु ६०
यात्प्राणाय स्वाहेति प्राणस्तृप्यतीत्यादि प्रकरणं छांदोग्ये । जाबालश्रुतिरपि इमां वैश्वानरविद्यां मत्वा । पूर्वोतिथिभ्योश्नीयात् । यथा वे

श्चिद्द्युलोकादिषट्कसमष्ट्युपाधिकब्रह्मरूपोऽथवा सुतेजस्त्वादिगुणकद्युमूर्धाद्यवयवोपाधिकं तदुपहितब्रह्मरूपं इत्यादिसंदेहनिवर्तक
विचारं परस्परं चक्रुरित्यर्थः ८३ द्यौरादित्यो वायुरिति यदस्माभिः पृथक्पृथक् । वैश्वानराख्यसर्वात्मब्रह्मबुध्या नमोस्तिहि ८४ परस्प
रं हि संपृष्टे वैमत्यं दृश्यते तिति । तन्मध्ये केन रूपेण ध्यातव्यमिति संशयः ८५ समेतास्तु जनास्सर्वे ऽनाप्नुवंतो विनिश्चयं । तादृशाल्लोप
दृष्टारमुद्दालकमुनिं तदा ८६ संपादयामासुरथाभ्याजग्मुस्तं मुनिं सतु । नाहं तन्निर्णयं वेद्मि दर्शयिष्ये हितादृशं ८७ इत्यालोच्या
ब्रवीत्तान्वै केकयोऽश्वपतिर्नृपः । तादृशोस्तीति तं सर्वे गच्छाम इति ते गताः ८८ समागतान्मुनीस्तान्विज्ञाय स तु भूमिपः । प्रा
गेव दर्शनात्तूर्णं बहिर्दत्ताभ्यपूजयत् ८९ अथ निद्रां स्वजन्मांतर्दर्शनार्थं समागताः । विनयेन जगादेदं गृह्यतां भो धनं त्विति
९० प्रत्याख्यातः स मुनिभिश्चिंतयामास पार्थिवः । मयि दोषधिया नेमे गृह्णंतीति विशंकितः ९१ स्वस्य निर्दुष्टतां तेभ्यः ख्यापय
न्निदमब्रवीत् । न मे स्तेनो जनपदे न कदर्यो न मद्यपः ९२ नानाहिताग्निर्नाविद्वान्न स्वैरी स्वैरिणी न च । एवमुक्तेपि नागृह्णंस्तदा राजा
प्यचिंतयत् ९३ मद्धनं स्वल्पमिति ते न गृह्णंतीति चिंतयन् । तेभ्यो बहुधनं देयमिति बुध्याब्रवीन्मुनीन् ९४ क्रतुभिर्यक्ष्यमाणोस्मि यद
ग त्विग्भ्यः पृथक्पृथक् । दास्यामि तावद्युष्मभ्यमपि दास्ये पृथक्पृथक् ९५ तावद्भवंतस्तिष्ठंतु पश्यंतु मम चाध्वरं । इत्युक्तास्ते नृपमोचु
र्येनार्थेन यं प्रति ९६ आगच्छेत्तं वदेत्सैव सतस्तस्य प्रयोजनं । अतो नाद्य वयं प्राप्ता धनस्य तु जिघृक्षया ९७ किंतु वैश्वानरात्मानं त्वतु
ज्ञानासि संप्रति । तमेव नो ब्रूहि राजन्नित्युक्तः प्राह तान्नृपः ९८ प्रतिवक्तास्मि वः प्रातरित्युक्तास्ते हि जग्मुस्ते श्वः पूर्वाह्णे समिद्धस्ता राजानं समु

ख्याख्येदेवताविशेषेपितत्संभवइत्युक्तरस्तन्नेवदृश्यते।किंचपुरुषमपिचैनमधीयते।वाजसनेयिनोग्निरहस्यब्राह्मणइतिशेषः।सएषोग्नि
६१ वैश्वानरोयत्पुरुषःसयोहैतमेवमग्निंवैश्वानरंपुरुषविधंपुरुषेन्तःप्रतिष्ठितंवेदइति।यत्तदयःपुरुषःपूर्णःसएषोग्निर्वैश्वानरः।अंग
यतिक्रियाफलंप्रापयतीत्यग्निर्वैश्वानराख्यःपरमात्मेत्यर्थः।शेषंस्पष्टं।परमात्मनःसर्वात्मकत्वात्पुरुषत्वंपुरुषविधत्वंपुरुषां
तःप्रतिष्ठितत्वंचेत्यादिसर्वमप्युपपद्यते।नजाठरादेःपरिच्छिन्नत्वादितिभावः।पुरुषविधमपिचैनमधीयतइत्यपिक्वचित्पाठोऽर्थस्तू
भयपाठेपितुल्यएवविवक्षितः।नेदंतत्सर्वमभिप्रेत्याह।जाठराग्निस्वरूपस्योदर्ग्नेर्वाजगत्वतः।द्युमूर्धादिस्वरूपेणोपास्तेरत्नोपदेशा
त्। २४ वैश्वानरेजाठरेतुद्युमूर्धत्वाद्यसंभवात्।वैश्वानरोजाठरोनोपास्योऽविश्रमहेश्वरः २५ वैश्वानराग्निस्वरूपेणजाठराग्निस्वरूप तु
स्यपरमात्मनोथवावैश्वानराग्निरूपजाठराग्रोपासनीकेवाजगत्वतःपरमेश्वरस्यद्युमूर्धादिभावेनात्रोपदेशसंभवान्नजाठरोवैश्वानरउपा
स्यःकिंतूक्तरीत्यापरमात्मैवोपास्यइत्यर्थः।२५ किंच।एनंवैश्वानरंपूर्णंपुरुषाकारमप्यधीयते।अधीयतेसर्वशाखायांविप्रावाजसनेयि
नः।नैतत्सर्वंजाठरेग्नोपरिच्छिन्नेहियुज्यते २६ अधीयतेपठंति।पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यमित्यादाविवपूर्णार्थकत्वंपुरुषप
दस्येहापिबोध्यं २६ अतएवनदेवताभूतंच ४ उक्तेभ्यएवहेतुभ्योनभूताग्निर्देवता।वैश्वानरस्तयोरेकदेशित्वान्नाखि
लात्मता २७ उक्तंचान्यत्राप्यभियुक्तैः।द्युमूर्धत्वादिसकलाघदाहःसमस्तलोकाश्रयभोगभाक्त्वं।आत्मादिशब्दश्चनयुज्यते
त्र्यस्यतोनवैश्वानरतानयोःस्यादिति २८ साक्षादप्यविरोधंजैमिनिः ५ जाठराग्नेर्विनाप्यत्रप्रतीकोपाधिकल्पनां।साक्षादपि ६१

महेशस्योपासनायाःपरिग्रहे।विरोधाभावमाचार्योमन्यतेखलुजैमिनिः २९ पूर्वापरालोचनमोपासनापरमात्मनः।उच्यतेनेति
निष्कर्षजालेसतितुनत्रहि ३० छांदोग्यवाजसनेयशाखयोर्यच्छ्रुतंतुत।अग्निवैश्वानरपदेयोगशक्त्येशबोधके।भविष्यतइतीह
र्षेरभिप्रायोहिजैमिनेः ३१ इहत्रयेरितिपदविभागः।सएषोग्निर्वैश्वानरोयत्पुरुषःसयोहैतमेवमग्निंवैश्वानरंपुरुषविधंपुरुषे
न्तःप्रतिष्ठितंवेदेतिवाजसनेयकब्राह्मणं।यस्त्वेतमेवंप्रादेशमात्रमभिविमानमात्मानंवैश्वानरमुपास्तेइतिछांदोग्यं।वैश्वानर
क पदस्ययोगित्वंनियम्यभावेनसमस्तजीवाइतिसार्धश्लोकेनदर्शितमेवप्राक्।वाजसनेयकवैश्वानरविद्यास्थवैश्वानरपदसा
मानाधिकरण्येनश्रुताग्निपदस्ययुत्पत्तिस्तुअभियुक्तोक्तिनिदर्शनेनप्रदर्श्यते।सर्वात्मिकत्वसर्वाघनाशकत्वादिब्रह्मलिंगमपि
दर्शितमेवास्ति ३१ तदुक्तमभियुक्तैः।क्रियाफलंप्रापयतीतिचाग्निर्गत्यर्थकःस्यादगिधातुरेषः।अग्नित्वमस्यैवमहेश्वर
स्यस्यादग्रणीत्वादुपपन्नमत्र ३२ अंगयतीत्यग्निरितिव्युत्पत्तेःक्रियाफलीभूतायुजन्मप्रापकइतिअग्रणीशब्दसमानार्थक
त्वादिकंयोगरूढ्यानिरुक्तादौसमर्थितमस्ति।तिनात्सर्वेणात्रनिरुक्तिःकृतेतिज्ञेयं ३२ उपासकस्यातिथिभोजनात्प्राग्यथा
क्तविध्यागतयाविधिःस्यात्।प्राणाग्निहोत्रस्यतदर्थमग्निनेत्रादिकंकल्पितमीश्वरस्य ३३ अभिव्यक्तेरित्याश्मरथ्यः ६
वैश्वानराख्यपरमात्मनोऽपरिमितस्यच।उक्तंप्रादेशमात्रत्वमभिव्यक्तिनिमित्तकं।इत्याश्मरथ्यआचार्योमन्यतेस्मिन्नुपासने
३४ तदुक्तमभियुक्तैः।उपासनास्थानहृदादिकेपुहरेःप्रतीतिःक्वचिदाश्मरथ्यः।युक्तंभवेद्व्यक्तरूपाकरस्यप्रादेशमात्रत्वमितिप्रभा

६२ येऽइति ३५ अत्र प्रादेशमात्रमुपलक्षणं तेनात्रोपास्यो भगवान्प्रादेशमात्रस्तन्न्यूनस्तदधिको वा ध्यातुः प्रतीयते नैवमेवेति नियम इति भावः।
क्वचिदुद्भवाद्यभिव्यक्तिस्थानेषु हरेः प्रादेशमात्रत्वेनापि प्रतीतेरिहापि कदाचित्तथा प्रस्येतुं संभाव्य इति प्रादेशमात्र उक्त इत्याशयः ३५
अनुस्मृतेर्बादरिः ७ इतीत्यनुवर्तते। उक्तं प्रादेशमात्रत्वमनुस्मृतिनिमित्तकं। इति बादरिराचार्यो मन्यतेऽस्मिन्नुपासने ३६ प्रादेशमा
त्रेहृदये तद्ध्येय इतीश्वरः। प्रादेशमात्र एवेहानुस्मर्तव्यो न चाधिकः। नापि प्रादेशतो न्यूनो ध्येय इत्याह बादरिः ३७ संपत्तेरिति जैमिनि
स्तथाहि दर्शयति ८ मूर्धादिचुबुकान्तेषु ध्यातुः प्रादेशमात्रके। ध्यानात्प्रादेशमात्रत्वमथो संपद्यते विभोः ३८ इत्याह जैमिनिर्व्याचा
र्यो दर्शयति श्रुत्यंतरं तथा। यथा जैमिनिना प्रोक्तं तथा दर्शयति श्रुतिः ३९ तदुक्तमभियुक्तैः। द्युलोकमुख्यावयवान्स्वावयवस्य संपादयत्
रूपमस्तकादेः।। प्रादेशमात्रात्मकतां विभोश्च ब्रूते हरेर्वाजसनेयिवाक्यं ४० इति। प्रादेशमात्रमिव ह वै देवाः सुविदिता अभिसंपन्ना
स्तथा तु व एतान्वक्ष्यामि यथा प्रादेशमात्रमेवाभिसंपादयिष्यामीति स होवाच मूर्धानमुपदिशन्नेष वा अतिष्ठा वैश्वानर इति १ चक्षु
षी उपदिशन्नुवाचैष वै सुतेजा वैश्वानर इति २ नासिके उपदिशन्नुवाचैष वै पृथग्वर्त्मा वैश्वानर इति ३ मुख्यमाकाशमुपदिशन्नुवाचैष वहु
लो वैश्वानर इति ४ मुख्या अप उपदिशन्नुवाचैष वै रयिर्वैश्वानर इति ५ चुबुकमुपदिशन्नुवाचैष वै प्रतिष्ठा वैश्वानर इति ६ वाजसने
य्यग्निरहस्यब्राह्मणवाक्यं। पूर्वं वैश्वानरोपासकादेशा प्रादेशमात्रमपि प्रादेशमात्रत्वेन संपत्त्या प्रादेशमात्रमिव सम्यग्विदितवंतो दे
वास्तमेव देशं मत्त्वेन संपन्नाः प्राप्तवन्तो ह वै। तथापि वो युष्मभ्यमेनानवयवान्वक्ष्यामि यथा प्रादेशमात्रपरिमाणं वैश्वानरं संपाद ६२
यिष्यामीति प्राचीनशालप्रभृतिषण्मुनीनश्वपतिः कैकेयो राजोवाच स्वकीयमूर्धाद्यवयवान्करांगुल्या वैश्वानरत्वेनाभिनयन्मूर्ध्

स्वयमकृत्वाग्निहोत्रं परस्य जुहुयादेवं तदिद्व्यतिथिभोजनमप्राथम्यं निंदित्वास्यामिनो वैश्वानरविद्यावतो भोजनं प्रथमं प्रापयंती प्राणाग्निहो
त्रे आदरं बोधयंती वैश्वानरस्य प्राणाहुत्याधारतां बोधयतीति। यथास्वाग्निहोत्रमकृत्वा परस्याग्निहोत्रहोमप्रकरणं निषिद्धमेवं स्वप्राणा
ग्निहोत्रमकृत्वातिथिभ्यः स्वस्मात्प्रथममन्नं न देयमित्यर्थः। पुरुषेऽन्तः प्रतिष्ठितं वेदेत्यग्निरहस्यब्राह्मणं तु वैश्वानरस्य पुरुषान्तः प्रतिष्ठा
नं वदति। एतत्सर्वं वैश्वानरस्य जाठराग्नित्वे समंजसं भवति निःशेषपरत्वे इति पूर्वपक्षयिता नेति समाधत्ते। न त्वदाक्षिप्तं न घटते व
क्ष्यमाणहेतुभ्य इत्यर्थः २३ यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्त इत्यत्र वाजसनेयाग्निरहस्यब्राह्मणाधि
करात्कथनया सिद्धान्तपक्षत्रयं। वैश्वानरशब्दवाच्यः परमात्मा द्युमूर्धादिमत्त्वेनोपास्य इति मुख्यः कल्पः १ वैश्वानरपदपर्यायजाठराग्नि
स्वरूपोपाधिकः परमात्मा द्युमूर्धादिमत्त्वेनोपास्यो मनोमयः प्राणशरीरो भारूप इति वदतीति द्वितीयः २ वैश्वानराभिधजाठराग्निरूपप्रतीके
द्युमूर्धाद्युपाधिकपरमात्मरूपेणोपास्यं मनो ब्रह्मेत्युपासीतेत्यादिवदिति तृतीयः कल्पः ३ तत्राद्यो द्वितीयतृतीयपक्षाभ्यां तथादृष्ट्युपदे
शादिति। तथा जाठरवह्निरूपेण दृष्टः परमात्मोपासना या उपदेशात्तदात्मानं वैश्वानरमुपास्त इति वाक्येनोक्तत्वान्न वैश्वानरो जाठराग्नि
रेव द्युमूर्धादिमत्त्वेनोपास्य इत्यर्थः। अहान तथादृष्ट्युपदेशात्तथास्मिञ्जाठराग्निरूपप्रतीके परमेश्वरदृष्टेरुपदेशान्न जाठरो वैश्वान
र एव मुख्यत्वेनोपास्य इत्यर्थः। ननु वैश्वानरपदरूढिबलाद्दग्निविशेषो जाठर एवोपास्योऽस्त्विति शंकायां प्राह असंभवादिति मूर्धे
व सुतेजा इत्यादेः सुतेजस्त्वगुणकद्युमूर्धादिमत्त्वस्य जाठरे असंभवादिति भावः। न च पंचभूतांतर्गतवह्निसामान्येवायमिह वस्तोम

तस्मात्। युक्तं भवेद्दोषविनाशकत्वं नास्याभ्रुवोरित्यवधार्यमत्र ५१ विशेषजिज्ञासुमुनेश्च तत्र संधिस्तयोः स्थानमिति स्म वक्ति। संधिस्तयो
६३ रेषविचिंतनीयः संधिर्द्युलोकस्य परस्य चेति ५२ तद्वैश्वानरवाक्यश्रीमुहूर्तोपास्तितत्परं। न जाठरादिकार्थं हि वैश्वानरपदादिकं। इति ५२
जाबालोपनिषच्छ्रुतिस्तु। अथ हैनमत्रिः पप्रच्छ याज्ञवल्क्यं य एषोऽनंतोऽव्यक्त आत्मा तं कथमहं विजानीयामिति। स होवाच याज्ञवल्क्यः
सोऽविमुक्त उपास्यो य एषोऽनंतोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित इति। सोऽविमुक्तः कस्मिन्प्रतिष्ठित इति। वरणायां नास्यां च मध्ये प्र
ष्ठितइति तिं का वै वरणा का वै नासीति सर्वानिंद्रियकृतान्दोषान्वारयतीति तेन वरणा भवतीति सर्वानिंद्रियकृतान्पापान्नाशयतीति तेन नासी भवतीति।।
कतमच्चास्य स्थानं भवतीति। भ्रुवोर्घ्राणस्य च यः संधिः स एष द्यौर्लोकस्य परस्य च संधिर्भवतीति। एतद्वै संधिं संध्यां ब्रह्मविद उपासि स्य
तइति। अस्यायमर्थस्तु। अविमुक्तः संसारी जीवः। वरणा भ्रुकुट्यौ। नासी नासिका। भ्रुघ्राणसंधिर्द्युलोकब्रह्मलोकयोः संधिस्तत्र
योऽविमुक्तो जीवः संसारी ध्याता तस्मिन्ननंतोऽव्यक्त आत्मा परमेश्वरः प्रत्यक्त्वेन ध्येय इत्यर्थः ५२ तत्तस्मादादित उक्तयुक्तिसं
घरूपात्कारणाच्छांदोग्योक्ते वैश्वानरवाक्ये वैश्वानरशब्दवाच्यपरमात्मोपास्तिपरं। तु जाठराग्न्य १ त्रिसामान्य २ देवताविग्रहा
ग्नि ३ जीवात्म ४ परमिति भावः ५३ इति श्री० छांदोग्यगतवैश्वानरोपास्तिगतवैश्वानरपदस्य परमात्मपरत्वसाधकं नवमं
त्वं वैश्वानराधिकरणं समाप्तं ७ इति श्री० सुसमन्वयाध्याये अस्पष्टब्रह्मलिंगकवाक्यनामद्वात्रिंशत्सूत्रात्मकः ससप्ताधिक
रणो द्वितीयः पादः २ तृतीये तु ज्ञेयमात्रपरवाक्यसमन्वयः। प्रायेण कथ्यते पादे तेन तन्नामकस्तु सः ५४ तेन ज्ञेयमात्रपरवाक्य ६३
समन्वयकथनेन स तृतीयपादस्तन्नामको ज्ञेयब्रह्मपरवाक्यनामक इत्यर्थः ५४ द्युभ्वाद्यायतनं स्वशब्दात् १ यस्मिन्द्यौः पृथि

वी चांतरिक्षमोतं मनः सह प्राणैश्च सर्वैः। तमेवैकं जानथ आत्मानमन्या वाचो विमुंचथामृतस्यैष सेतुः। इत्याथर्वणगे तुर्यमुंडके पठ्यते। द्यु
भ्वाद्याधारभूतं ब्रह्म सत्यं ब्रह्मैव नेतरत् ५५ जिज्ञासुनासएवैकः स्वात्मा ज्ञेय इतीर्यते। स्वशब्दात्परपर्यादात्मशब्दादिह श्रुतात् ५६
यस्मिन्द्युभ्वादिकं प्रोतं स एवैकः स्वात्मेति ज्ञेय इत्येतादृशदात्मशब्दादिह श्रुतात् द्युभ्वाधारतयात्र प्रतीयमानं प्रत्यग्रूपं ब्रह्मैवमोक्तं न प्रधा
नं न वा विराट् स्थानवेंद्रियाधिष्ठातृदेवा न वा हिरण्यगर्भरूप आदिजीव इहोक्त इत्यर्थः। तादृशोऽत्र तमेवैकं जानथ आत्मानमिति तत्सदेवकारज्जा
नथपदसमभिव्याहृत आत्मशब्दः ५६ तदुक्तमभियुक्तैः। यस्मिन्विराट्सेंद्रियदेवसूत्रमव्याकृतं कल्पितमप्रमेये। तमेव जानीथ विसृज्य
सर्वं सर्वाश्रयं प्रत्यगभिन्नमेकं ५७ विराट् सेंद्रियास्तद्देवाश्च सूत्रं हिरण्यगर्भश्चेतेषां द्वंद्वैकवद्भावः। अव्याकृतं मूलप्रकृतिः कल्पितमनाद्यध्य
स्तं ५७ विमुंचथानात्मवाचां सिवाणी। विमोकपूर्वात्मकबोध एषः। संसारसिंधोः परपारमुक्तेः संपादकः स्यादिति वक्ति वेदः ५८ अमृ
तस्यैष सेतुरिति वाक्यस्यार्थमाह। एषोऽन्या वाचो विमुंचथ। तमेवैकं जानथेत्युक्तो वाणी विमोकपूर्वकात्मसाक्षात्कारः। सेतुरिव से
तुः परपारकारकः ५८ यः समस्ताश्रयः सेतुरुच्यते तस्य धारणात्।। ज्ञानं वा यस्य सेतुः स्यान्मुक्तिदः सोऽस्म्यहं हरिः ५९ सेतुपदं
उक्तज्ञानार्थकं वा सर्वाधिष्ठानपरमात्मपरं वा तदनुरोधेनेयमितिपदं व्याख्येयमिति फलितोऽर्थः ५९ पूर्वपक्षमाशयमाह। द्युभ्वंत
रिक्षग्रहणाद्विराट्स्याद्धिरण्यगर्भस्तु मनःपदोक्तः। प्राणास्त्वधिष्ठानसुराभवेयुरव्याकृतं वक्ति च कार एषः इति ६० मुक्तोपसृप्य
व्यपदेशात्। २ किंच। निवृत्ताविषयके मुक्तेः प्राप्यब्रह्मणि एव हि। निरूपितत्वाद्ब्रह्म सैव द्युभ्वाद्यायतनं त्विह ६१ इह चतुर्थपंचममुंड

६४ योर्निरूपितत्वात्।निवृत्ताविद्याएवनिरस्ताविद्यकाःस्वार्थेकः ६१ भिद्यतेहृदयग्रंथिरित्युक्तंतुर्यमुंडके।तथाविद्वान्नामरूपाद्विमुक्त
इतिपंचमे ६२ भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः।क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे। इतिद्युभ्वाद्यायतनंज्ञेयत्वेनोक्ता
तुर्यमुंडकएवोक्तं।पंचमेतु।यथानद्यःस्यंदमानाःसमुद्रेऽस्तंगच्छंति नामरूपेविहाय।तथाविद्वान्नामरूपाद्विमुक्तःपरात्परंपुरुषमु
पैतिदिव्यं।सयोहवैतत्परमंब्रह्मवेदब्रह्मैवभवतिनास्याब्रह्मवित्कुलेभवतितरतिशोकंतरतिपाप्मानंगुहाग्रंथिभ्योविमुक्तोऽमृतो
भवतिइति।मुक्तोपसृप्यत्वव्यपदेशाद्धित्यपिकचित्सूत्रपाठोदृश्यते।तदामुक्तोपसृप्यब्रह्मभावोपदेशादित्यर्थः।उदाहरणंत
त्त्वमेव।श्रुत्यंतरेपिब्रह्मणएवमुक्तोपसृप्यत्वंप्रसिद्धं।यदासर्वेप्रमुच्यंतेकामायेस्यहृदिस्थिताः।अथमर्त्योऽमृतोभवत्यत्रब्र
ह्मसमश्नुतेइति।अपिचवाग्विमोकपूर्वकविज्ञेयत्वंब्रह्मणएवलिंगंतथान्यत्रदृष्टत्वात्तमेवधीरोविज्ञायप्रज्ञांकुर्वीतब्राह्मणः।नानुध्या
द्बहूंछब्दान्वाचोविग्लापनंहितत्इति।धीरोऽत्रनित्यानित्यविवेकज्ञानवान्।विज्ञायमाप्यात्तत्त्वंपदार्थंतयासद्वितीयमप्यद्वियत्वेनप
रमात्मानमेवज्ञात्वाप्रज्ञांअभेदलक्षणवाक्यार्थज्ञानापरपर्यायाखंडवाक्यार्थज्ञानंकुर्वीततत्संपादयेन्मुमुक्षुर्नंतुतत्पदार्थयोर्वोधमा
त्रेणसंदध्यातिज्ञानायग्रंथेनेतिभावः।ततःप्रारब्धक्षयेनिर्विकल्पकज्ञानंवस्तुभेदेनभवतीतितात्पर्यं ६२ नानुमानमतच्छब्दात् ३ द्युभ्वा
द्यायतनंनात्रप्रधानसांख्यकल्पितं।प्रधानबोधकस्यात्रशब्दस्याभावतःश्रुतौ ६३ सर्वज्ञइत्यादिशब्दाःप्रस्तुतेतद्विरोधिनः।अस्मि
न्प्रकरणेसंतीत्यत्रब्रह्मैवसम्मतं ६४ यःसर्वज्ञःसर्वविद्यस्यैषमहिमाभुवि।दिव्येब्रह्मपुरेह्येषव्योम्न्यात्माप्रतिष्ठितइत्यादयश्चेतनेशासाधारण ६४

दिभावेनमुनीन्दर्शयन्नुवाचेत्यर्थः ४० तिष्ठत्यतीत्येतिश्रुवेदतिप्राग्योरीशमूर्धाममस्तकःस्यात्।ध्यात्रास्मत्रश्वरमूर्धदृष्टिः
कार्येत्युपाचाख्यपानिर्मुनीस्तान् ४१ एवंसकीयावयवतदंगंविचिंतनीयंतदुपासकेन।सूर्यःसुतेजाःपरमेशचक्षुस्तत्त्वेनीयनेत्रेपरिचिंत
नीयं ४२ प्राणोस्यनासेमुखसंस्थितं खंश्रीदेवसंदेहनभोविभाव्यं।मुखस्थलालापरमेशवस्तिस्थितोदकंस्याच्चुबुकंतुभूमिः ४२
भू देहमध्यभागीनवकुलत्वगुणविशिष्टबकुलाख्याकाशंदेष्टिमुखावच्छिन्नाकाशेकार्यंतिश्रीदेवसंदेहनभोविभाव्यमित्यस्यार्थः।शेषंस्प
ष्टं।वस्तिस्थरयिपदवाच्यापांदृष्टिर्लीलासुकार्येत्यर्थः।चुबुकंमुखाधस्तनोष्ठफलकं ४३ दिवस्त्वतिष्ठात्वगुणंवदंतिरविःसुतेजस्त्वगु
णंतथान्ये।तथापिशाखांतरधर्मयोगाद्विश्वानरोपासनमेकमेव ४४ नचाल्पवैषम्यवशेनभिन्नंशाखाभिदावासुगुणव्यवस्था।प्रादे
शमात्रश्रुतितोल्यसत्वाच्छागाविसंदेपिनभिद्यतेनतद्इति ४५ वाजसनेयकेछांदोग्यक्षाप्यनुक्तोतिष्ठात्वगुणोदिव्युक्तः।छांदोग्ये
तुदिविसुतेजस्त्वगुणउक्तः।वाजसनेयकेतुसूर्यस्तेजस्त्वगुणउक्तः।विश्वरूपत्वगुणस्तुक्वापिनोक्तः।शेषंस्पष्टं ४५ आमनंतिचैनमस्मि छांदोग्य एवसूर्यउक्तः
न् ९ प्रादेशपरिमाणेस्मिन्मूर्धचुबुकांतयोः।अंतरालेवदंत्येनंजाबालाःपरमेश्वरं।अतोपियुक्तंप्रादेशमात्रत्वंपरमात्मनः ४६ त
दुक्तमभियुक्तैः।मूर्धादिकंयच्चुबुकांतमुक्तंतदंतरालेकथयंतिचैनं।अतोपिसर्वेशपरिग्रहेपिप्रादेशमात्रश्रुतिरर्थवतास्यात् ४७ यो
नंतआत्माखलुदुर्विभाव्यःकथंविज्ञानेतमहंमहेशं।इत्यत्रिपृष्टःप्रजगौमुनीद्रःपरेश्वरस्तिष्ठतिसोऽविमुक्ते ४८ कामादिदोषोघनि
बद्धजीवेविमेरस्यकल्प्यस्वयमात्मनीति।जीवस्थलप्राह्यसयाज्ञवल्क्योनासाभ्रुवोर्मध्यइहेतिपृष्टः ४९ सर्वेंद्रियोत्थाघनिवारकत्वाद्धु
ग्मरूपावरणामतास्यात्।दोषांश्चनान्नाशयतीतिनासीत्येवंजगौतेपरिपृच्छतेस्मे ५० जीवाश्रयद्वारतईश्वरस्यस्थानंहिनासीवरणोच

नचेदेवमिहाकस्मात्तदुक्तयोः किंप्रयोजनं। अस्याएवाशयं स्पष्टं श्रुतिर्वक्त्येतदग्रिमा। समाने वृक्षे पुरुष इत्यादिपदसंयुता ७४ समाने
६५ वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इति द्वा सुपर्णेत्यग्रिमश्रुतिः।
स्य अनीशया अविद्ययाऽस्य यो महिमानं देशकालवस्तुपरिच्छेदशून्यमहत्त्वं सर्वात्मभावरूपमिति एति प्राप्नोतीत्यर्थः। अत एव वीतशोको
भवति ब्राह्मण आत्मत्वेन साक्षात्कारवान्। इतीयत्रैगुणा भावः संज्ञापूर्वकविधेरनित्यादिति बोध्यः ७४ किंच द्युभ्वाद्यायतनं ब्रह्म
स्वात्मत्वविदितत्वतः। तद्ब्रह्माहमिति ज्ञातुमात्मशब्दः प्रयुज्यते ७५ तमेवैकं जानथ आत्मानमित्यत्रेति शेषः। तथा च तद्ब्रह्माहमि
ति ज्ञात्वा सर्वबंधैः प्रमुच्यत इति कैवल्याद्युपनिषदेकवाक्यतयाऽहमर्थक एवात्मशब्दः समंजसः ७५ द्युभ्वाद्यायतनं जीवो यदि चात्र विवक्षि द्या
तः। तदा जानथ आत्मानमिति आत्मपदं हि यत् ७६ तद्व्यर्थं भवति द्युभ्वाद्याश्रयोक्त्यै तद्विधः। जीवो विज्ञात एवेति नात्मशब्दो न सार्थकः
७७ विराडादिः कर्तृत्वभोक्तृत्वादिना परिच्छिन्नो जीवो यदि द्युभ्वाद्यायतनत्वेनात्र विवक्षितः स्यात्तर्हि स जीवः कर्तृत्वादिपरिच्छिन्नत्वेनात्रो
क्तश्रुत्या द्युभ्वाद्यायतनत्वेन च ज्ञात एव भवतीति परिच्छिन्नजीवस्वरूपज्ञानार्थं विवक्षितपदार्थस्वरूपवाचकत्वेनांगीकृतोऽप्यात्मशब्दोऽत्र
प्रयुज्यमानो व्यर्थ एव भवति ज्ञातज्ञाने प्रयोजनाभावात्। अस्मिन्पक्षे आत्मशब्दस्यात्राहमर्थकत्वमपि न घटते परिच्छिन्नस्य वीरा
डादिजीवस्य स्वरूपज्ञानवतः पुरुषस्य यत्स्वरूपं तस्य विराडादिपरिच्छिन्नजीवस्वरूपत्वासंभवात्। ज्ञातृज्ञेययो रूपाध्यविवक्षयावि
देकरसत्वविवक्षायां तु द्युभ्वाद्यायतनत्वोपलक्षितं ब्रह्मैव भवतीति सिद्धांतपक्ष एव स्थिरो भवतीति द्युभ्वाद्यायतनं जीव इति पूर्वपक्षे ६५

ध्यानमेव न संभवतीति द्युभ्वाद्यायतनपदस्य जीवपरत्वपक्षे उक्तरीत्यात्मशब्दो व्यर्थ एव भवतीति भावः ७७ द्युभ्वाद्यायतनस्यैतद्ब्रह्म
गत्वे स सार्थकः। आत्मशब्दो ह्यहं ब्रह्मेत्यपूर्वज्ञानसाधकः ७८ हि यस्मात्कारणादहं ब्रह्मेत्यपूर्वज्ञानैक आत्मशब्दो भवति अतः स अन
आत्मशब्दोऽहमर्थकः सन्सार्थकः सफल इत्यर्थः। अयमर्थः प्रकरणाच्छ्रुतिपूर्वस्थत्वाद्दर्शनेनानुक्तार्थसमुच्चयद्योतकेन चकारेण
लभ्यत इति बोध्यं ७८ तदुक्तमभियुक्तैः। स्वभाववाच्यत्वेन वात्मशब्दस्तद्वस्तुकीर्तिर्वचनतत्स्वभावे। सिद्धे प्रयोगोऽस्य निरर्थकः स्या
त्तस्मात्परेशः सकलाश्रयोऽत्र ७९ अत्राहमर्थक एवात्मशब्दः सन्द्युभ्वाद्यायतनस्य परमेश्वरत्व एव घटते। आत्मशब्दस्यात न
स्वदार्थस्वरूपपरत्वेन तत्स्वरूपस्यात्रोक्तरीत्यैव प्रसिद्धिसंभवात्तज्ज्ञापनार्थमात्मशब्दप्रयोगात्र व्यर्थोऽपि भवतीति अहमर्थ
कस्यैव प्रयोगो न्याय्य इति भावः ७९ न चात्र विश्वायतनत्वकीर्तनान्नानारसत्वं परिशंकनीयं। अत्रैव कारैकपदद्वयेन विज्ञेय
मेतत्खलु निर्विशेषं ८० यथैव पिंडो लवणस्य चांतर्बहिर्विजातीयरसेन शून्यः। सर्वोऽपि वेदैकरसस्तथात्मा चिदेकरूपो भवतीति
वेदः ८१ आहेति शेषः ८१ अनेकरसत्वाभावे सर्वं खल्विदं ब्रह्मेति श्रुतिः कुत्र बाधं वक्तीत्याशंकायामारोपितसर्वबाधासामाना
धिकरणवक्तीत्याह। सर्वं ब्रह्मेति बाधायां सामानाधिकरण्ययोगीः। सर्वांदिशो नात्मनोऽत्र विधाने सर्वबाधनं ८२ आरोपितप्रतियो
गिकाभावस्याधिकारणात्मकत्वान्नाद्वैतहानिरिति भावः ८२ अथ परा यया तदक्षरमधिगम्यते। यत्तदद्रेश्यमग्राह्यमगोत्र
मवर्णमचक्षुःश्रोत्रं तदपाणिपादं। नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यंति धीराः। इति विषयवाक्यवता
पं

अदृश्यत्वादिगुणको धर्मोक्तेरिति प्रागुक्तादृश्यत्वाधिकरणेनैव द्युभ्वाद्यायतनाधिकरणस्य गतार्थत्वे द्युभ्वाधिकरणमदृश्यत्वाधिक
६६ रणोक्तार्थप्रपंचार्थमित्याह। अदृश्यत्वाद्युक्तनयेन सिद्धं द्युभ्वादिवाग्ब्रह्मपरत्वमेतत्। तद्वाक्यमध्यपठनात्तथापि तत्प्रपंचार्थमस्यं
नयः स्यात् ८३ द्युभ्वादिवाक्ये यस्मिन्द्यौः पृथिवीति वाक्यस्य ब्रह्मपरत्वमेतत् द्युभ्वाधिकरणोक्तमदृश्यत्वाधिकरणेनैव सिद्धं तद्वा
क्यमध्यपठनात्। एकविज्ञानेन सर्वविज्ञानप्रश्नसमाधानपरस्य तस्यादृश्यत्वादिगुणोपलक्षितभूतयोनित्वोपलक्षितनिर्धर्म
कज्ञेयब्रह्मप्रतिपादकमुंडकवाक्यस्य मध्यकोटौ द्युभ्वाद्युपलक्षितनिर्विशेषज्ञेयब्रह्मप्रतिपादकद्युभ्वादिवाक्यस्य तत्रैव मुंडको
पनिषदि पाठात्। अदृश्यत्वाधिकरणोक्ततद्धर्मोक्त्यादियुक्तिभिर्द्युभ्वादिवाक्यस्यापि निर्विशेषज्ञेयब्रह्मपरत्वनिर्णयसंभवान्नि
र्धर्मज्ञेयब्रह्मपरत्वनिर्णयार्थं द्युभ्वाधिकरणं नारंभणीयं। एवं सति पुनर्द्युभ्वाधिकरणारंभोऽदृश्यत्वाधिकरणाभिप्रेतयुक्ति
प्रपंचार्थ इति भावः ८३ भूतयोनिवाक्येनैव द्युभ्वादिवाक्यार्थस्य गतार्थत्वे द्युभ्वादिवाक्यस्य पौनरुक्त्यशंकापरिहाराय द्युभ्वा
दिवाक्यस्य भूतयोनिवाक्यार्थप्रपंचकतामाह। तद्भूतयोनेः परमात्मभावः स्फुटीकृतः सेतुपदार्थकीर्त्या ८४ तस्य भूतयोनेः।
कीर्तिरुक्तिः ८४ अमृतस्यैष सेतुरिति वाक्यस्य परमात्मभावस्फुटीकरणप्रकारमाह। स्यात्सारवत्त्वेन गुणेन सेतुर्विधारकत्वेन
भवेत्तथात्मा। तस्मादिदं ब्रह्मणि तन्मितो वा प्रवर्तते सेतुपदं गुणेन ८५ तन्मितिस्तस्य भूयोनेर्मितिर्ज्ञाद्धकं प्रमाणं चरमो निर्विकि
ल्पक एषोऽमृतस्याज्ञाननिवृत्त्युपलक्षितब्रह्मस्वरूपमोक्षस्य साक्षात्कारो ब्रह्मात्मकमोक्षविषयकं निर्विकल्पकज्ञानं सेतुप ६६

धर्मार्थश्चतुर्थमुंडक एव श्रूयंत इति भावः ६४ प्राणभृच्च ४ विराड्ढिरण्यगर्भौ वा अथर्वेंद्रियदेवताः। यस्त्वेषन्यतमो जीवः सोपि द्युभ्वाश्रयोत्र न।
तदसाधारण्यात्त्रशब्दस्याभावतः खलु ६५ खलुपदमवधारणे। तद्बोधकासाधारणशब्दाभावादेवेत्यर्थः। हिरण्यगर्भविराडिति पदविभागः।
प्राणभृच्छब्दो जीवापरपर्यायः। नातच्छब्दादिति पूर्वसूत्रादनुवर्तते। तेनोक्तोऽर्थः संपद्यते ६५ भेदव्यपदेशात् ५ तमेवैकं जानथेति ज्ञातृ
ज्ञेयतया भेदोः। जीवद्युभ्वाद्याश्रययोर्भेदोक्तेश्चासुभृन्न तत् ६६ असुभृज्जीवस्तद्द्युभ्वाद्यायतनं न जीवस्य मुमुक्षुत्वेन ज्ञातृत्वात्तस्मारिज्ञेषा
ज्ञेयं द्युभ्वाद्यायतनं ब्रह्मेति सिध्यति ६६ प्रकरणाच्च ६ कस्मिन्नु भगवो विज्ञाते विज्ञातं सर्वमिदं भवेत्। इत्याद्य मुंडके ज्ञेयब्रह्मोपक्रमदर्श
स नात् ६७ द्युभ्वाद्यायतनस्यात्र ज्ञेयस्यैकथनादिदं। ब्रह्मप्रकरणत्वस्मादपि द्युभ्वाश्रयं ब्रह्म तत् ६८ द्युभुवावंतरिक्षमनः प्राणानामुप
लक्षणं। द्युभ्वाश्रयं द्युभ्वाद्यायतनं ब्रह्म तद्ब्रह्मेत्यर्थः ६८ स्थित्यदनाभ्यां च ७ आभ्यां स्थित्यदनाभ्यां च द्युभ्वाद्यायतनं तु यत् ६ उपक्रां
तं पूर्वमिह तद्ब्रह्मैवासुभृन्न तत् ६९ तथा हि। अन्यद्युभ्वाद्यायतनमध्यत्रस्यैव श्रूयते श्रुतिः। द्वा सुपर्णेति तत्रोक्तौ क्षेत्रज्ञपरमेश्वरौ।
औदासीन्यस्थितिस्वोपार्जितस्वादनोक्तितः। ७० द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं
स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति। इति श्रुतिर्द्युभ्वाद्यायतनं प्रकृत्य श्रूयते ७० निर्दिश्येते स्थित्यदने यत्र सर्वेषां जीवयोः। तेन स्थि
त्यदने पूर्वं द्युभ्वाद्यायतनं तु यत्। उक्तं तस्य ब्रह्मत्वं तथा सार्थके स्तो न चान्यथा ७१ यदा द्युभ्वाद्यायतनं वक्ति स्यात्मत्वयाद्वहत्। तदा
विशेषो भवति सेत्र ज्ञो ब्रह्मतां गतः ७२ इति वक्तुमहत्येयं द्वा सुपर्णेति वै श्रुतिः। वक्तृपन्न स्थित्यदने शोकहारककारके ७३

ये
तच्छब्दवाच्यत्वेरितं ९२ शब्देप्रतीके ब्रह्मेतिय उपास्ते सवै पुमान्।शब्दवाच्यंयावदस्तितावद्धेत्यखिलंजगत् ९३ इत्युक्तोनारदस्तेनपुनःप
६७ प्रच्छतंमुनिं।सर्ववेदकृवेदाख्यशब्दाच्छ्रेष्ठतरंहिकिं ९४ इत्ययमस्तीत्येवमुक्तःप्राह वागिंद्रियंत्विति।वागभिव्यक्तशब्देनसर्वंविज्ञायतेः
त्विति ९५ वाचोधिकतरंपृष्ठेप्राहश्रेष्ठंमनस्त्विति।मुष्टिर्व्याप्नोत्यामलकेयथावाबदरीफले।यथाविपरीतककफलेतथावाङ्मनसीमनः ९६
यथामुष्टिगतमामलकादिमुष्ट्येकदेशस्थत्वान्मुष्टिव्याप्यतयाअवरंमुष्टिःश्रेष्ठोव्यापकःतथावागिंद्रियतदुच्चार्यशब्दोमननपूर्वकमनसस्व
विषयाभिव्यंजकावितिमनोव्याप्यौ।अतस्ताभ्यांश्रेष्ठंमनइत्यर्थः।एवमुत्तरत्रापिसंकल्पादिप्राणांतेषुनामादितःपंचदशसु १५ कार्यका
रणतयानिमित्तनैमित्तिकभावेनवाश्रेष्ठ्ययथासंभवंबोध्यं ९६ संकल्प ४ चित्त ५ ध्यानानि ६ विज्ञानं ७ चबलतोबलं ८।अन्नं ९ आप १० स्त
तस्तेज ११ आकाश १२ स्मरणं १३ ततः।ततआशातुततः प्राण १५ श्रेष्ठमाहोत्तरोत्तरं ९७ प्राणचेष्टाधीनचेष्टाआशांता अखिलाइति।स
र्वक्रियाकारकादिप्राणांतभूतमेवहि ९८ अतोयःप्राणसंज्ञेशकारीदुष्टःसउच्यते।प्राणहीनशवादेर्यो दाहकोदोषभाक्कन ९९
अतोदाताग्रहीत्रादिःसर्वोपिप्राणएवहि।अतःप्राणोत्कर्षवादीयोतिवादीसउच्यते ६०० श्रेष्ठ्यस्यासंतोप्राणश्रेष्ठ्यवादावधिर्मतः।अ त
तस्तथावादिनंतंवक्ष्यपरतिवाद्यसि।इत्युक्तोप्यतिवाद्यस्मीत्यंगीकुर्यादसंशयः १ एवंसनत्कुमारेणसंप्रोक्तोनारदोमुनिः।मत्वाश्रेष्ठ्यप्रा
णमतोन्यंश्रेष्ठंनैवपृष्टवान् २ सनत्कुमारोभगवाञ्ज्ञातवान्नारदाशयं।विकारिष्वधिकःप्रोक्तेस्मिन्प्राणस्तथाप्ययम्।।विकारिणंप्राणमेव
स्वात्मानंज्ञातवानिति ३ नारदइतिज्ञातवानितिनारदाशयंसनत्कुमारोज्ञातवान् माभूद्बोधस्तादृशोस्यनारदस्येतिवांछया।प्रा ६७
णश्रेष्ठेश्रेष्ठ्यवादपर्याप्तिंविगमय्यतां।सत्याख्यब्रह्मणश्रेष्ठ्यएषतित्यादिनोक्तवान् ४ विगमय्यप्रच्याव्यअपोह्यतांश्रेष्ठ्यवादपर्याप्तिं
सत्यापरनामकपरब्रह्मणःश्रेष्ठ्यएषतुवाअतिवदतियःसत्येनातिवदतीतिपूर्वंप्राणश्रेष्ठ्येप्राश्रेष्ठ्यवादपर्याप्तिरतिवादपदेकदेशतिपदे
नदर्शितातांतुशब्देनापोह्यपःसत्येनब्रह्मणातिवादेविषतयाहेतुभूतेनसत्याद्भूब्रह्मणःश्रेष्ठ्यंतिवदतिसत्याख्यंब्रह्मैवसर्वापेक्षया
तिशयेनश्रेष्ठमितिवदतिसएषोवेनिश्चयेनएषएवातिवदतिश्रेष्ठ्यस्यासंततापरपर्यायपर्याप्तिंवदतीत्यर्थकेनवाक्येनोक्तवान्सनत्कुमा
रआचार्यइत्यर्थः ४ सत्यश्रेष्ठ्येश्रेष्ठ्यवादपर्याप्तिंनारदोगुरोः।श्रुत्वासत्येनातिवदिष्यामीत्याहनिजंगुरुं ५ उवाचतंगुरुःसत्यंज्ञात्वे
वातिवदेत्यथ।ज्ञातुमिच्छामितत्सत्यंतत्तइत्याहनारदः ६ गुरुःसनत्कुमाराख्यस्तंनारदंसत्यपदबोध्यब्रह्मस्वरूपंज्ञात्वैवातिवदेत्याह।शास्त्रत
स्तत्स्वरूपापरिज्ञानेनतदतिवादनिष्कर्षासंभवादितिभावः।तर्हितत्सत्यंब्रह्मकीदृशंतज्ज्ञातुमिच्छामितत्तइत्याहनारदः।ब्रह्मज्ञानोद्देश्यकश्रवणा
ख्यविचारंत्वत्तोगुरोःसकाशात्कर्तुमिच्छामिश्रवणपूर्वकत्वान्मनननिदिध्यासनयोःश्रवणानंतरंमनननिदिध्यासनेस्वयमेवसंपादयिष्यामीति
भावः ६ ज्ञानायसत्यस्योपायंश्रवणंप्रभमात्मनः।श्रोतव्यंब्रह्मणोनित्यनिःसीमसुखरूपतां ७ बुबोधयिषुराचार्यःश्रवणसाधनंक्र
मं।वदंक्रमान्नित्यसुखपर्यंतमुत्थापयत्यथ ८ तरतिशोकमात्मविदित्यात्मशब्देनज्ञेयत्वेनोपक्रमेपृष्टस्यएषतुवाअतिवदतियःसत्येनातिवद
तीतिसत्यशब्देनोक्तस्यपरब्रह्मणोज्ञानायसाक्षात्कारायश्रवणप्रश्नेविज्ञानंत्वेवविजिज्ञासितव्यंविज्ञानंभगवोविजिज्ञासइत्युक्तसाधनस्याप्या
वि यश्रोतव्यब्रह्मणःसत्यंत्वेवविजिज्ञासितव्यंसत्यंभगवोविजिज्ञासइतिश्रोतव्यसत्यशब्दबोध्यब्रह्मणोनिःसीमसुखरूपतांभूमैवसुखंभूमात्वेवविं

जिज्ञासितव्य इति वक्ष्यमाणपरीत्याबुबोधयिषुर्नारदं प्रबोधयितुमिच्छन्नाचार्यः सनत्कुमारः श्रवणे श्रवणाख्य आत्मविचारे साधनक्रमं यदा वै मनु
ते ऽथ विजानाति १ यदा वै श्रद्दधात्यथ मनुते २ यदा वै निस्तिष्ठत्यथ श्रद्दधाति ३ यदा वै करोत्यथ निस्तिष्ठति ४ यदा वै सुखं लभतेऽथ करोति ५ नासुखं
६८ लब्ध्वा करोति सुखमेव लब्ध्वा करोति सुखं त्वेव विजिज्ञासितव्यमिति श्रवणस्य मतिः १ मतेः श्रद्धा २ श्रद्धाया निष्ठा ३ निष्ठायाः कृतिः ४ कृतेर्भविष्यत्सु
खलाभेच्छा ५ साधनमिति श्रवणजनकपूर्वपूर्वसाधनक्रमं वदन्नुक्तक्रमेण सुखं भगवो विजिज्ञास इति सुखप्रश्नमुत्थाप्य तमुपादेयसाचार्यो
ज्ञेयत्वेनोपक्रान्ताभूमशब्दस्य स्वशब्दबोध्यब्रह्मणोऽसाधारणसर्वज्ञत्वसर्वेश्वरत्वजगज्जन्मादिहेतुत्वादिबहुगुणाश्रयत्वोपलक्षितनिरतिशय
धर्मिबोधकभूमशब्दबोध्यस्वरूपाभिन्ननिरवधिकनिर्भेदसुखात्मतां बोधयितुमिति भावः। यद्यपि बहुशब्दात्पृथ्वादिभ्य इमनिज्वेति सूत्रेण
भावार्थ इमनिच्प्रत्यये बहोर्लोपो भू च बहोरिति सूत्रेण इमनिच इकारलोपे बहुशब्दस्य भू इत्यादेशे भूमशब्दो बहुत्ववाचकोभाववार्थकस्तथा
पि तद्वद्धर्मिणि लाक्षणिकः प्रयुज्यते धर्मधर्मिणोः परमार्थतस्तदनन्यत्वाधिकरणन्यायेनाभेदविवक्षयेति बोध्यं। यदा वै सुखं लभतेऽथ करो
तीत्यादौ लभधातुर्भविष्यल्लाभेच्छायां लाक्षणिको बोध्यः। अत्र श्रुतौ मतिर्मन्तव्यश्रवणादरः १ श्रद्धा वेदान्तवाक्येष्वास्तिक्यबुद्धिः २ निष्ठा आ
स्तिक्यबुद्ध्या गुरुश्श्वरभजनं ३ कृतिर्नित्यानित्यवस्तुविवेकवैराग्यपूर्वकमिंद्रियसंयमश्चित्तैकाग्रताकरणं च ४ सुखलाभः सुखप्राप्तीच्छा ५। ८
विज्ञातुमिच्छामि सुखमिति सम्प्रार्थितो मुनिः। यो वै भूमा तत्सुखं नाल्पे सुखमस्तीत्ययं ९ भूमैव सुखमित्येष विचार्यः सुखमिच्छता। विचाराज्जाय ६८
ते ज्ञानं भूम्न इत्याह नारदं १० सुखं विज्ञातुमिच्छामीति नारदप्रार्थितो मुनिः सनत्कुमारो नारदं प्रति भूमैव सुखं यस्मात्तस्माद्भूमैव विचार्यः श्रोतव्यो वि

दार्थस्त्वमेवैकं जानथेत्युक्तो ऽज्ञानपरपाररूपः। अथवामृतपदमतत्परं अमृतत्वस्याज्ञाननिवर्तकज्ञानस्य विषयतासंबंधेन वि
धारणादिरूपपरमात्मा सेतुरिव सेतुर्विधारक इत्यर्थः। परमात्मनः परत्वमज्ञाननिवर्तकज्ञानाश्रयत्वमेवानन्यसाधारणं ८५ उक्त
मेवार्थं दृष्टान्तमुखेन स्फुटीकरोति। सेतुर्जलं धारयतीति यद्वद्ब्रह्माऽमृतत्वं चतथैव धत्ते। यद्वात्मबोधो भवतीह सेतुर्विज्ञानथे सेवकु
परिस्थितत्वात् ८६ अधिकरणार्थमुपसंहरति। द्युभ्वाद्यधिष्ठानमतः परं यत्तद्ब्रह्म स्वविज्ञेयमिहेति सिद्धं। इति ८७ अतः पूर्वोक्तेभ्य
एभ्यो हेतुभ्य इह द्युभ्वादिवाक्ये यद्द्युभ्वाद्यधिष्ठानं विज्ञेयमुक्तं तत्सर्वं ब्रह्मैव न प्रधानं न वा हिरण्यगर्भादिर्जीव इति सिद्धं फलितमि
तिभावः। इति पदं इति पदतदुक्तमभियुक्तैरित्यनेनानुषज्जते ८७ इति श्री॰ सप्रथमाध्याये ज्ञेयब्रह्मलिंगकवाक्यसमन्वया
ख्यतृतीयपादे द्युभ्वादिवाक्यस्य ज्ञेयनिर्विशेषब्रह्मसमर्थनपरं सप्तसूत्रं द्युभ्वाद्यधिकरणं प्रथमं १ भूमा संप्रसादादध्युपदे
शात् १ छांदोग्यसप्तमाध्याये भूमविद्यारिताऽखिलैः। सनत्कुमारस्तां विद्यां नारदायोपदिष्टवान् ८८ षड्विंशतिरिहाध्याये
सति खंडानि तत्र हि। आद्ये खंडे नारदर्षिर्ब्रह्मविद्यां सुखावहां। सनत्कुमारं प्रति शिष्यभावेन पृष्टवान् ८९ यद्देश ब्रूहि
तत्सूर्वपश्चाद्दृष्टवामिनेहितं। इत्युक्तो नारदः प्राह ब्रह्मविद्यां विनाखिलं। वेद्मि वेदादिकं तेन मन्त्रवेत्तास्मि नात्मवित् ९० श्रुतं भवादृशे
भ्योऽस्ति शोकं तरति हात्मवित्। इति शोचामि सोऽहं मां तारयेत्याह नारदः ९१ आत्मवित्शोकं तरतीति हि आश्चर्यं भवत्सदृशेभ्यः श्रुतमस्ति मया
सोऽहं शोचामि मां तारय शोकपारमिति नारद आह। अत्र हेति पादपूरणे वास्तु ९१ सनत्कुमारः प्रोवाचयत्त्वातं शब्दस्तत्त्वया। वाचारंभणमेवे

पदार्थत्वेन भूम्नः सर्वात्मभाव उच्यते ब्रह्मविदायश्चास्य संततो भावस्तस्मादात्मेति भण्यत इति स्मरणादिति भावः २० आत्मैवेदं सर्वमि
६९ तियः पश्यति विचारवान् । सवा एष भवत्यात्मरतिर्मत्यनुभूतितः । आत्मक्रीड आत्ममिथुन आत्मानंदश्च सर्वदा २१ मतिर्मननं । अनुभूतिर्विज्ञा
नं । आत्मक्रीडश्चासावात्ममिथुन आत्मक्रीड आत्ममिथुनः । आत्मनि भूमब्रह्मरूपे स्वस्मिन्नेव रतीरमणं यस्य स आत्मरतिः । रतिरत्र देहमात्र
प्र साधनिका स्वेच्छया सुखसंप्रयुक्ता प्रवृत्तिः । क्रीडा तु देहातिरिक्तबाह्यसाधनसापेक्षापि स्वेच्छया सुखेन प्रवृत्तिः । मिथुनं परस्परसंप्रयुक्तद्वंद्वसुखं ।
आनंदोत्र शब्दाद्यभीष्टजन्यः सुखविशेषः । एतच्चतुर्विधमपि सुखं देहजीवितभोगादिनिमित्तकबाह्यवस्तुनिरपेक्षं निर्निमित्तकं आत्म
मात्रविषयकं यस्य जीवन्मुक्तस्येति विशेषणचतुष्टयफलितार्थः २१ स एवं लक्षणो विद्वान् जीवन्नेव स्वराडपि । प्रारब्धांते देहपाते स्वरा
डेव भवत्ययं २२ जीवन्मुक्तिदशायां विद्यानंदस्वानुभूत्या स्वराडपि प्रारब्धभोगांते देहपाते सर्वात्मकनिर्भेदब्रह्मात्मको भवति विद्वानिति
ब्रह्मवेद ब्रह्मैव भवति । ब्रह्मैव सन्ब्रह्माप्येत्यादिशास्त्रश्रवणात् लोकदृष्ट्यापि स्वराडेव भवतीत्यर्थः २२ लोकस्य प्रकाशः स्वस्वत्वया स्वय
मेव या राजते स्वप्रकाशतया तिष्ठति सर्वं राडिति सार्वभौमदृष्टेर्व्यवहारो दृश्यते ब्रह्मीभूते विदुषि तु लौकिकवैदिकोभयविधव्य
वहारस्तु घटत इत्याह । । अज्ञानधीर्नज्ञानो यो लोकदृष्ट्याखिलाश्रयः । स्वतः सिद्धज्ञानरूपः सखराट् सर्वशक्तिमान्
२३ लमकरणः स्वराडखिलकारकशक्तिधरस्तु बलिमुद्वहंति समदंत्यजया निमिषाः वर्षभुजाखिलक्षितिपतोरिव ६९

विश्वसृजो विदधति यत्र येत्वधिकृता भवतश्चकिता इति भागवतदशमस्कंधोत्तरार्धगतश्रुतिस्तुत्युक्तविधया ब्रह्मीभूतविदुषि तेभ्दे नस्व ८
राट्त्वमुपपद्यत इति भावः २३ तस्य सर्वेषु लोकेषु कामचारो भवत्ययं । येन्यथातो विदुस्त्वाधीना क्षय्यफला उत । तेषां सर्वेषु काम
चारो न विद्यते २४ तस्यैवं विदुषः सर्वेषु पूर्वोक्तवागादिप्राणांतेषु पंचदशसु लोकेषु भोगसाधनभूमिकारूपस्थानेषु कामचारः
स्वातंत्र्यं भवति ये तु कर्मिणा तउक्तादस्मात्प्रकारादन्यथा विदुस्ते पराधीनाः क्षय्यलाउक्त लोकेषु तेषां कामचारः स्वातंत्र्यं न कर्माधी
ल नफलत्वात्क्षीणपुण्ये कामचारो न घटत इति भावः २४ तस्यैवं विदुषः सर्वं स्वस्मादेव प्रजायते । इति निःकर्षसत्वेनानिर्दुखत्वेन तिष्ठ
ति २५ समाकृष्टे रकं धेवब्रह्मभावेन तिष्ठति । स्रष्टा वनेको भवति स्रष्ट्वं तेद्योक एव तु २६ सर्वज्ञ ब्रह्मरूपेण निर्धर्म ब्रह्मरूपतः ।
लोकदृष्ट्या विहरति स्वयं निर्धर्मकोपि सन् २७ इत्यात्मविद्यामाहात्म्यमुक्त्वा लोकोत्तरं मुनिः । ब्रह्मविद्यासाधनेषु सारं प्राह सु
रर्षये २८ शब्दाद्यभीष्टविषयज्ञानमाहार उच्यते । तस्य शुद्धिरसंसृष्टिः कामक्रोधमदादिभिः । २९ आहारशुद्धौ मनसो
नैर्मल्यं जायते ततः । उक्तरीत्या श्रुतेर्भूमब्रह्मणि स्याद्ध्रुवा स्मृतिः । निदिध्यासनसंपत्तो भिद्यंते ग्रंथयोखिलाः ३० इति कामा
दिदोषाख्याः कषायायेन मर्दिताः । तस्मै योग्याय शिष्याय नारदाय मुमुक्षवे ३१ सनत्कुमारो भगवान् ज्ञानतमसः परं । पार
दर्शयति स्मेति श्रुतिराह हितैषिणी ३२ उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ३३

अथ भूमाधिकरणार्थस्तु। भूमा संप्रसादादध्युपदेशात् १ छांदोग्यभूमविद्यायां सर्वोत्कृष्टतयेरितात्। संप्रसादाभिधप्रा
७० णादूर्ध्वं सत्यस्य वस्तुनः २४ भूमाभिधब्रह्मणोत्र सर्वश्रेष्ठतयेरणात्। भूमा स परमात्मैव योत्र ज्ञेयतयेरितः २५ प्राणो भू
मतया नैवात्रोपास्योऽप्रकृतत्वतः। शोकं तरत्यात्मवेत्तेत्यस्यात्मोपक्रमे श्रुतः २६ संप्रसीदतियत्रावस्थाविशेषे सुषुप्तिरूपे
जीव इति संप्रसादः सुषुप्तिः। तत्र प्राणो जागर्तीति संप्रसाद इत्युच्यते। छांदोग्यसप्तमाध्याये सनत्कुमारनारदप्रश्नोत्तररूपेण
सत्यापरनामकभूमाख्यपरब्रह्मणो ज्ञेयब्रह्मविद्याश्रूयते सा तु संग्रहेण व्याख्यातैव कारिकाभिस्तथापि आवश्यकविषयवाक्य
मुदाह्रियते। तथाहि। श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोहं भगवः शोचामि तं मा भगवान्छोकस्य पारं तारय
त्विति नारदप्रश्नः। नामादिप्राणांतानुत्तरोत्तराधिकानुक्त्वाह सनत्कुमारः। यथा वा अरा नाभौ समर्पिता एवमस्मिन्प्राणे सर्वं स
मर्पितं। प्राणो ह्येव तानि सर्वाणि भवति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति तं चेद्ब्रूयुरतिवाद्यसीत्यतिवा
द्यस्मीति ब्रूयान्नापह्नुवीतेति प्राणश्रेष्ठ्यवादमुक्त्वोक्तं। एष तु वा अतिवदति यः सत्येनातिवदतीति एवार्थे केन तु शब्देन प्राणाति
वादस्यानतिवादत्वं प्रदर्श्य सत्यशब्दवाच्यपरमात्मवादस्यातिवादत्वं वदन्स सत्त्वेव विजिज्ञासितव्यमिति सत्यब्रह्मणः श्रो ७०
तव्यतामुक्त्वा सत्यश्रवणे मंतव्य सत्यश्रवणादरस्तस्य श्रद्धातस्या निष्ठातस्याः कृतिः कृतेः सुखेच्छा साधनमिति साधनक्र

माराद्भूमः सुखात्मकस्य ज्ञानं सुखमात्राकारा निर्विकल्पा निःशेषज्ञानहंत्री सुखमात्रव्याप्या ज्ञातृज्ञेयज्ञानभावरूपत्रिपुटीरहिता अंतःकरणवृत्तिर्जा
यत इत्याह। फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निराकृतं। ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिते तिपंचदश्याचार्योक्तेः। एतत्कारिकार्थस्तु जिज्ञासाधिक
रणे कतिचित्तत्कारिकाव्याख्याने सोपपत्तिकः प्रदर्शितोस्तीति नात्रोक्तः १० भूमसाक्षात्कार एव प्राप्तिर्नित्यसुखस्य हि। कंठस्थविस्मृतमणेः स्मृ
तिरप्राप्तिर्यथा तथा ११ जिज्ञासुना निजं रूपं नित्यभूमसुखात्मकं। यद्ज्ञातं तन्मतिर्यासा तत्संप्राप्तिरुच्यते १२ इत्युक्तो नारदः प्राह भूमरूपं वद
तिं। तज्ज्ञातृज्ञेयभावेन हीनमित्याह नारदं। सनत्कुमारो भगवान्यत्र नान्यदितीरयन् १३ कस्मिन्स्थितः स भूमेति संपृष्टः प्राह नारदं। निजैश्वर्ये
स्थितो भूमा व्यवहारदृशा सदा १४ वस्तुतः स्वे स्थितिर्यदि तर्हि नो महिमन्यपि। लोके गोश्वादिसंभोग्यं महिमेति वदंति वै १५ लोकोन्यस्मिन्वा
स्तवेन्यस्मिन्ष्ठितीति ब्रवीति हि। नाहमेवं स्वरूपं वस्तां ब्रवीमीत्याह नारदं १६ किं त्वग्रे वक्ष्यमाणेन प्रकारेण वदामि यत्। तच्छृण्वित्याशयेनाहाध
स्तोपि द्यानिधिः १७ तथा हि। आधाराधेयपूर्वादिदिगादिकमिदं जगत्। भूमैव निखिलं यस्मात्तस्माद्न्यत्र वास्तवं १८ अहंकारा
लंबनस्य द्रष्टुर्भूमैक्यसिद्धये। अहंशब्देन भूमैवाऽऽदिश्यते ब्रह्म जानता १९ अहमिति ज्ञान विषयोहंकारालंबनस्तस्य १९ सत्स्व
रूपावलंबेन भूमैवात्मपदेन सः। आदिश्यते शरीरादिव्याप्त्यै ब्रह्म जानता २० सत्स्वरूपं ब्रह्म आलंबो वा स्यात्तथात्म विषयं येना
त्मशब्देन तत्सत्स्वरूपावलंबमात्मपदं तेन भूम ब्रह्मैवादिश्यते। उच्यते देहाद्यप्यहंशब्देनात्र बोध्यं माभूदिति देहादिव्याप्त्यर्थमात्म

यथा काश्यो नृपः कश्चिद्वैदेहो वाथ जो नृपः। विज्यं धनुरधिज्यं तु कृत्वा हस्ते शरावुभौ ४३ बाणवंतौ सपत्नातिदुःखदौ संप्रगृह्य च। कर्तु
७१ दिग्विजयं याती तद्वदहं त्वामुपागता ४४ प्रश्नाभ्यां वक्ष्यमाणाभ्यां तौ मे ब्रूहीति सा ब्रवीत्। तौ द्वौ शल्यकयायुक्तौ शरावेव बाणउच्यते
४५ कस्मिन्नोतं प्रोतमिदं जगदित्याह तं मुनिं। अव्याकृताख्य आकाश इति तां मुनिरब्रवीत् ४६ याज्ञवल्क्य नमस्तेस्तु यो सवान्मम्य
गुक्तवान्। इत्युक्त्वाह द्वितीयं मे प्रश्नं समवधारय ४७ इति पृष्टोस्त्यनुज्ञाता गार्गी पृष्टवती मुनिं। आकाश ओतः प्रोतश्च कस्मिन्नित्यथ सा ब्रवी
त् ४८ गार्ग्येतदक्षरं विप्राः सर्वधर्मनिराकृतं। वदंत्यध्यस्तयावत्क्यानिखिलस्य नियंतृ च ४९ यस्याज्ञायां हि तिष्ठंति सूर्यचंद्रादयः सदा। दा
तृन्प्रशंसंति जना यजमानं हि देवताः ५० यस्याज्ञेयेदमिथ्यमेव भाव्यमिति सत्यसंकल्पेन। यजमानं चरुपुरोडाशादि हविर्भिर्देवतोद्दे
शेन प्रजनकर्मशीलं देवताः प्रशंसंति ५० दर्वीहोमादिक तारं पितरोनुगताः सदा। यत्र ये धिकृतास्ते तु तत्र तिष्ठंत्यनुव्रताः ५१ अविदि
त्वाक्षरं गार्गि जुहोति कुरुते तपः। बहुवर्षाणि तस्य स्यादंतवन्नेव शाश्वतं ५२ गार्ग्येतदक्षरं ज्ञात्वा लोकादस्मात्प्रयाति यः। स ब्राह्मणो
ब्रह्मवित्सन्कृतार्थो निवसंश्रयी ५३ अस्माल्लोकात्प्रैति देहगेहादिसंसारात्मकलोकाभिमानात्प्रमुच्यतेइत्यर्थः। यथा। एष संप्रसादो
स्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते। स उत्तमः पुरुष इति छांदोग्याष्टमाध्यायस्थ श्रुतौ समुत्थानपदस्या
भिमानपरित्यागपरत्वमेवमिहलोकप्रव्रजनपदस्यापि तदभिमानपरित्यागपरत्वं ५३ गार्ग्येतदक्षरं चक्षुः श्रोत्रादिकरणैर्विना। ७१

सर्वेंद्रियाणां व्यापारं करोति निजमायया ५४ गार्ग्येतदक्षरादन्यो द्रष्टादिर्नास्ति कश्चन। एतस्मिन्नक्षरे गार्गि खल्वेतएवापरोक्षके ५५ आ
काश ओतः प्रोतश्चेत्येवं श्रुत्वाब्रवीन्मुनीन्। गार्गी वाचक्नवी सभ्याः शृणुतेति मयेरितं ५६ हे सभ्या मम परिलंवक्ष्यवर्णं शृणुतेति मुनीन्सभा
स्थान ब्रवीद्गार्गी वाचक्नवीनाम्नी ब्रह्मवादिनी ५६ याज्ञवल्क्यं नमस्कृत्य मुक्ताः स्यामेति यद्बुद्धिः। तदेव बहु मन्यध्वं नास्य जेतास्ति
कश्चन। इति वाचक्नवी गार्गी तातुक्त्वोपरराम ह ५७ अस्य नमस्कारेण वयं कृतार्था भविष्याम इति यत्तदेव हृदि बहु समीचीनं मन्य
ध्वं नास्य ब्रह्मोद्यस्य प्रकृते भवत्सु कश्चिज्जेतास्तीत्युक्त्वा तूष्णीं स्थिता गार्गीति भावः ५७ सूत्रार्थस्तु। अक्षरमंबरांतधृतेः १ भू
म्याद्यव्याकृताकाशपर्यंताधारत्वाच्छ्रुतेः इहाक्षरं परं ब्रह्म न वर्णः प्रणवात्मकः ५८ प्रणवा अकारादिवर्णान्वितोपासनार्थं मुक्तो वा
पि नात्र ज्ञेयत्वेन विवक्षिताक्षरत्वेनेष्टः कुत इति चेदंबरांतधृतेरत्रोक्तत्वान्न च साम्बरांतधृतिर्वर्णात्मिके प्रणवे स्वरूपतः संभवत्य
तोक्षरमत्र ब्रह्मैव ज्ञेयत्वेन विवक्षितमिति भावः ५८ सा च प्रशासनात् २ ननु अत्राकाशशब्देन भूताकाशो विवक्षितः। तदेत
धारणस्यात्र प्रधानेपि पतितः ५९ प्रधानमक्षरपदबोध्यमस्त्विति चेदिह। तथापि सापि स्वांतस्य धृतिर्ब्रह्मण एव हि। युस्मा
कात्र न प्रधानस्य प्रशासनिरूपणात् ६० यद्धा ज्ञाप्येरतुल्लं ध्यातासाप्रशासनमुच्यते। प्रशासनं चेतनेशधर्मो नैव प्रधानगः।
अतो त्राक्षरशब्देन परमात्मा विवक्षितः ६१ एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इत्यादि नात्र प्रशास

नस्यासाधारणब्रह्मधर्मस्यात्रकथनाद्ब्रह्मैवाक्षरं ज्ञेयत्वेन विवक्षितं य एतदक्षरं गार्गि विदित्वास्माल्लोकात्प्रैति स ब्राह्मण इति वेदनेन
७२ ब्रह्मवित्त्वश्रवणात् ६१ अन्यभावव्यावृत्तेश्च ३ ब्रह्मान्यधर्माऽदृष्टत्वादिकव्यावृत्तिमद्गुणाः। येऽदृष्टत्वमुखास्तेषामप्यत्र कथ
नादपि। अक्षरं परमात्मैव न प्रधानमचेतनं ६२ ब्रह्मणस्तदन्यस्य प्रधानस्यापि ये ब्रह्म प्रधानसाधारणधर्मा अदृष्टत्वाश्रुतत्वा
मतत्वाविज्ञातत्वानि तेभ्यो व्यावृत्तिर्भेदोऽन्यभावव्यावृत्तिस्तादृशाव्यावृत्तिमन्तः। अदृष्टत्वादिविपरीतस्य भावा अध्यासज्य वृत्तयो ये द्र
ष्टृत्वश्रोतृत्वमन्तृत्वप्रमुखा धर्माः। तद्यथा एतदक्षरं गार्ग्यदृष्टं द्रष्टृ अश्रुतं श्रोतृ अमतं मन्तृ अविज्ञातं विज्ञातृ इत्युक्तेः ६२ अत्रैव वर्णिता
तरं। ब्रह्मान्यद्रष्टृश्रोत्रादिभेदस्य प्रतिषेधतः। अक्षरं परमात्मैव न जीवोऽक्षरमत्र हि ६२ अन्यभावो ब्रह्मान्यभेदस्तस्य व्यावृत्तिः प्रतिषेधस्त
स्मात्। नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञात्रेतस्मिन्नु खलु गार्ग्याकाश ओतश्च प्रोतश्चेति श्रूयमा
णत्वादेवाक्षरं परब्रह्मैव विवक्षितं न वर्णात्मकः प्रणवो नाचेतनं प्रधानं न शरीरोपाधिको जीव इति सिद्धं ६२ इति श्री० सुगागः ब्राह्म
पास्याक्षरपदस्य परमात्मपरत्वसाधकं त्रिसूत्रमक्षराधिकरणं तृतीयं ३ ईक्षतिकर्मव्यपदेशात्सः १ प्रश्नोपनिषदः प्रश्ने पंच
मेऽकमुक्तये। परब्रह्म ध्येयमुक्तं प्रतीके प्रणवाभिधे ६४ तथाहि। यामनुष्येषु भगवन्नोंकारं मरणावधि। अभिध्यायेत्स कतमं
ब्र लोकं ध्यानादवाप्नुयात् ६५ इति पृष्टवते प्राह पिप्पलादो महामुनिः। शिब्यपत्याय शिष्याय सत्यकामाख्याय वै ६६ भोः स
त्यकाम ओंकारः परं चापरमेव च। यद्ब्रह्म तत्स्वरूपो यं यथा ध्यातस्तथैव सः ६७ तस्मादनेन प्रणवध्यानेनावाप्तिहेतुना। द्वयोरन्यत ७२

ममुक्तोक्तं। यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य इति सत्यस्य ब्रह्मणो भूमसुखात्मत्वेन जिज्ञास्य
त्वमुद्दिश्य भूमस्वरूपमुक्तवान् यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमाथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति
तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यमिति। अतो न भूम्नः प्राणोर्ध्वमुपदेशाद् इति गम्यत इत्याशयेनाह भगवान्सूत्रकारो भू
मा संप्रसादादध्युपदेशादिति। अधिरवानंतरार्थकः। अत्र प्राणो वायुः सत्यत्वेन भूमसुखात्मत्वेन च उपास्य इति पूर्वपक्षः। सत्य
स्वरूपः परमात्मैव भूमस्वरूपो मुमुक्षुणा जिज्ञास्य इति राद्धान्तः ३६ धर्मोपपत्तेश्च २ किंच। भूम्नि श्रुतानां धर्माणां ब्रह्म
ण्येवोपपत्तितः। भूमा परमात्मैव न प्राणोऽनुपपत्तितः ३७ अनुपपत्तितः भूमोक्तसर्वव्यवहाराभावानल्पसुखात्मकत्वादिध
र्मासंभवाद्भूमा न प्राणः ३७ भूम्नि सर्वव्यवहृतिशून्यत्वं सुखरूपता। अमृतत्वादि यत्प्रोक्तं तद्ब्रह्मण्येव युज्यते ३८ इति श्री०
सुच्छान्दोग्यसप्तमाध्यायगतोक्तभूमविद्यास्थभूमशब्दार्थस्य परमात्मत्वसाधकं द्विसूत्रं भूमाधिकरणं द्वितीयं २ अक्षर
मंबरान्तधृतेः १ बृहदारण्यकगततृतीयाध्यायगाष्टमे। ब्राह्मणे श्रूयते याज्ञवल्क्यगार्ग्योर्मिथो वचः ३९ तथाहि। जनकु
स्य सभायां वै याज्ञवल्क्यजिगीषया। विवादे याज्ञवल्क्येन संप्रवृत्ते द्विजन्मनां ४० ब्रह्मवित्सु ब्रह्मवादी यः स ब्रह्मिष्ठ उच्यते।
तादृशं याज्ञवल्क्यं सा गार्ग्यपि हि ब्रह्मवादिनी ४१ गार्गवाचक्नवी सभ्यविप्रानुज्ञां प्रगृह्य सा। संवादाय याज्ञवल्क्यं तिवक्तुं समुपचक्रमे ४२

ब्रोलमतांप्रापयंतित्युपासकं ८१ प्रणवस्यप्रथममात्रा आकाररूपा १ तस्याः प्रथममात्रात्मकत्वेध्येयानि ऋग्वेदः २ पृथिवीलोकः ३
७२ ब्रह्मादेवता ४ वसवऋषयः ५ गायत्रीछंदः ६ गार्हपत्योग्निः ७ जाग्रदवस्था ८ विश्वाख्योजीवः स्थूलभुक् ९ प्रथमःपादः १० इत्यादिः प्रणव
प्रथममात्राविभागः प्रणवप्रथममात्रारूपेण ध्यानार्थमथर्वशिखामांडूक्यादिष्टुकोनुसंधेयः। अत्रत्वइत्युपलक्षणं प्रथममात्रातेन
ध्येयानियानियान्युक्तानितानिसर्वाणित्वक्शब्देनात्रविवक्षितानि। तथाचप्रथममात्रात्वेनध्यातात्वचस्तेताद्दग्मात्राविभागाद्यं
केवलप्रणवोपासकंमनुष्योत्तमतांश्रेष्ठविप्रजन्मप्रापयति। एवमग्रेपिद्विमात्रादिप्रणवध्यानफलमूह्यं ८१ सतत्रतपसाब्रह्मच
र्येणश्रद्धयापिच। संपन्नोब्राह्मणाग्र्यत्वानुभवत्यतुलांश्रियं ८२ यस्तुद्वितीयमात्राद्यमुपास्तेप्रणवंपदि। समृत्युकालेमनसिस्वप्नाव
स्थांगतःपुमान् ८३ मृतोयजुर्भिःसोमस्यलोकमुन्नीयतेदिवि। ससोमलोकऐश्वर्यंभुक्त्वाथावर्ततेपुनः ८४ दिविअंतरिक्षेसोम
लोकेविभूतिमनुभूयाथपुनरावर्ततेधः। प्रणवस्यद्वितीयमात्राउकाररूपातद्रूपेणध्येयानितुउकारः १ यजुर्वेदः २ अंतरिक्षलोकः ३
रुद्रोदेवता ४ रुद्राऋषयः ५ त्रिष्टुप्छंदः ६ दक्षिणाग्निः ७ स्वप्नावस्था ८ मनःस्थानं ९ तेजसोजीवः प्रविविक्तभुक् १ द्वितीयःपादः ११ इ
त्यादि। व्याख्यानमेकमात्राविभागवज्ज्ञेयं ८४ यस्तुतृतीयमात्रायाविभागेनान्वितंपुमान्। ओमित्येकाक्षरंत्वेतमोंकारंप्रणवा ७२
भिधं ८५ सूर्यांतर्यामिपरमपुरुषात्मकमश्वरं। अभिध्यायेद्ब्रह्मचर्यतपःश्रद्धासमन्वितः ८६ एतेनैवप्रतीकस्यध्यानेनमरणांग
तः। सध्यातातेजसिरवौक्रमाद्भवतिसंस्थितः ८७ नावर्ततेपुनस्तस्मात्सोमलोकादिवलधः। पुण्यपापैर्विनिर्मुक्तोयथासर्पस्त्वचातथा ८८

ससामभिःसत्यलोकंनीयतेसूर्यलोकतः। सएतस्मात्सर्वलोकश्रेष्ठाज्जीवघनाश्रयात् ८९ सत्यलोकात्ततस्तेश्वकेकल्पेसमुपस्थिते।
निर्विशेषंसर्वगतंपरंपुरुषमीक्षते ९० अथवा। सएतस्माज्जीवघनात्कार्यब्रह्मणउत्तमात्। अप्युत्तमंसर्वगतंपरंपुरुषमीक्षते ९१
हिरण्यगर्भएवात्रसर्वजीवसमष्टिमान्। समस्तजीवमूर्तित्वादेवजीवघनोमतः ९२ लोकपक्षेजीवघनशब्दाद्ब्रह्मलोकोहिलक्ष्यते। यथाश्रुते
जीवघनशब्दस्यतुनलक्षणार्थं ९३ अप्रतीकालंबनाख्योन्यायःसूत्रकृतेरितः। यत्रसाक्षाच्छ्रुतिर्नास्तितत्रसार्थकइष्यते ९४ अप्र
ति तीकालंबनान्नयतीतिबादरायणउभयथाऽदोषात्तत्क्रतुश्चेतिचतुर्थाध्यायतृतीयपादांतेअप्रतीकालंबनानामहग्रहोपासकानामेवा
र्चिरादिपथेनकार्यब्रह्मलोकप्राप्तिर्नेतरेषांप्रतीकोपासकानामितिवक्ष्यते। तस्यसार्थक्यंव्यवस्थाप्यतेनेनश्लोकेन ९४ प्रतीकाल
बनस्यापिब्रह्मलोकःश्रुतेर्बलात्। किंचित्स्वीक्रियतेपंचाग्न्युपास्तौहियथातथा। त्रिमात्रिकप्रतीकस्याप्युपास्तौसश्रुतेर्बलात् ९५ स
ब्रह्मलोकः। प्रणवस्तृतीयमात्राविभागस्तु। मकारव्यंजनात्मिकातृतीयामात्रा। तद्रूपेणध्येयानितु। मकारात्मिकातृतीयामात्रा १ सा
मवेदः २ द्यौर्लोकः ३ विष्णुर्देवता ४ आदित्यऋषिः ५ जगतीछंदः ६ आहवनीयोग्निः ७ सुषुप्त्यवस्था ८ प्राज्ञोजीवआनंदभुक् ९ हृदयाका
शस्थानं १० तृतीयपादः ११ इत्यादिः। प्रणवचतुर्थमात्रायास्तु। नादरूपेणमकारात्मिकाचतुर्थ्यर्धमात्रा १ तत्वेनध्येयानितुअथर्ववे
दः २ परब्रह्मलोकः ३ परमपुरुषोदेवता ४ महान्ऋषिः ५ विराट्छंदः ६ संवर्तकोग्निः ७ तुर्यावस्था ८ सर्वोपप्लवरहितःप्रज्ञानघनःप्रत्यगर्थो

जीवआनंदस्वरूपः १ चतुर्थः पादः १ इत्यादि। प्रकृते तु तृतीयमात्रात्वेन ध्यातेः साम्भिस्तृतीयमात्राविभागपूर्वकपरब्रह्मप्रतीकत्रिमात्रप्रण
७४ वोपासको ब्रह्मलोकं नीतो ब्रह्मलोके तत्रैश्वर्यमनुभवन् हिरण्यगर्भावसाने तत्रस्थवेदान्तनिर्विकल्पकध्यानस्याभ्यासबलेनात्यंतिकनिर्विक
ल्पकसमाधिदशामापन्नो निर्विकल्पं सच्चिदानंदं ब्रह्म फलव्याप्यत्वं विनापि वृत्तिव्याप्यतया साक्षात्करोतीति प्रकरणफलितार्थः ९५ त्रिमा
त्रेणाक्षरेणेति तृतीया श्रूयते त्रयी। सा द्वितीयार्थिका ब्रह्मतारैक्यस्य तु उपक्रमात् ९६ एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारस्तस्मा
देतेनैवायतनेनैकतरमन्वेतीति ब्रह्मतारैक्यस्योपक्रमात्तृतीया विशिष्टे द्वितीयार्थे लक्षणाय यथा नैयायिकमते रथो गच्छतीत्यत्र द्वितविशि
लटो त्वयर्थाया बाधाद्यापारे लक्षणा तथा प्रकृतेपीति भावः। आयतनेन प्राप्तिसाधनेन एतेनैवाभिध्यायीतेति पूर्वमुपक्रांतेन एतेनैव परापरब्र
ह्मतारयोस्तादात्म्याभिध्यानेनैव परापरब्रह्मणोरन्यतरं दुत्सान्वेति प्राप्नोतीत्यर्थः ९६ सूत्रार्थस्तु। ईक्षतिकर्मव्यपदेशात्सः १ त्रिमा
त्रोंकाररूपेण योभिध्येयतयोक्तः। परो हि पुरुषः सोत्र परमात्मैव नेतरः। तस्येक्षतेः कर्मतया वाक्यशेषे निरूपणात् ९७ तस्योंकारात्मे
देनाभिध्येयत्वेनोक्तस्य पुरुषस्य। प्रणवो बुद्ध्यारूढः पूर्वपक्षस्तथा पुरा। तद्ध्येयमुच्यतेत्रेति बुद्धिसन्निधिसंगतिः। पुरा पूर्वाधिकरणेक्षरा
ख्ये। अत्र विषयवाक्यं तु। यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये संपन्नो यथा पादोदरस्त्वचा विमुच्यत
एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते। इति। श्रुत्यर्थस्तु पूर्वमेवोक्तो
स्ति। अत्रैवं पूर्वपक्षः। एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेतीति परापरब्रह्मणोरन्यतरस्योंकाराभेद ७४

[illegible] प्राणाख्यमपरं ब्रह्म सूत्रात्मेति यदुच्यते ६९ हिरण्यगर्भ इति च यज्जीवघन उच्यते।

रद्ब्रह्म यथाध्यानमुपैतीति हि। ६८ तत्राक्षरं परं ब्रह्म साक्षी पुरुष उच्यते। आदित्ये इति प्रोक्तं मूर्तिर्घन इतीर्यते। समस्तजीवमूर्तित्वा
त्स जीवघन उच्यते ७० यत्तस्य लोकपालत्वं यत्तत्स्वामिचरितं। एवं बहुविधैः शब्दैः परं ब्रह्म कथ्यते ७१ मांडूक्यसंज्ञकाथर्वशि
खाद्युपनिषत्स्वयं। मात्राविभागास्तारस्य देवताछंद आदयः ७२ पादा लोकास्तथा वेदा ध्यानं ध्येयं विभूतयः। उक्तास्तान्वेत्ति यः
स्यात्स सर्वमात्राविभागवित् ७२ स्याद्भवति ७३ यः प्रपश्यत्स्यातारस्य सर्वमात्राविभागवित्। उपासकस्तत्प्रसादादखंडब्रह्म
विद्भवेत् ७४ सर्वमात्राविभागवित्तारोपासकस्तत्प्रसादात्तारोपास्यदेवतानुग्रहात्। अखंडब्रह्मविद्भवतीत्यर्थः। मात्राः प्रणवां
तर्गताश्चेत्वः ७४ प्रणवार्थनिर्वृतध्यानात्संसाराद्विमुच्यते। ७५ सर्वमात्रानभिज्ञोपि किंचिन्मात्राविभागवित्। यः सोपि तारो
पाक्तायाउपासायाः प्रभावतः। क्रममुक्त्या ब्रह्मलोकं प्राप्याप्नोति परं पदं ७६ तारः प्रणवः। किंचिन्मात्राविभागः प्रणवस्यैक
मात्राद्यन्यतममात्रासंबंधि देवतर्षिछंदोवेदलोकावस्थादक्षिणाक्ष्यादिस्थानादिप्रविभागस्तज्ज्ञः उक्तः। तारे प्रतीके प्रोक्ताया
यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीतेत्युपासायाः प्रभावात् ७६ ब्रह्मोपास्तिर्मुमुक्षूणां प्रतीके प्रणवाभि
धे। किंचिन्मात्राविभागेन तारं ध्यायति केवलं ७७ सोपि लोकान्छुभान्याति तारोपास्तेः प्रभावतः। अतस्तारः परब्रह्मविभूतिः
सर्वकामधुक् ७८ इति गूढाशयो विद्वान्पिप्पलादो महामुनिः। तारस्योपासनाः प्राह जन्महारककारिकाः ७९ एकमात्राविभा
गाद्ध्यमुपास्ते प्रणवं यदि। ध्यानेन तेन वैश्वर्यसंस्कारात् ध्योमृतः पुमान् ८० क्षिप्रं भूमौ समायाति त्रिमात्रात्वेन भाविताः। त्वं चामुन्

पुरुषं ध्यानेक्षतइत्येकवाक्यता॥ उभयोर्वाक्ययोर्यत्तच्छब्दाभ्यामवगम्यते १ योध्यातासब्रह्मलोकगः परंपुरुषमीक्षतइत्युभयवाक्ययो
रेकवाक्यता १ येअत्राग्निमवक्यस्थेपरंपुरुषमित्युभे॥ पदे ताभ्यां पूर्ववाक्यगतयोरुभयोस्तयोः २ वाक्यैकत्वानुग्रहाद्ध्याप्रत्यभिज्ञात्र
जायते॥ तयाध्यानस्येक्षणस्य कर्मैक्यमवगम्यते ३ अर्थैकत्वादेकंवाक्यंसाकांक्षंचेद्विभागेस्यादितिजैमिनीयन्यायेनेक्षणवाक्यस्य
ध्यातव्यवाक्येनैकवाक्यत्वेसिद्धे ईक्षणवाक्यगतपरपुरुषशब्दाभ्यामेकवाक्यतानुगृहीतसमानविभक्तिकपरपुरुषोभयपदप्रत्यभि
ज्ञोपस्थापितार्थैक्यप्रत्यभिज्ञयाध्यानेक्षणयोः समानविषयत्वमवगम्यते। तेनसमानकर्तृकध्यानजन्येक्षणयोः समानविषयत्वमिति
नियमात्। इतिपदार्थस्यदर्शनस्यलोकेयथार्थविषयकत्वात् यथार्थस्वरूपः परमात्मैवेक्षतिकर्मेतिउक्तध्यानेक्षणयोः परमात्मैववि
षयोनतुध्यानेहिरण्यगर्भईक्षणेपरमात्माविषयइति वैरूप्यमितिकारिकात्रयफलितार्थः। अत्रनतुइत्यस्यवैरूप्यपदेनान्व
यः। नवैरूप्यमित्यर्थः ३॥ ॥इतिश्री० स्तूत्रिमात्रोंकारतादात्म्येनध्येयपरपुरुषपदार्थस्यईक्षतिकर्मत्वोपलक्षणेनलक्षित
नपापनिर्मोकाहेतुनपुरुषान्नपरंकिंचित्साकाष्ठासापरागतिश्चस्यापरमात्मनोंनिर्धारितपरमपुरुषपदार्थत्वेनच परमात्मत्वेन
परत्वसाधकमेकसूत्रमीक्षतिकर्माधिकरणंचतुर्थं ४ दहरउत्तरेभ्यः १ सूक्ष्मस्याकाशसंस्थस्यहृत्स्थस्यपरमात्मनः॥ छांदोग्यस्थो
त्तमाध्यायादावुपास्तिः समीरिता ४ अस्मिन्ब्रह्मपुरेदेहेहृदब्जंदहरंहियत्॥ वेश्मभूतंप्रभोरस्मिन्दहराकाशआंतरः ५ अस्ति
यत्रास्तितस्मिन्वेसत्तत्सूक्ष्मेविमलेशुभे॥ हृत्पुंडरीकेदहरआकाशोयोंतरीरितः ६ विचार्यत्वेनविज्ञेयस्तयोचात्रमुमुक्षुभिः ६ परमा ७८

त्मैवसोत्रैतद्वाक्यशेषस्यहेतुतः॥ भूताकाशोथवाजीवोनैवसोनुपपत्तितः ७ उपलब्धेरधिष्ठानंब्रह्मणोदेहइष्यते॥ विद्याधि
कारिणोदेहस्तेनब्रह्मपुरंभवेत् ८ तदेतदुक्तमभियुक्तैश्च॥ ब्रह्मैवयुक्तंदहरंनभोत्रतद्वाक्यशेषास्थितहेतुवृंदात्॥ द्यावापृथिव्यादिस
मास्रयत्वव्योमोपमादिःखलुहेतुसंघः ९ दहरंसूक्ष्मं ९ हृदल्पमत्रस्थैर्यमतीवचाल्पंकिमत्रखेतिष्ठतियाद्विचार्यं॥ इतिस्मपृष्टोगुरु
राहयावानित्यादिनाल्पत्वनिवृत्तिमस्य। इति १० अस्यसूक्ष्महृत्पुंडरीकांतस्थातिसूक्ष्माकाशपदबोध्यपरब्रह्मणः। अत्रयंहृदय
पुंडरीकांतस्थंनभोतीवसूक्ष्ममितिविचारानर्हत्वात्किमत्रविचार्यमितिशिष्यप्रश्नेगुरुरुक्तरीत्योत्तरमाहेत्यन्वयः १० यद्व
काशश्चतस्मिन्यदुक्तंतेतच्छ्रुतद्वयं। अन्वेष्टव्यमितिज्ञेयाविषयश्रुतियोजना ११ विषयश्रुतियोजना। दहराधिकरणवि
षयवाक्यश्रुतिश्रुतियोजनेत्यर्थः। तथाहि। अथयदिदमस्मिन्ब्रह्मपुरेदहरंपुंडरीकंवेश्मदहरोस्मिन्नंतराकाशस्तस्मिन्यदंतस्तद
न्वेष्टव्यंतद्वावविजिज्ञासितव्यमितितंचेद्ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरेदहरंपुंडरीकंवेश्मदहरोस्मिन्नंतराकाशः किंतदत्रविद्यतेया
ते दन्वेष्टव्यंयद्वावविजिज्ञासितव्यमितिसब्रूयाद्यावान्वाअयमाकाशस्तावानेषोंतर्हृदयआकाशउभेअस्मिन्द्यावापृथिवीअं
तरेवसमाहितेउभावग्निश्चवायुश्चसूर्याचंद्रमसावुभौविद्युन्नक्षत्राणियच्चास्येहास्तियच्चनास्तिसर्वंतदस्मिन्समाहि
तमितिइत्याद्यत्रविषयवाक्यं। अत्रदहरोस्मिन्नंतराकाशस्तस्मिन्यदंतरित्यत्रतस्मिन्नितिसप्तम्यंतत्तच्छब्देनव्यवहितस्यापिअ
स्मिन्नितिसप्तम्यंतेनपरामृष्टस्यहृत्पुंडरीकस्यपरामर्शइतिमुख्यः पक्षः अथवातस्मिन्नितिसप्तम्यंतेनसन्निहितदहराकाश

ब्र॰सू॰का॰टि॰ स्यैवपरामर्श इतिपक्षांतरं। अस्मिन्पक्षेतस्मिन्दहराकाशेंतर्यद्यावापृथिव्यादिमिथ्याभूतंसर्वंजगद्वर्ततेतदितितच्छब्देनदहराकाश
७६ स्तदंतर्गतंजगच्चपरामृश्योभयंयथास्वरूपमास्तितथाविचारणीयंज्ञेयंचेतिवाक्यार्थ इतिपक्षांतरं। यच्चास्येहास्तीत्यस्यार्थ
स्तु। यच्चास्यात्मनआत्मीयत्वेनदेहवतोजीवस्यविद्यतइहलोकेतथायच्चास्यात्मनआत्मीयत्वेननास्तिनसंभाविष्यच्चतन्नास्तीत्य
च्यतेनत्वत्यंतमसत्छशृंगादिनास्तीत्यनेनविवक्षितं। तस्यदहराकाशेउक्तसमाधानानुपपत्तेः। तदुभयरूपंसर्वमस्मिन्दहराका
शाख्येपरमात्मनिसमाहितमाश्रितमित्यर्थः। शेषंस्पष्टं॥ ॥अथात्रप्रकारांतरेणप्रश्नसमाधानेश्रुत्यैवप्रदर्श्येते। तंचेद्ब्रूयुर
स्मिंश्चेदिदंब्रह्मपुरेसर्वं समाहितं सर्वाणिचभूतानिसर्वेचकामाः। यदेतज्जरावाप्नोतिप्रध्वंसतेवाकिंततोतिशिष्यत इतिप्र
श्नः। ब्रह्मपुरेब्रह्मपुरोपलक्षितदहराकाशे। यदास्मिन्काले एतद्ब्रह्मपुररूपंशरीरंवलिजरावलीपलितादिलक्षणामंगरैति
त्यंअथवावयोहानिर्वाप्राप्नोति। अथवाप्रध्वंसतेवाएतच्छरीरं। शस्त्रादिनायत्तच्छेदोभूदोवाप्रध्वंसोत्रविवक्षितः। किंततो
देहादन्यद्दहराकाशोनामावशिष्यतेनैवावशिष्यतेक्षीरदधिस्नेहाद्याश्रयघटादिनाशेतत्कृतक्षीरादिनाशदर्शनात्तद
त्कृतेपिहृत्पुंडरीकवद्देहनाशेनतदाश्रितदहराकाशनाशसंभावनयादहराकाशेद्यावापृथिव्यादिसर्वजगदाश्रयत्वेनश्रुत्य
भिप्रेतमुपासनं। उपास्त्याक्रमभुक्तिद्वारांतदन्वेषणंतद्विज्ञानंवाकथंघटतइतिप्रश्नाभिप्रायः। अत्रसमाधानमाहश्रुति राम
रेवासब्रूयान्नास्यजरयैतज्जीर्यतिनवधेनास्यहन्यत एतत्सत्यंब्रह्मपुरमस्मिन्कामाःसमाहिताः। एषआत्मापहतपाप्मा१वि ७६
जरो२विमृत्यु३र्विशोको४विजिघत्सो५ऽपिपासः६सत्यकामः७सत्यसंकल्पो८यथाह्येवेहप्रजाअन्वाविशंतियथा

नाभिध्यानेनान्यतरस्याप्तिमुपक्रम्यससामभिरुन्नीयतेब्रह्मलोकमितितद्विदोदेशपरिच्छिन्नकार्यब्रह्मलोकप्राप्तिरूपफलस्यक
ध्या थनरूपलिंगात्त्रिमात्रोंकाराभिध्येनाभिध्येयतयोक्तोत्रपरःपुरुषोऽपरब्रह्मरूपोहिरण्यगर्भोजीवघनापरपर्यायइति। कार्यब्रह्म
णोपिजीवनिकायापेक्षयापरत्वरूपत्वमुपपद्यतइतिपूर्वपक्ष्याशयः। सिद्धांतस्तु। वाक्यवाक्यशेषयोःसर्वत्रासतिबाधकेस
मानविषयत्वमौत्सर्गिकमितिनियमात्प्रकृतेबाधकाभावाच्चसर्वापेक्षयापरात्जीवघनशब्दवाच्यकार्यब्रह्मरूपाद्धिरण्यगर्भा
दपिपरःपुरुषस्यपरमात्मनःसपरात्परंपुरिशयंपुरुषमीक्षतइतिब्रह्मलोकगध्यातृसाक्षात्कारकर्मत्वेनवाक्यशेषेकथनाद्वाक्यस
मानविषयकवाक्यशेषईक्षतिकर्मत्वेनोक्तःपरमात्मैवाभिध्यातव्यवाक्येभिध्यातव्योनहिरण्यगर्भइतिसिद्धांताशयः। देश
परिच्छिन्नफलमपिक्रममुक्त्योपपद्यतइतिनलिंगविरोधोपि ९७ एतदेवविशदयितुमाह। वाक्यशेषस्तुवाक्येनसमानवि
षयोयतः। अतोवाक्यार्थसंदेहनिवर्तकतयेष्यते ९८ संदिग्धेतुवाक्यशेषादितिजैमिनीयन्यायस्यसत्वादितिभावः ९८
वाक्यशेषेपरंब्रह्मवीक्षाकर्मतयेरितं। समानविषयत्वेनवाक्येप्याद्यंतदेवहि ९९ असतिबाधकेवाक्यवाक्यशेषयोःस
मविषयत्वनियमेन ९९ अथप्रकारांतरेणापिध्यानवाक्येक्षणवाक्ययोरेकवाक्यतयासमानविषयत्वमाह। अत्रउक्त्यंतरेणा
पिभाष्यकारोक्तयादिशा। समानविषयतांहिस्याद्ध्यानेक्षणवाक्ययोः १०० यःपरंपुरुषंध्यात्वाब्रह्मलोकमुपागतः। सपर

ब्र०सू०का० यस्यानात्मविदेष्वनंताच्छादनात्। अतः॥ सुषुप्तौ तत्र गत्वापि तान्कामान्नसविंदति ३४ यथाहिरण्यं निहितं क्षेत्रज्ञानविवर्जि
७८ ताः॥ उपर्युपरि गच्छंतोपि न विंदेयुः प्रजा इमाः ३५ तथा सुषुप्तौ गच्छंतो ब्रह्मलोकं स्वयंप्रभं॥ न विंदंति महामोहपिहितं दहरांबुजं॥
३६ ब्रह्मैव लोको ब्रह्मलोकः ३६ स वा एष आत्मेयस्मात्तिष्ठति हृद्ययं॥ तस्माद्धृद्यमित्युक्तः सन्निजात्मैव हानिशं जा
नन् हार्दाकाशरूपं स्वर्गं संप्रतिपद्यते ३७ जानन् अपहतपाप्मत्वादिगुणकं हार्दाकाशमहर्निशं स्वात्मत्वेन ध्यायन् हार्दाका
शाख्यस्वरूपात्मकस्वर्गं संप्रतिपद्यते सम्यक्प्रतिपद्यते पूर्वोक्तापहतपाप्मत्वादिसत्यसंकल्पांतैश्वर्यधर्मान्प्राप्नोतीत्यर्थः ३७
यद्देवोपासनायाः संप्राप्यफलमीरितं॥ संप्रसीदति सार्वात्म्यात्संप्रसादः स खल्विह ३८ क्रमप्राप्तं अथ य एष संप्रसादोस्मा
च्छरीरात्समुत्थाय परंज्योतिरुपसंपद्य स्वेनरूपेणाभिनिष्पद्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति श्रुत्यर्थं वि
कुं श्रुतिस्थ संप्रसादशब्दस्य सुषुप्त्यवस्थोपलक्षितजीवसामान्यबोधकस्यापि प्रकृतत्वेन विवक्षितार्थमाह। यद्देवोपा
सनायाइति सुषुप्त्यपरपर्याय संप्रसादोपलक्षित तुरीयात्मा भगवान् संप्रसादपदलक्ष्य इह विवक्षित इति भावः ३८ सुषु
प्तिः संप्रसादोस्यां स्वप्रसन्नत्वदर्शनात्॥ तयोपलक्षितो जीवः संप्रसाद इतीर्यते ३९ सर्वत्रात्र तु यच्छब्दैतच्छब्दाभ्यामु
दीरितः॥ विद्वान्कालुष्यरहितः संप्रसादो विवक्षितः ४० सर्वत्र संप्रसादपदेन जीवसामान्यं अत्र तु य एष इति पदपरामर्शो दह
रोपासकः सर्वज्ञपरमेश्वरभावेन स्वात्मनो वेत्तृतया विषयकालुष्यरहितो भवतीति सूचनार्थं यसंप्रसादपदेनात्रोक्त इति भा राम
वः ४० अभिमानं परित्यज्य शरीराश्रितयोर्द्वयं॥ सच्चिदानंदमात्मानं साक्षाज्जीवोनुभूय तु॥ आविर्भवत्यात्मरूपेणैव नागंतु ७८

नुशासनं यं यमंतकाममभवंति यं जनपदं यं क्षेत्रभागं तमेवोपजीवंति तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो
लोकः क्षीयते तद्य इहात्मानमननुविद्य व्रजंत्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेष्वकामचारो भवत्यथ य इहात्मानम
नुविद्य व्रजंत्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति। स यदि पितृलोककामो भवति संकल्पादेवा
स्य पितरः समुत्तिष्ठंति तेन पितृलोकेन संपन्नो महीयत इत्यादि। एतदर्थस्क्ता। अस्य देहस्य जरावधाभ्यामेतत्परमार्थस
सं ब्रह्मैव मुख्यं सर्वाश्रयत्वात्पुरं ब्रह्मपुरं दहराकाशरूपं न हन्यते तेन नाश्यत इति अस्मिन्सर्वकामोपलक्षितं निखिलं ज
गदस्मिन्समाहितमिति यदुक्तं तदुचितमेवेति भावः ११ निर्विशेषं विचार्यापि साक्षात्कर्तुमनीश्वराः॥ येतेरुपास्य आका
शः स्वात्मा निर्दोषितामुखैः॥ लक्षणैरष्टभिः श्रेष्ठैरित्याह स घृणाश्रुतिः १२ सघृणा मातेव सदया। लक्षणैरसाधारण
धर्मैः स्वात्मा स्वस्य वास्तवस्वरूप आकाशः परमात्मोपास्य इत्याह अथ योन्यां देवतामुपास्तेन्योसावन्योहमस्मीति न स वे
द यथा पशुरिति बृहदारण्यकश्रुतेः १२ आकाश एष सर्वेषां प्रत्यगात्मा हि पाप्मभिः॥ पुण्यपापात्मकैर्नित्यमसंस्पृ
ष्टो जरः सदा १३ विमृत्युश्च विशोकश्चानशने क्षुत्पिपासया॥ रहितः सत्यकामश्च सत्यसंकल्पकः सदा १४ एष आत्मे
ति दहराकाशस्यात्मत्वकीर्तनं॥ कृत्वापहतपाप्मत्वाद्यष्टलक्षणवर्णनात् १५ ईशोपहतपाप्मत्वप्रमुखैर्लक्षणैः सह॥ स्वा
त्मत्वेनोपास्य इति श्रुतितात्पर्यमिष्यते १६ आत्मानं तद्वतान्धर्मांश्चानुविद्य व्रजंति ये॥ तेषां सर्वेषु लोकेषु कामचार इती

रूपात् १७ आकाशात्मतज्ञतसत्यसंकल्पमात्रसाध्यसर्वकामितविषयानुवेदनवतां दहरोपासकानां सर्वलोककामचाररूपफलसं
बंधस्यात्रैवाग्रेकथयिष्यमाणादुक्तेरीत्या दहराकाशोपास्तिः कार्येति एष आत्मापहतपाप्मेत्यादि सत्यसंकल्पइत्यंतश्रुतितात्प
र्यमनुमीयतइतिभावः १७ ईशित्रोश्वर्ययोः स्वात्मतयात्रानुभवोहियः॥ सोनुवेदनशब्दार्थइतिभाष्येनिरूपिते १८ ईशश्चेशैश्व
र्यंचेतिद्वंद्वः। तद्यइहात्मानमनुविद्यव्रजंतीत्यत्रानुवेदनशब्दार्थइतिछांदोग्यभाष्येनिरूपितंउक्तं १८ तेनायमर्थः संपन्नोभव
त्यत्रश्रुतीक्षितः॥ वक्ष्यमाणैर्युतेनात्रब्रह्मचर्यादिसाधनैः १९ एवंलक्षणआकाशः शास्त्राचार्योपदेशतः॥ ध्यातव्योहृदये
स्वात्मतयास्वाराज्यमिछता २० षड्गुणैश्वर्यसंपन्नपरेशस्यगुणैःसह॥ स्वात्मत्वोपास्तिदार्ढ्येन सत्यसंकल्पलाभुखाः।
२१ स्वस्मिन्नाविर्भवंतीशधर्माहीहैवजन्मनि॥ देहपातेपितेधर्मानैवमुंचंत्युपासकं २२ येत्वीशंतद्गुणांश्चात्मतयाना
नुभवंतिते॥ इहामुष्मिन्नस्वतंत्राराजाधीनाःप्रजाइव २३ याःप्रजाअनुवर्त्तंतेयथाराजानुशासनं॥ नायंप्रदेशंदेशंवाक्षे
त्रभागमिहप्रजाः २४ स्वराजतोभिवांछंतिस्वाधिकारानुरूपतः॥ तद्दत्तंतंतमेवोपजीवंतिनततोधिकं ७२५ उपजीवं
तितावन्मात्रामुपजीविकामनुभवंतिनततोधिकमुपजीवंतिअस्वतंत्रत्वात्। दहरोपासकस्तु पूर्वंतद्देशभक्तोप्यज्ञानादनी
श्वरभावमापन्नउपास्तिसामर्थ्यादीश्वरभावमापद्यभगवदैश्वर्यमनेनैवलिंगदेहेनेहपरत्रचानुभवतिनिर्वासनकैवल्यं
विनालिंगभंगासंभवात् ७२५ यथासेवाकर्मजितोलोकःक्षीयतेतथापरः॥ यःपुण्येनजितोलोकः सोपिक्षीयतएवहि २६ उपास
कस्त्वीश्वरवत्पुण्यपापविवर्जितः॥ सार्वैश्वर्यसमापन्नऐश्वरंभावमश्नुते २७ सार्वैश्वर्यईश्वरसमानमैश्वर्यं सात्विते

यमूर्यस्ततीयाध्यायद्वितीयपादाद्यधिकरणे। पराभिध्यानात्तुतिरोहितंततोह्यस्यबंधविपर्ययावितिचतुर्थाध्यायच
तुर्थपादेचायमर्थोव्यवस्थापितोस्ति। संकल्पादेवतच्छ्रुतेः। अतएवचानन्याधिपतिः। जगद्व्यापारवर्जंप्रकरणादसन्निहि
तत्वाच्चेत्यादिना २७ आत्मानंतज्ञतांश्चधर्मांश्चानुविद्यव्रजंतिये॥ तेषांसर्वेषुलोकेषुकामचारोमहात्मनां २८ सर्वेषु
लोकाश्रीहविषयास्तद्विषयकःकामचारः संकल्पमात्रेणावाप्तिः २८ आत्मानमनुविद्येतिह्युपास्तिंदहरात्मनः॥ अत्रैवफ
लसंबंधोऽपूर्वोनेनविधीयते॥ फलोपास्त्योर्विधानेतुवाक्यभेदोभवेदिति २९ उपास्तिफलयोरुभयोरेकेनवाक्येनविधानेवा
क्यभेदआपतेदितिहेतोः फलसंबंधमात्रः सर्वलोककामचाररूपोविधीयतेनतूपास्तिरपीतिभावः २९ सत्यसंकल्पआकाश
स्वात्मास्वस्मिन्स्थिताअपि॥ सर्वेतस्यसंकल्पमात्रजाविषयाइमे॥ यतोनृतापिधानाश्चजातास्तस्मात्सुदुर्लभाः ३० सयदि
पितृलोककामोभवतीत्यादौयोयंयमंतमभिकामोभवतियंयंकामंकामयतेसोस्यसंकल्पादेवसमुत्तिष्ठतीत्यंतोविषया
यतोनृतापिधानाजाताः संतिअतआत्मस्थाअपिसुदुर्लभाःजाताइत्यर्थः ३० सत्यसंकल्पसिद्धेषुतेष्वात्मन्येवसत्स्वपि॥
याबाह्यविषयेतृष्णासाऽनृताख्यंपिधानकं ३१ तेषुविषयेषुसंकल्पमात्रेणावश्यंभावित्वेनस्वात्मन्येवदहराकाशो
पास्तिसाध्येषुसिद्धेषुसत्स्वपि ३१ योनात्मोपासकस्तस्यपित्रादिःकोपिवामृतः॥ नेहतंपरलोकेवालभतेदर्शनायसः ३२
सःअनात्मोपासकः ३२ यस्त्वात्मोपासकस्तस्ययेजीवंतिमृताश्चये॥ यच्चान्यच्चान्नपिलोकोनलभतेऽसंतदुर्लभं॥ तत्सर्वंहृ
द्याकाशेस्मिन्नात्माहिसर्वविदिति ३३ सदहराकाशात्मोपासकः ३३ यद्यप्यत्राकाशएतेसत्याःकामाःसदास्थिताः॥ तथा

कामैभिः ४१ आविर्भवत्यवतिष्ठते ४१ परमात्मैवैष मुक्त इति शिष्यं गुरुर्जगौ॥ अमृतं चाभयं ब्रह्म चायमित्यपि चाब्रवीत्॥
४२ सत्यनामतयाकाशाख्यं ब्रह्मोपास्यमत्राह हि॥ स्तूयते सत्यशब्दस्तु सकाराद्यक्षरार्थतः ४३ तस्य ह वा एतस्य ब्रह्मणो नाम सत्य
मिति। तानि ह वा एतानि त्रीण्यक्षराणि स१ ति२ यं३ मिति तद्यत्सत्तदमृतं। अथ यत्ति तन्मर्त्यं। अथ यद्यं तेनोभे यच्छति तस्माद्यं अ
हरहर्वा एवंवित्स्वर्गं लोकमेतीति श्रूयते। तत्र अनश्वरार्थकामृतशब्दापरपर्यायसच्छब्दगतः सकारोऽक्षरपुरुषाभिधायकत्वादमृ
तरूपो वाच्यवाचकयोरभेदोपचारात्। सकारादिवर्णैस्तद्घटितशब्दाः सदादयो लक्ष्यंते। तेन सत्यपदांतर्गतसकारेण सच्छब्दवाच्यो
ऽक्षरपुरुषो लक्ष्यते। ती इत्यत्रेकार उच्चारणार्थः। तकारेण तकारवान्मर्त्यशब्दः क्षरपुरुषाभिधायी लक्ष्यते। यकारेण यकारवान् उ
भयनियंतृशब्द उत्तमपुरुषापरपर्यायस्तु उज्ज्वलबोधको लक्ष्यते। यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः॥ अतोऽस्मि लोके
वेदे च प्रथितः पुरुषोत्तमः॥ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च॥ क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥ उत्तमः पुरुषस्त्व
न्यः परमात्मेत्युदाहृतः इति भगवद्गीतास्मृतिः। तथा च क्षराक्षरनियामकत्वेन सतोक्षराक्षरे यच्छति नियमयतीति सत्यं
सर्वोत्कृष्टं दहराकाशाख्यं परब्रह्मात्मत्वेन स्वाराज्यकामेनोपासितव्यमिति आकाशात्मोपास्तिविधिस्तु तदर्थं सत्यनामनि
र्वचनमिति छांदोग्यभाष्ये भगवत्पादैरभ्यधायि ४३ सत्यनामा य आकाशः स निजात्मत्वेऽहर्निशं॥ ध्यायन् हार्दाकाशरूपं स्वर्गं सं
प्रतिपद्यते ४४ बुध्यमानं ब्रह्मत्वयमुख्यं हृत्स्थाप्तिसाधनं॥ इति वक्तुं पुनर्ध्येयो ध्याता चात्र स्तूयते क्रमात् ४५ वर्णाश्रमादिमर्या
दासेतुत्वादिना ध्येयो दहराकाशः ध्याता नंदत्वादिना चात्र स्तूयत इति भावः ४५ अथ य आत्मा स सेतुर्विधृतिरित्यादिश्रुत्यर्थः स

गृहीतो ब्रह्मगीतायां। तथाहि। य आत्मा दहराकाशः स सेतुर्विधृतिः स्मृतः॥ असंभेदाय लोकानामेषामंतं महेश्वरं ४६ अहोरात्रेन
तरतो न मृत्युर्न जरापि च॥ न शोको नैव सुकृतं न दुष्कृतमपीश्वराः ४७ अतः सर्वे निवर्त्तंते पाप्मानः सुरपुंगवाः॥ एषोपहतपा
प्मा हि ब्रह्मलोकः स्वयंप्रभः ४८ तस्माद्धि सेतुमेतं तु प्राप्यांधः सन्सुरर्षभाः॥ भवत्यनंधो ऽविद्धः सन्नविद्धस्तादृदेवतु ४९ उपतापी
तु सन्देवा नोपतापी भवत्यपि इति ५० अपि नक्तमहर्नित्यमभिनिष्पद्यते खलु॥ सदा विभात एवैष ब्रह्मलोकः स्वयंप्रभः ५१
य एवैतं ब्रह्मलोकं विंदंति ब्रह्मचर्यया॥ तेषामेष ब्रह्मलोकः कामचारोऽखिलेष्वपि ५२ ब्रह्मैव लोको ब्रह्मलोकः ५२ यः कामिनी
विषयकृतदृष्ट्यात्यागः स एव हि मुख्यत्वेन ब्रह्मचर्यमत्रेष्टमिति भाष्यकृत ५३ शमादिकं सर्वं साधनमत्रोपक्षितमेव तत्रापि स्मा
दि बाह्यविषयवैतृष्ण्यं मुख्यत्वेनेष्टमिति भगवत्पादैश्छांदोग्यभाष्ये ब्रह्मचर्यपदेन स्त्रीवैतृष्ण्यं गृहीतमिति भावः ५३ य
ज्ञ १ इष्ट २ सत्र ३ मौनानि ४ तथैवानशनव्रतं ५॥ अराख्यण्याख्य सरसी ब्रह्मलोकगते उभे ५४ ऐरंमदीयं च सरोऽश्वत्थः सो
मसवस्तथा॥ तत्रापराजिता पूश्च मंडपं प्रभुनिर्मितं॥ हिरण्मयं नैवमादिक्रममुक्तिफलं त्वयत ५५ इरा अन्नं। अन्नमंडम
यं। ऐरंमदीयं सुरवावहं ऐरंमदीयं सरः। अमृतस्राव्यश्वत्थः। हिरण्मयं मंडपं। मंडपो स्त्रीजनाश्रयं इत्यमरः। अपराजिता
नाम्नी कार्यब्रह्मपुरी ब्रह्मणा निर्मिता ५५ यज्ञादिकं त्वयत्वो क्तं पुरुषार्थस्य साधनं॥ तत्समष्ट्यात्मकतया स्तूयते ब्रह्मचर्य
कं ५६ संपादनीयं यत्नेन निजसाम्राज्यमिच्छता॥ ब्रह्मचर्यं ज्ञानसहकारित्वावश्यकं त्विति ५७ ब्रह्मचर्यमत्रावश्यकमि
ति यज्ञादि पुरुषार्थसाधनरूपेण ब्रह्मलोकगतोपभोग्यस्वरूपफलरूपेण चावश्य संपादनीयत्वख्यापनार्थं स्तूयत इति

सर्वेणानुषंगः ५७ ब्रह्मचर्यविहीनानांब्रह्मोपास्तिंप्रकुर्वतां॥नास्तिकार्यब्रह्मलोकःकामचारोपिनास्तिवै ५८ मनसा
कल्पिताएवविषयाब्राह्मलौकिकाः॥संकल्पजाश्चपित्राद्यायेप्रोक्तास्तेपिमानसाः॥विशुद्धसत्त्वसंकल्पजन्याआविष्कृता
वहाः ५९ सार्ष्ट्यैश्वर्यंप्राप्तवतांयावदिच्छंहिसंतिते॥अतोनतेस्थूलमया इतिभाष्येनिरूपितं ६० सार्ष्ट्यैश्वर्यंप्राप्तवतां
संकल्पायैभयंतिते॥अनादिनित्यमुक्तेशसंकल्पस्याविरोधिनः॥फलाध्यायेतुर्यपादेइदंसर्वंप्रकीर्तितं ६१ सत्कार्य
वादांगीकाराज्जगत्सत्कारणात्मना॥विशेषाकारमात्रंतुमिथ्याप्रत्ययहेतुकं ६२ अतोदहरआकाशेसत्याःकामा
स्तदात्मना॥तिष्ठंतितत्प्रसादेनस्फुरंतांयांतिजानतां ६३ यस्तुहृत्पुंडरीकस्थंयथोक्तगुणकंविभुं॥उपास्तेदहराका
शंब्रह्मचर्यशमादिमान् ६४ तस्यमूर्धन्ययानाड्याहार्दानुग्रहलब्धया॥वक्तुमंतेगतिंनाडीहृत्संबंधोधकथ्यते ६५
याएताहृदयाख्यस्यनाड्यःसूक्ष्मापिनिःसृताः॥नाड्यंतःशुक्लनीलादिसौरतेजोभियोगतः॥शुक्लपिंगलनीलस्य
पीतलोहितकस्य च ६६ रसस्यपूर्णास्तिष्ठंतिवातपित्तकफात्मनः॥ ६७ नाड्यंतःप्रविष्टनीलपीतादिसौरतेजोभि
संबंधेनपरिपाकवशात्शुक्लादिभावापन्नवातपित्तकफात्मकसूक्ष्मरसस्यपूर्णाःरसेनपूर्णाइतिफलितं॥एता
हृदयसंबंधिनाड्यास्तिष्ठंतितास्वास्तुनाडीषुरविरश्मयःसंसृष्टाःसंतीतिवक्ष्यते ६६ यतोसौशुक्लनीलादि
रूपआदित्यउच्यते॥अतोनाड्यंतस्थतेजोयोगात्तत्स्थोरसस्तथा ६७ तथाशुक्लःपिंगलादिरूपः ६७ यथा

ब्र०सू०का०टि
८०

महापथो दीर्घ उभयग्रामसंततः॥ आदित्यरश्मयस्तद्वन्नाड्यादित्येषु संतताः ६८ एकोत्तरशतं नाड्यो हृत्संबद्धा इडादिकाः॥ यासा
सांह्यविधोत्रास्ति सूपयोग इतीरितं॥ सुषुम्नेतरथयोत्क्रांतिः क्रमेणानभ्यस्यते ६९ यदा समग्रंस्कृतः सन्प्रसन्नः स्वप्नमप्ययौ॥ न जानाति
तदाकाशमाभिर्नाडीभिरेति वै ७० संपन्नं तं सता पाप्मा न कश्चित्संस्पृशत्यपि॥ सौरेण तेजसा व्याप्तस्तदा नाडीगतेन सः॥ आनंद
मयकोशस्थो न हृद्दिप्रतिबिंबति ७१ ब्रह्मविद्याकृतार्थेन त्वविद्याकामकर्मणां॥ अदग्धत्वात्तद्बोधे पुनर्व्युत्थानमेति सः ७२ यदा
तु व्याधिवार्धक्यैरसामर्थ्यं गतः पुमान्॥ क्लिष्टो मुमूर्षुर्भवति तदा तूत्क्रांतयो मुकु॥ आसीनाः परितः सर्वे प्राकृजनास्त्विमामिति ७३
स यादस्मात्स्याद्देहादनुत्क्रांतो भवत्ययं॥ तावज्जानाति तान्सर्वान्स्वयं चाभ्येति मास्थितः ७४ यदोत्क्रामत्यविद्वान्स्वाच्छरीरा
दभिर्वा हि॥ सुषुम्नाभिन्ननाडीस्थैरूर्ध्वमाक्रमते स्युभिः ७५ यथाकर्मार्जितं लोकानविद्वान्संतु गच्छति॥ ७६ यथोक्तसाधनोपेतो
विद्वांस्त्वाकाशसंज्ञकं॥ उत्क्राष्ट्युपमोंकारेणात्मानं चिंतयंस्तदा॥ एति हार्दानुग्रहात्स मूर्धन्यधमनीविलात् ७७ एति ब्रह्मरंध्रांता
नु संतत सुषुम्नां प्रविश्य तद्द्वाराद्बहिरूर्ध्वं निर्गच्छति। अत्र छांदोग्यश्रुतौ स ओमिति वा होद्वा मीयत इति सामान्यमोंकारेणाका
शात्मचिंतनपूर्वकमेवोर्ध्वंगमनमादित्यरश्मिभिरित्युक्तं॥ ओमिति वा हेत्यत्र वा ह शब्दो व धारणार्थ इति भाष्येठक्तं॥ ओंकारेणैव
मिति चिंतयन्नु उत ऊर्ध्वमीयते गच्छतीत्यर्थः॥ ओंकारेणात्मचिंतनप्रकारस्तु तैत्तिरीयनारायणोपनिषदि दहरं विपाप्मं परवेश्म
भूतं हृत्पुंडरीकं पुरमध्यसंस्थं॥ तत्रापि दहरं गगनं विशोकस्तस्मिन्यदंतस्तदुपासितव्यमिति दहराकाशोपास्तिमुपक्रम्य यो वेदा
दौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः॥ तस्य प्रकृतिलीनस्य यः परः स महेश्वर इति प्रणवाभिधेयतया दहराकाशाख्यपरमात्मचिंत
नमुक्तं॥ अनेकशाखाधीताग्निहोत्रादिकर्मैक्यन्यायेनोभयशाखोक्तगुणोपसंहारेणात्र दहराकाशानुचिंतनं न्याय्यं ७७

राम:
८०

योवेदादौस्वरःप्रोक्तइतिश्रुत्यर्थईरितः॥यस्तद्व्याख्यातृभिःसोत्रस्फुटइत्यैविलिख्यते ७८ तथाहिवेदस्यचादौकथितस्तदं
तेप्रतिष्ठितोयःप्रणवःस्वरान्व्यः॥सध्यानकालेजगदेकहेतावव्याकृताख्यप्रकृतौविलीनः ७९ ध्यात्वाविराजंचहिरण्यगर्भ
मव्याकृतंचप्रणवाक्षरेषु॥विराडकारंप्रविलाप्यसत्वेतंचोप्युकारंस्प्रकृतौमकारे ८० विलापयेत्तस्यचतारकस्यलीनस्यत
स्यांप्रकृतौपरोयः॥चतुर्थमात्रात्मकतारनादेध्येयःसमुत्कृष्टतरोस्तिदेवः ८१ सोयंमहेशोविबुधैरुपास्यःसंसारबंधस्यवि
नाशनाय॥अनेनमंत्रेणखलुपूर्वमुक्तंप्रपंचितंवैगगनाख्यवस्तुइति ८२ ऊर्ध्वोर्ध्वमुक्तिमिष्यन्सएतैरेवांशुभिर्बुधः॥यावात्क्षि
प्येन्मनस्तावदादित्यंशीघ्रमेतिसः ८३ एतद्वैब्रह्मलोकस्यद्वारमादित्यउच्यते॥गंतव्योविदुषांपंथाअविदुषांनिरोधकः ८४ तदेत
स्मिन्नपृथोक्तेर्थेएषश्लोकउदीरितः॥शतंचैकाहृदयस्यनाड्यस्तासांमूर्धानमभिनिःसृतैका॥तयोर्ध्वमायन्नमृतत्वमेतिविष्वङ्ङन्या
उत्क्रमणेभवंतीति ८५ ॥ गतिशब्दाभ्यांतथाहिदृष्टंलिंगंच २ उत्तरेभ्योत्रहेतुभ्योदहरःपरमेश्वरः॥इत्युक्तंपूर्वसूत्रेयत्तदेवा
त्रप्रपंच्यते ८६ इमाःप्रजाब्रह्मलोकंगच्छंत्योहरहस्त्वमुं॥नविंदंतीहरहब्रह्मलोकगतिःश्रुतौ ८७ श्रूयतेब्रह्मलोकशब्दश्चेत्कथयं
त्विदं॥हार्दाकाशस्यपरमात्मत्वमेवसमंजसं ८८ ब्रह्मैवाहार्दाकाशाख्यंलोकोत्राहरहर्गतिः॥तथात्वेघटतेस्तोत्रेनान्यथाप्रत्यहंग
तिः ८९ घटतेब्रह्मणोलोकेषष्ठीतत्पुरुषाहतो॥कर्मधारयएवातोब्रह्मलोकपदेहितः ९० तथात्वेब्रह्मैवलोकोवाप्यस्थानमितिब्रह्म
लोकइतिकर्मधारयपक्षेहृदयस्थाकाशाख्यब्रह्मलोकंप्रतिसर्वप्राणिनांप्रत्यहंसुषुप्तौगमनंघटतेऽन्यथाब्रह्मणोहिरण्य
गर्भस्यलोकःसत्यलोकाख्योब्रह्मलोकइतिषष्ठीतत्पुरुषसमासांगीकारेतादृशेब्रह्मलोकेविदुषःसकृदेवार्चिरादिपथेनग

ब्र०सू०का०टि
८१

मनंघूटेतनाहरहः तेनाहरहर्ब्रह्मलोकंगच्छंत्यःप्रजाब्रह्मलोकंनविंदंतीत्यहरहर्गच्छंतीतिश्रुतिर्व्याकुप्येतातस्तत्पुरुषप
क्षेपूर्वपदलक्षणाःश्रुतिव्याकोपश्चेतिनिषादस्थपतिन्यायेनकर्मधारयएवब्रह्मलोकपदंन्याय्यः।तेनायोक्तावहरहर्ग
तिब्रह्मलोकशब्दोपरस्परसमभिव्याहारबलेनसौषिकाहरहर्गतिब्रह्माभिन्नलोकरूपार्थपर्यवसन्नोभ्रत्वोपास्तिप्रकरणोपक्र
मोक्तहार्ददहराकाशस्यब्रह्मात्मकतांगमयतइति।इमाःप्रजाब्रह्मलोकंगच्छंत्योहरहरित्यादिकारिकान्वलुप्यफलितार्थः ६० सूत्राक्ष
रार्थस्तु प्रत्यहापिब्रह्मलोकशब्दाभ्यामप्युपक्रमे।।ध्येयत्वेनोक्तआकाशःपरमात्मेतिगम्यते ६१ यथात्रप्रत्यहंब्रह्मलोकस्यगम
नंश्रुतं।। तथाह्यन्यत्रापिदृष्टंस्वपुप्तौगमनंश्रुतौ ६२ अन्यत्रापिछांदोग्यषष्ठाध्यायाष्टमखंडेयत्रैतत्पुरुषःस्वपितिनामसता
सोम्यतदासंपन्नोभवतीति ६२ कर्मधारयएवात्रब्रह्मलोकपदेहितः।।अस्मिन्नर्थेलिंगमिहसंप्रोक्ताहरहर्गतिः।।षष्ठीतत्पुरुषेदो
षोलक्षणेतिनवस्च्यते ६२ पूर्वपदेलक्षणेवदोषःकर्मधारयइतिचकारेणद्योत्यते ६३ धृतेश्चमहिम्नोस्यास्मिन्नुपलब्धेः ३
जगत्कारणरूपस्यप्रकृताकाशआत्मनि।।अत्रोक्तस्यमाहिम्नोस्यैतरत्रश्रुतावपि।उपलब्धेश्चदहरआकाशःपरमेश्वरः ६४
अथयआत्मासेतुर्विधृतिरेषांलोकानामसंभेदायेतिजगद्विधारकत्वापरपर्यायजगत्प्रशासकत्वरूपब्रह्मलिंगंदहरस्यैवो पर
क्तस्यान्यत्रापिश्रुतौबृहदारण्यकतृतीयाध्यायेष्टमेगार्गिब्राह्मणेएतस्यवाअक्षरस्यगार्गिप्रशासनेसूर्याचंद्रमसौवि
धृतौतिष्ठतइत्यादिनाजगद्विधारकत्वरूपप्रशासनरूपमाहात्म्योपलब्धेःप्रकृतदहराकाशःपरमात्मेत्यर्थः ६४ जगत्प्र रामः
शासकत्वेनस्यात्माविधृतिरूच्यते।।वर्णाश्रमाद्यसांकर्यहेतुत्वात्सेतुरीर्यते ६५ प्रसिद्धेश्च ४ श्रुतावाकाशशब्द ८१

स्यब्रह्मण्येव प्रसिद्धिः॥ जीवे प्रसिद्ध्यभावाच्चात्राकाशः परमेश्वरः ९६ छांदोग्य प्रथमाध्याय नवमखंडे सर्वाणिह वा इमानि भूता
न्याकाशादेव समुत्पद्यंते आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणमिति आकाशादि सर्वभूतलयोत्पत्तिहेतुत्वे
नाकाशपदस्य ब्रह्मण्येव प्रसिद्धेर्जीवे कापि प्रसिद्ध्यभावाच्च न जीव आकाशः किंतु परमात्मैव॥ आकाशो वै नामरूपयोर्निर्वहिता स्य
त्रैव चतुर्दश खंडस्थश्रुतेरत्राकाशः परमात्मा ९६ भूताकाशः प्रसिद्धोपि नात्राकाशतयेष्यते॥ यावान्वा अयमाकाशस्ताव
नेषोंतराकाशस्थितः ९७ इतिभूताकाशे दहरतुल्यमानतयेरितः॥ उपमानस्योपमेय दहराकाशतानहि ९८ नहीतीयस्यानंतरं घटत
इतिशेषः ९८ इतरपरामर्शात्स इति चेन्नासंभवात्। ५ वाक्यशेषबलेनात्र यदीशो दहरो मतः॥ तर्हि जीवस्यापि परामर्श
त्स दहरोस्त्विह ९९ इति चेन्नोक्तधर्माणामत्र जीवे असंभवात्॥ न संभवति जीवेस्मिन्पापासंस्पर्शनादिकं ८०० एष सं
प्रसादोस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचेत्यस्मिन्दहराकाशोपास्तिप्र
करणे सुषुप्त्यवस्थाभिधायि संप्रसादशब्दोपलक्षितावस्थाविशेषवद्धि हृज्जीवस्यापि परामर्शात् स एव दहराकाशत्वेनोपास्योस्त्विति
चेन्नासंभवात्। अपहतपाप्मत्वाकाशोपमेयत्वादीनां जीवे असंभवादत्र परमात्मैवाकाशः॥ श्रुतेस्त्वर्थस्तु प्रागुक्त एवास्ति॥ ८०० उत्तरा
च्चेदाविर्भूतस्वरूपस्तु ६ हार्दाकाशोपासनोर्ध्वतामेवोपासनां पुनः॥ प्राह ब्रह्माद्यपहतपाप्मत्वादिप्रकारिकां १ चिरकाल ब्रह्म
चर्यगुरुशुश्रूषणादिभिः॥ युक्तेन साधनैः पुंसा ध्यात्मनोन्वेषणोत्सुके २ विपरीतात्मावबोधनिवृत्तिर्जायते ततः॥ स्वसंवेद्योभव
त्यात्मा शास्त्राचार्योपदेशतः ३ इति ख्यापयितुं विधेः प्रजापतिनेरिता॥ अन्वेष्टव्यो विजिज्ञासितव्य आत्मेत्ययं विधिः॥

ब्र०सू०का०टि० नापूर्वः किंतु नियमविधिरित्युक्तमाकरे ४ अन्वेष्टव्यो विचार्यः श्रोतव्य इत्यर्थः विजिज्ञासितव्यः स्वसंवेद्यतामापादनीयः स
८२ गुणो निर्गुणो वात्मा ४ विपरीतात्मावबोधनिवृत्त्यैव फलप्रदा ॥ न केवलोऽपहतपाप्मत्वादिप्रकारिका ॥ दहराकाशविद्येयं
फलदेति नियम्यते ५ छांदोग्याष्टमाध्याये आदित आरभ्य खंडषट्कांतं दहराकाशोपास्तिरुक्तासा विद्या विपरीतात्मबोध
निवृत्त्यैव फलदा न केवलोपास्तिः फलदेति नियमयितुं सप्तमखंडे आदित्रयोदशखंडांतं प्रजापतीन्द्रविरोचनाख्यायिकारूप
पोक्तोपास्तिः प्रजापतिविद्येत्युच्यते । तत्रेत्थमुपक्रमः । तथाहि । य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽ
पिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानम
नुविद्य विजानातीति ह प्रजापतिरुवाच । तद्धोभये देवासुरा अनुबुबुधिरे इत्यादिः । तथा य एषोऽक्षिणि पुरुषो दृश्यते एष आ
त्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति जाग्रत्साक्षी ॥ तथा य एष स्वप्ने महीमानश्चरत्येष आत्मेति होवाचैतदमृतमभयमेत
द्ब्रह्मेति स्वप्नसाक्षी । तथा तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति सुषुप्ति ति
साक्षी अवस्थात्रयसाक्ष्येक एवेति एतं त्वेव ते भूयोऽनुव्याख्यास्यामीति प्रसवस्थमेतं त्वेव ते भूयोऽनुव्याख्यास्यामीति वाक्यपात्वा
प्रदर्शितः परमात्मा ५ सूत्रार्थस्तु । ननु जीवेऽप्यपहतपाप्मत्वादिसंभवः ॥ इत्युक्तं पूर्वसूत्रे यन्नोपपन्नं हि तत्त्वलु ६ इतरपरामर्शा
त्स इति चेन्नासंभवादिति पूर्वसूत्र इत्यर्थः ६ तथाहि । दहराकाशोपासनोर्ध्वं प्रजापतिसमीरितात् ॥ विद्यु जीवेऽप्यपहतपाप्मत्वा राम:
दिनिरूपकात् ७ श्रौतवाक्यादपहतपाप्मत्वादिकसंभवः ॥ अतो दहर आकाशो जीव एवास्त्विति हेति चेत् ८ प्रसवस्थमेतदमृतम ८२

भयमेतद्ब्रह्मेति श्रौतप्रजापतिवाक्यश्रवणाच्छ्रुतिबललब्धिकृज्जीवेप्यपहतपाप्मत्वादिसंभवोपलब्धेरेवेति पूर्वःपक्षः उत्तराच्चेतिसूत्रैक
देशाभिप्रेतइतिभावः ८ अथाविर्भूतस्वरूपास्त्विति सूत्रैकदेशेनात्रसमाधानमुच्यतइत्याह ज्ञानेनाविर्भूतनिजरूपोजीवस्त्विह
श्रुतौ॥ उत्तमःपुरुषःप्रोक्तोनतुजीवतयेस्यतः ९ नासंभवादितिप्रोक्तोहेतुरज्ञत्वनिराकृतौ॥ नासिद्धस्तेनपरमात्मैवदहरोमतः।
१० एषसंप्रसादोस्माच्छरीरात्समुत्थायपरंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतेसउत्तमःपुरुषइतिश्रुत्याविर्भूतस्वरूप
स्यजीवस्य ब्रह्मत्वेनापहतपाप्मत्वादिकमुपपद्यतेनतुजीवत्वेनरूपेणेति अपहतपाप्मत्वादिकंब्रह्मत्वलिंगमेवनजीवलिंग
मितिनासंभवादितिपूर्वसूत्रस्थोजीवस्यदहराकाशत्वनिराकरणहेतुर्नासिद्धइतिपरमात्मैवदहराकाशाख्यउपास्यइति
भावः १० अन्यार्थश्चपरामर्शः ७ नन्वत्रदहराकाशवाक्यशेषेप्रदर्शितः॥ आस्तिजीवपरामर्शःसंप्रसादपदेरितः॥अतो
त्रदहराकाशोजीवएवेतितच्छृणु ११ एषसंप्रसादोस्माच्छरीरात्समुत्थायपरंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्य
ते एषआत्मेतिदहरविद्यास्थपाठः॥ सउत्तमःपुरुषइति प्रजापतिविद्यास्थः ११ श्रुत्यर्थेघटितस्तत्रार्थस्तु स्वप्नजाग
रितस्थानरूपदेहाभिमानकः॥ सुप्तःकामत्वान्निर्विशेषस्वप्रकाशस्वरूपकः॥ सुप्तोसंप्रसादोयंस्वेनरूपेणात्रैवगति १२
पुनरूपेणजीवोयंसुषुप्तोस्वस्वरूपकः॥ सस्वयंज्योतिराकाशउत्तमःपुरुषःसतु १२ उत्तमःपुरुषःपुरुषोत्तमःपरमात्मेत्य
र्थः १३ परमात्मात्वपहतपाप्मत्वादिगुणोहृदि॥ उपास्यइत्येवमंशार्थःपरामर्शईरितः॥ नतुजीवोपासनार्थतेनाकाशइहेश्वरः॥

श्रु० सू० का० टि०
८३

एष अल्पश्रुतेरितिचेत्तदुक्तं ८ उपास्याकाशस्यहृदिदहरत्वश्रुतेरिह। आकाशोदहरोजीवइतिचेदुक्तंस्थिणु १५ यद्युक्तव्यंस
माधानमत्रतत्राक्समीरितं॥ द्वितीयपादस्याद्याधिकरणोत्थसूत्रके॥ अर्भकौकस्त्वादित्यत्र सूत्रेव्योमोपमानतः॥
१६ सर्वत्रप्रसिद्धोपदिशादित्यष्टसूत्रे प्रथमाध्यायद्वितीयपादाधिकरणेअर्भकौकस्त्वात्तद्व्यपदेशाच्च नेतिचेन्नानिचाय्य दिमा
त्वादेवंव्योमवच्चेतिसप्तमेसूत्रे एवंव्योमवच्चेतिव्योमदृष्टांतेनमनोमयःप्राणशरीरोभारूपः सत्यसंकल्पआकाशात्मेतिश्रु
तिप्रोक्तमनोमयस्येशस्याल्पमनउपाधिकत्वेनाल्पमनआश्रयत्वमणीयस्त्वंचयथासमर्थितंतद्वत्रापीतिभावः। सूत्रीपाश
ब्दवच्छेदतच्छिद्राभ्यांयथानभः॥ अर्भकौकोप्यणीयोपितथेशोव्यपदिश्यतइतिव्योमवदित्यस्यार्थः १६ अत्रैवमाख्यायिकाश्रूय
ते। तथाहि। आत्मानंज्ञातुमिच्छंतोसुरासुरपतीउभौ॥ प्रजापतिंजग्मतुःस्मगुरुमिंद्रविरोचनौ ८१७ अकुर्वाणावेव
मिथःसंविदंतौफलेर्ष्यया॥ समित्पाणीउपागत्यास्थोषतुर्ब्रह्मचर्यकं ८१८ संविदंतुल्यफलेच्छयावांगच्छावइतिसंकेतंमि
थोकुर्वाणावेवफलेर्ष्ययाममैवात्रोक्तफलेनभाव्यंनास्येतिवांछयाप्रजापतिसमीपमागत्यब्रह्मचर्यकंशरीरनियं
मपूर्वकंगुरुमनःप्रसादसंपादिकांसेवामपतुश्चक्रुः ८१८ द्वात्रिंशद्वर्षपर्यंतंगुरुसेवनपूर्वकं॥ ब्रह्मचर्यपरोद्दृष्ट्वाला
वुवाचप्रजापतिः॥ किमिच्छंतोयुवामत्रोषितवंतावुभाविति १९ तावूचतुरपहतपाप्मत्वाद्यष्टधर्मकं॥ विचार्यात्मानम
परोक्षंकरोतियःपुमान् २० सर्वलोकान्सर्वकामानाप्नोतीतिभवद्वचः॥ आवेत्तां तंविबुधावसावत्रोषितदिच्छया २१

रामः
८३

इति श्रुत्वा तावुवाच प्रजापतिरिदं वचः ॥ य एषोऽक्षिणि पुरुषो दृष्टा विज्ञायते बुधैः ॥ एष आत्मैतदमृतमभयं ब्रह्म खल्विति
२२ जाग्रद्दृष्टारमात्मानमक्षिस्थं समुदीरितं ॥ अबुध्वा ब्रह्मणा प्रोक्तं छायात्मेति विबुध्यतो ॥ छायात्मैकोऽथवानेक इति
पप्रच्छतुः पुनः २३ यश्चाक्षस्थमिमया पूर्वं दृष्टा प्रोक्तः स एव हि ॥ सर्वांतर्याम्येक एवात्मेत्यभिप्रायवान्विधिः ॥ सर्वेषाम ध्य
आत्मैक इति व तावुक्तवान्पुनः २४ तदाशयमबुध्वैव छायात्मैवोक्त इत्यमू ॥ बुध्वा तु स्त्री स्थितो दृष्ट्वा विपरीतग्रहावि
मो ॥ मा भूतामिति तौ प्राह कृपया विश्वसृट् पुनः २५ उदपूर्णशरावे स्वमवेक्ष्यात्मानमव्ययत ॥ यद्वेद विदितं तन्मां ब्रूतमित्यब्रवी
द्विधिः २६ यदत्राविदितं ब्रूतमिति वक्तुः प्रजापतेः ॥ आशयो वक्ष्यमाणेन ग्रंथेनैव प्रदर्श्यते २७ देहत्वेन गृहीतेस्य नखलो
मादिकस्य वै ॥ जलादौ दृश्यते छाया संछिन्नस्य न दृश्यते २८ आगमापायिनो दंतनखलोमादयो यथा ॥ तथा देहोप्यनि
त्योयमागमापायदर्शनात् २९ तस्य छायाप्यनित्यत्वान्नात्मा भवितुमर्हति ॥ श्रुत आत्मापहतपाप्मत्वादिधर्म
कः ३० तस्मादनित्यदेहस्य छायाप्यात्मा न देहवत् ॥ अक्षिस्थः पुरुषस्त्वात्मेत्युक्तोपि ज्ञायते न सः ३१ आवेदयिष्यतो
रिमं द्रष्टारं ज्ञापयाम्यहं ॥ इत्याशयोत्राविदितं ब्रूतमित्युक्तिमद्विधेः ३२ तदाशयमबुध्वैवं छायात्मैवोक्त इत्यमू ॥ बुध्वा
तु स्त्री स्थितो दृष्ट्वा विपरीतग्रहाववमू ॥ मा भूतामिति तौ प्राह कृपया विश्वसृट् पुनः ३३ युवां निजगृहे यद्वन्महार्हाभरणा

श्रुको ऽतिष्ठथो निर्मलौ तद्दृष्ट्वेदानीं युवां पुनः ३४ उदपूर्णशिरावेक्षमवेक्ष्यात्मानमत्रयत् । अभवेद्विदितं तन्मां ब्रूतमित्यब्रवी
द्विधिः ३५ यदत्राविदितं ब्रूतमिति वक्तुः प्रजापतेः ॥ आशयो वक्ष्यमाणेन ग्रंथेनैव प्रदर्श्यते ३६ तथा हि ॥ वस्त्रालंकृतिवत्स्व
यं दातलीपतयामतं ॥ स्वकदुःखादितद्रष्टिका दाचित्कतया ऽध्रुवं ३७ तेन देहस्तदीयं तच्छायाप्यात्माभवेन्नाहि ॥ अक्षिस्थः पु
रुषस्त्वात्मेत्युक्तो विज्ञायते न सः ३८ आवदयिष्यतो ऽरिधं द्रष्टारं ज्ञापयाम्यहं ॥ इत्याशयो ऽत्राविदितं ब्रूतमित्युक्तिमद्विधेः
३९ तदाशयमबुध्वैवं छायात्मैवेरितो मम ॥ इतीन्द्रः शातवान्देह आत्मेति तु विरोचनः ४० विपरीतग्रहो दृष्ट्वा स्वस्वदोषेण केन
चित् ॥ प्रतिबुद्धविवेकौ तौ कृपयाह विधिः पुनः ४१ य एषो ऽक्षिणि पुरुषो दृष्टो विज्ञायते बुधैः ॥ एष आत्मेतदमृतमभयं ब्रह्म
स्वात्विति ॥ जाग्रद्द्रष्टारमक्षिस्थमात्मानं प्रोक्तवान्विधिः ४१ तदाशयमबुध्वैवं स्वस्वदोषेण तावुभौ ॥ छायां देहं क्रमाद्द्रा
त्मानं स्वस्थौ प्रजग्मतुः ४२ तावप्रबुद्धौ गच्छंतौ दृष्ट्वा प्राह प्रजापतिः ॥ देवता अथवा दैत्या य एतां बुद्धिमाश्रिताः ॥ अकृ
तार्था भविष्यंतीति इत्याह प्रजापतिः ४३ कृतार्थतां मन्यमानो दैत्यानाह विरोचनः ॥ देह आत्मा देहमेव रक्षन्संपूजय
न्निमं ॥ अमुं च लोकमाप्नोति देहात्मज्ञानवानिति ४४ तस्मादद्यापि लोके ऽस्मिन्नददानमयज्ञकं ॥ अश्रद्दधानमप्रकृ
शयमिति प्राहुरार्यकाः ४५ तत्संप्रदायगा लोके सक्त्राभरणादिभिः ॥ संस्कुर्वंति विमाने तमारोप्य प्रेतविग्रहं ॥ जे
ष्यंतो ऽनयमेतेनामुं लोकमिति मन्वते ४६ प्रतिबद्धविविक्तौ तौ निजदोषेण केनचित् ॥ ब्रह्मचर्यं विना नैतौ शुद्धस्वां

तौभवविष्यतः॥ इति ध्यात्वास्वमनसि तावुपेक्षितवान्विधिः ४७ छायात्मज्ञानवानिंद्रस्त्वप्राप्यैव निजान्सुरान्॥ वि
ज्ञातायामात्मतया छायायां दोषदृष्टिमान्॥ भूत्वा पुनः समित्पाणिः प्रजापतिमुपागमत् ४८ सार्धं विरोचनेनेंद्रः समाहितम
नाभवान्॥ गतः पुनः किमायात इति प्राह प्रजापतिः ४९ इंद्रः प्रोवाचागतोस्मि दोषदृष्टिवशादिति ५० तथाहि छायात्मात्म
गवानस्मिंछरीरे साध्वलंकृते॥ यथा देहस्तथा भाति सहस्ते विमलीकृते ५१ सहस्ते विमलीकृते साध्वलंकृते वास्मिंछरी
रे यथा देहो भाति तथा छायात्मा भातीत्यर्थः ५१ एवमेव शरीरेस्मिन्स्नवत्त्रासावि लोचने॥ छिन्नांगे ध्येपि भवति यथा दे
हस्तथैव सः ५२ सः छायात्मा ५२ शरीरनाशमन्वेष छायात्मापि विनश्यति॥ अतो देहात्मविज्ञाने छायात्मावगमेपि वा॥
भोग्यं फलं न पश्यामि भोक्तुरेवाध्रुवत्वतः ५३ भोग्यं फलं यत्प्रागुक्तं स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्त
मात्मानमनुविद्य विजानातीति भगवतो वचो वेद्यंत इति ५३ अतः समित्करो हंत्वामात्मानं प्रष्टुमागमं॥ इतींद्रवचनं
श्रुत्वा तमुवाच प्रजापतिः ५४ तथाहि इंद्र त्वयैष आत्मान छायैव स्यगतं हि यत्॥ तदेवमेवक्तत्तेंद्र पुनः प्राह प्रजापतिः ५५
योक्षिण्युक्तो मया पूर्वं द्रष्टात्मा ध्येनमेव तं॥ पुनर्वक्ष्याम्यविज्ञातं त्वयादोषेणकेनचित् ५६ वसकर्तुं ब्रह्मचर्यं पुनर्द्वात्रिंश
तं समाः॥ इति प्रजापतेर्वाक्यं तदाकर्ण्य कृतव्रतं॥ आत्मानं ज्ञातुमिच्छंतमिंद्रमाह प्रजापतिः ५७ तथाहि य इंद्र आत्माप
हतपाप्मत्वाद्यष्टधर्मकः॥ य एषोक्षिणि पुरुषो दृश्यते लि इति वर्णितः ५८ सैवैष स्वप्न आत्मीयैः पूज्यमानो मनोरमान्॥ स्व

प्रद्रष्टानुभवतिविषयान्स्वप्ननिर्मितान् ५८ सएषएवसैवैषइतिसंहिता सेषदाशरथीरामइत्यादिवत् सोऽचिलोपेचेत्पादपू
रणमितिसपादसप्ताध्यायीस्थसूत्रेणसुलोपः ५९ एषआत्मेतदमृतमभयंब्रह्मखल्विति॥ इतिप्रजापतेर्वाक्यंतदाकर्ण्यसुराधि
पः ६० देहच्छायातिरिक्तंतंस्वप्नस्थंदेहमेवहि॥ बुध्वात्मानंस्वस्थचित्तोजगामाभिमतांदिशं ६१ अप्राप्यैवसुरानिंद्रःस्वाप्नदेहा
त्मदर्शने॥ दोषंदृष्ट्वापरावृत्यप्रजापतिमुपागमत् ६२ मघवन्मद्वचनतः समाहितमनाभवान्॥ गतःपुनःकिमायातइतिप्रा
ह प्रजापतिः॥ इंद्रःप्रोवाचागतोस्मिदोषदृष्टिवशादिति ६३ तथाहि॥ जाग्रज्जाग्रेयद्यपीदमंधंस्राममथापिसः॥ स्वाप्नदेहा
त्मकोह्यात्मा नंधोस्राममश्रवदृश्यते ६४ नदुष्यत्यस्यदोषेण नवधेनास्यहन्यते॥ देहस्राम्येणनस्रामोथापिदोषात्रदृश्यते ६५
स्राम्यंस्त्ववन्नासाविलोन्वनत्वं ६५ तथाहि॥ स्वप्नेविद्रावयंतीव घ्नंतीवैनोहिकेचन॥ किंचाप्रियस्यवेत्तेवरोदितीवेषदृश्यते ६६
विद्रावयंतिभीषयंति ६६ घ्नंतितिस्वेवेत्येवकारइवार्थकइहश्रुतौ॥ इवशब्दैःसाहचर्यादितिव्याख्यातमाकरे ६७ आकरोरत्ना
दिखनिस्तत्सदृशेप्रकृतस्यार्थव्याख्यानरूपेभगवत्पादीयछांदोग्यभाष्येव्याख्यातं ६७ अतःस्वप्नस्थदेहात्मविज्ञानेदो
षदर्शनात्॥ भोग्यंफलंनपश्यामिभोक्तुःशोकादिमत्वतः ६८ पृष्टआत्मात्वपहतपाप्मत्वाद्यष्टधर्मकः॥ त्वयावर्णितइत्यार्याः
कथयंतिभवद्वचः ६९ अतःसमित्पाणिरहमात्मानंप्रष्टुमागतः॥ इतींद्रवचनंश्रुत्वातमुवाचप्रजापतिः ७० इंद्रत्वयैषस्वाप्नोन
ह्यात्मेत्यवगतंतुयत्॥ तदेवमेवेत्कल्वेंद्रपुनःप्राहप्रजापतिः ७१ योक्षिण्युक्तःस्वप्नगःसद्दृष्टात्माद्येनमेवतं॥ पुनर्वक्ष्याम्यविज्ञा

तंत्वयादोषेणकेनान्वित ७२ वसकर्त्तुंब्रह्मचर्यंपुनर्द्वात्रिंशतंसमाः॥ इतिप्रजापतेर्वाक्यंतदाकर्ण्यकृतव्रतः॥ आत्मानंज्ञातु
मिछंतमिंद्रमाहप्रजापतिः ७३ तथाहि॥ यउक्तआत्मापहतपाप्मत्वाद्यष्टधर्मकः॥ यएषोक्षिणिपुरुषोदृश्यतोस्मितिवर्णितः
७४ सएषस्वप्नआत्मीयैःपूज्यमानोमनोरमान्॥ स्वप्नेद्रष्टानुभवतिविषयान्स्वेच्छानिर्मितान् ८७५ अत्रश्रुतौयत्रैत
पदंजाग्रत्स्वप्नपरामर्शत्रयकंतंपरमव्ययं ७५ सएषसुप्तोनिखिलःसंप्रसन्नस्वरूपकः॥ नाविजानातिवैस्वप्नंमनोवृत्तेर
नुद्भवात् ७६ संप्रसन्नोनुद्भूतसुखदुःखःसन्नज्ञानसाक्षित्वेनाज्ञानवृत्तिभिः सूक्ष्मसुखमनुभविता सुषुप्तोसंप्रसीद
तीतिप्राज्ञोजीवःसुषुप्तिद्रष्टासंप्रसादशब्देनश्रुतावुच्यते ७६ एषआत्मेतदमृतमभयंब्रह्मखल्विति॥ इतिप्रजापतेर्वा
क्यंतदाकर्ण्यसुराधिपः ७७ सविशेषज्ञानशून्योयंचिद्रूपोविरिंचिना॥ आत्मोक्तइतिविज्ञायप्राव्राजीच्छांतमानसः ७८
अप्राप्यैवसुरानिंद्रोह्यचिद्रूपात्मदर्शनं॥ दोषंदृष्ट्वापरावृत्यप्रजापतिमुपागतः ७९ मघवन्नद्यचनतःसमाहितमनाभवा
न्॥ गतःपुनःकिमायातइतिप्राहप्रजापतिः॥ इंद्रःप्रोवाचागतोस्मिदोषदर्शनवशादिति ८० तथाहि॥ नाहंखल्वयमित्या
दिवचनैर्दोषमुक्तवान्॥ अहेतिनुनिपातोयंखेदार्थकइहश्रुतौ ८१ यथाजाग्रत्स्वप्नकालेह्यहमस्मीतिबुध्यति॥ इमानिभू
तानीत्येवंसुषुप्तोनैवबुध्यति ८२ अतोविनाशंसंप्राप्तइवभातिसुषुप्तिगः॥ एषआत्मेतदमृतमितितत्तुक्तंत्वयाखलु ८३

अतःकारणदेहात्मदर्शने दोषदर्शनात्॥ भोग्यंफलंनपश्यामिभोक्तुर्दृष्टेरभावतः ८४ दृष्टेर्भोग्यफलविषयकज्ञानस्याभावात्
८४ अतःसमित्करोहंत्वामात्मानंप्रष्टुमागतः॥ इतीन्द्रवचनंश्रुत्वातमुवाच प्रजापतिः ८५ इंद्रकारणदेहोयंनात्मेत्येव
गतंत्वयत्॥ तदेवमेवेत्थ शक्रेंद्र पुनःप्राहप्रजापतिः ८६ पर्यायैस्त्रिभिरप्येकमेवात्मानंमयेरितं॥ पुनर्वक्ष्याम्यविज्ञातंत्वया
दोषेणकेनान्वित ८७ पर्यायत्रितयप्रोक्तादस्मादन्यंनकंचन॥ आत्मानंसंप्रवक्ष्यामिव्याख्यास्याम्येनमेवहि॥
अन्यत्रशब्दस्यैवान्यमित्यर्थोभाष्यईरितः ८८ पर्यायावितये ब्रह्मचर्यचरपातस्त्वं॥ अल्पोवशिष्टोदोषोस्तितद्दो
षस्यापनुत्तये॥ वसकर्तुंब्रह्मचर्यंपुनःपंचसमाइह ८९ इतिप्रजापतेर्वाक्यंतदाकर्ण्यकृतव्रतं॥ आत्मानंज्ञातुमिच्छंतमिं
द्रमाहप्रजापतिः ९० वर्षाण्येकशतंहीद्रोप्यात्मज्ञानस्यालिप्सया॥ प्रजापतेःसमीपेवैब्रह्मचर्यंचचारह ९१ अतोनास्त्येवपुरु
षार्थोतिरंज्ञानतोधिकं॥ निरंकुशानंदहेतुरितिप्राकुर्मनीषिणः ९२ उक्तंयदिंद्रमाहोतिविशदीक्रियतेहितत्॥ तथाहि॥ इदंश
रीरंमघवन्मर्त्यंग्रस्तंहिमृत्युना॥ अशरीरस्यामृतस्यतदधिष्ठानमात्मनः ९३ स्वाधिष्ठानेशरीरेस्मिन्नविशन्नात्मेवसर्व
दा॥ प्रियाप्रियाभ्यांग्रस्तःसशरीरोहमितिभ्रमं न ९४ शरीरेणासहाहमितिशरीरतादात्म्यभ्रांतिंप्राप्तःसंन्प्रियाप्रिया
भ्यांपर्यायेणसर्वदाग्रस्तोभवत्यर्थः ९४ शरीरत्रयेतादात्म्यमापन्नस्यकदापिन॥ प्रियाप्रियवियोगोस्तितद्धीनंस्य
शतोनंते ९५ तद्धीनंशरीरत्रयतादात्म्यभ्रांतिराहितंसच्चिदानंदस्वरूपोहमित्यात्मानंजानंतंतेप्रियाप्रियेनस्पृशतोन

संसजन्य तः ९५ स्पर्शास्पर्शौस्सतोदृष्टोलोकेनैवासतःक्वचित्॥ अतःस्फ्रुतौन्वसन्तेवनासन्नात्मेतिबोध्यते ९६ बोध्यतेअश
रीरंवावसंतंप्रियाप्रियेनस्पृशतः। अत्तोवैसशरीरःप्रियाप्रियाभ्यां। इतिश्रुतिभ्यांज्ञाप्यते। तेनयविनाशमेवापी तोभवतिना
हमत्रभोग्यंपश्यामीदृक्संशयप्रश्नस्योत्तरंतेदलप्रायमितिभावः ९६ शिरःपाण्याद्यंगहीनाअशरीराउदाहृताः॥ अशरीरोवायु
रभ्रंतथाविद्युद्बलाहकः ९७ अभ्रंनिरुदकोमेघः। बलाहकःसजलः ९७ यथैतान्यशरीराणिरवस्थानिरवसरूपतां॥ संप्राप्यो
र्ध्वकाशतयादृश्यंतेशरदादिषु ९८ तान्येवशिशिरापायेवैलक्षण्यमवाप्यखात्॥ सावित्रंयेषगंज्योतिःप्राप्तलसानि
तेनवै ९९ तेनसावित्रज्योतिषातत्सानि ९९ स्वेनरूपेणवर्षर्तौवाविर्भावंव्रजंतिवै॥ एवमेवैषजीवस्तत्त्वमसीतिप्रबोधि
तः॥ एतच्छरीरत्रितयेसक्ताहंममताग्रहं १०० स्वयंप्रकाशमात्मानंसाक्षाद्देवानुभूयवै॥ आविर्भवत्यात्मरूपेणैवनागं
तुकात्मभिः १ योभिनिष्पद्यतेस्वेनरूपेणाबाधितेनसः॥ व्याकृताव्याकृतात्मभ्यामुत्तमःपुरुषःखलु २ यस्मात्क्षरम
तीतोहमक्षरादपिचोत्तमः॥ अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः ३ इत्युक्तमोयःपुरुषोगीतासुहरिणोरितः॥ तदस्मे
द्येमुक्तजीवेनयाश्रुत्यात्रबोध्यते ४ विलीनकरणग्रामःसुषुप्तोसंप्रसीदति॥ इतिजीवःसंप्रसादशब्देनेहविवक्षितः ५
प्राप्तोविदेहकैवल्येसप्राप्यनिरविलात्मतां॥ तस्मिन्सर्वस्यात्मभूतेस्वस्मिंस्तादात्म्यतोवसन् ६ सःसंप्रसादः। तत्रतस्मि
न्स्वस्मिन्स्वेनरूपेणस्वस्थतयासर्वात्मभूतःसंनपर्येतिजक्षणादिरूपविहारेणविहरतीतिसइत्यस्यपर्येतीतितिङं

ज०स्व०भ्र०टि
८७

तेनाग्रिमती यश्लोकस्तेनान्वयः ६ कश्चित्तत्त्वजीवरूपैर्हसन्भक्ष्यापिभक्षयंन्॥ प्राप्नोत्यभीप्सितान्कामान्निखिलस्यालभ्य
वतः ७ केचित्संकल्पमात्रेण संभूतैर्ब्रह्मलौकिकैः॥ स्त्रीभिर्यानैर्ज्ञातिभिर्वाक्रमसुक्त स्वरूपतः। मनसैवक्रीडमानो रममाणश्च
तैः सह।८।स्त्रीपुंसयोः सन्निकर्षादिदं जातं निजं वपुः। अस्मरन्नैव विहरति परब्रह्मस्वरूपतः।९।यथेकामाः श्रेष्ठजीवैरनुभूताभवं
तिते। सर्वात्मभूतमुक्तेन संबध्यंतइतिश्रुतिः। ब्रह्मविद्यामरुच्यर्थमात्मज्ञानप्रशंसति १० अथ। सिंहावलोकनन्यायात्प्रश्नमिदंमनो
गतं। तालाबदुत्तरं वक्तुं ग्रंथ आरभ्यते ग्रिमः ११ तथाहि यएषोक्षिणि पुरुषो दृश्यते विबुधैर्धिया। एष आत्मैतदमृतमभयं ब्रह्म
स्वाल्पिति १२ यदुक्तं तत्र स कथं साक्षादक्षिणि दृश्यते॥ तद्वक्तव्यमिति प्रश्ने प्राहोत्तरमिदं विधिः १३ प्रश्ने इदं मानसप्रश्नो।
तथाहि। यथार्थवस्तुस्फुटं बोद्धुमस्त्वेवाथवा वपुः॥ तत्र प्रयुक्तो भवति तथा प्राप्ताइदं वपुः १४ सदा चेष्टयितुं गोत्र प्रयुक्तः पर
मात्मनो॥ देहेनादेहिनां कर्मफलभोगमभीप्सता १५ देहेस्मिन्निंद्रियद्वारा हृदि वृत्तिरुदेति या॥ दर्शनश्रवणाद्याख्या
व्याप्नोति विषयं ह्यियो १६ तदुक्तं विद्यारण्यपादैः॥ बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटं॥ तत्राज्ञानं धिया नश्ये
दाभासेन घटः स्फुरेदिति १६ तयोपलक्षितं ज्ञानं तत्तद्विषयकं ह्ययत्॥ प्रतीयते चक्षुरादौ व्यापारैर्दर्शनादिभिः॥ स आ
त्मेति रव्यापयितुमथ यत्रेत्युपक्रमः १७ घटादिविषयकदर्शनादिवृत्तिसाक्षिकं ज्ञानं स्वप्रकाशं केवलं बोधमात्रस्व
रूपं विषयोपलक्षितं स आत्मेति रव्यापयितुमित्यर्थः॥ यस्मिन्स्याश्मिन्श्वास्ति लोके बोधस्तत्तदुपेक्षणो॥ यद्बोधमा

राम:
८७

त्रंतद्रूसे स्येवंधीरात्मनिश्चयइतिविद्यारण्यपादः।निस्वासिद्धेज्ञानेतत्तदिंद्रियद्वारा ज्ञानविषयेचविषयविषयिभावापाद
कादर्शनश्रवणादयोंतःकरणवृत्तिविशेषरूपव्यापारा लोकेज्ञानत्वेनोपचर्यंतेनतुतेज्ञानस्वरूपाः।ज्ञानंतुचिद्रूपंसाक्षित्वेनो
पलक्षितंब्रह्मैवेतिवेदांतसिद्धांतः।अथयश्चैतदाकाशमनुविषण्णमथयोवेदेदंजिघ्राणीतिअथयोवेदेदमभिव्याहराणीत्यादिषु
तिवाक्यश्रूयमाणाअथशब्दा आत्मस्वरूपावबोधकदर्शनश्रवणावघ्राणनादिलिंगानांमध्येएकैकस्यापिस्वातंत्र्येणात्मावबोधक
त्वपरवाक्यारंभद्योतकाः १७ अथयस्मिन्देह एतत्कृष्णतारोपलक्षितं।छिद्रात्मकमाकाशंतत्रानुगतमिंद्रियं।चक्षुः स आत्मातत्स्थः
सन्चाक्षुषःपुरुषोमतः १८ तत्कृष्णकरूपिवस्तूपलब्ध्यपरनामकं।यद्दर्शनंतदुत्पत्तौकरणंचक्षुरिंद्रियं।१९ अनेनाथयश्चैतदाकाशमनु
ही विषण्णंचक्षुःसचाक्षुषःपुरुषोदर्शनायचक्षुरितिश्रुत्यर्थःसंगृहीतो भवति।अनुविषण्णंअनुगतं १९ उक्तोयोहृद्यपहतपाप्मत्वाद्यष्टधर्म
कः।परमात्माकाशसंज्ञोयद्रूपोजीवउच्यते २० एषसंप्रसादोस्माच्छरीरात्समुत्थायपरंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतेसउत्त घ
मःपुरुषः।तत्वमसिश्वेतकेतो।सयोहवैतत्परमंब्रह्मवेदब्रह्मैवभवतीत्यादिश्रुतिभिरितिशेषः २० योवस्थात्रितयेसाक्षीसएवात्मात्रच
क्षुषि।दर्शनाख्येनलिंगेनद्रष्टेतिज्ञायतेबुधैः २१ श्रुत्यानयाक्षिपुरुषोदृश्यतेज्ञानिभिःकथं।इतीदृमानसप्रश्नोत्तरंभवतिकीर्तितं २२
द्रष्टृत्वेनाक्ष्णिविज्ञातस्यात्मनोज्ञानरूपता।नतुज्ञानाश्रयोरूपमभिव्यापयितुंविधिः।स्वरूपमात्मनःप्राहयोवेदेतिपुनःपुनः २३ योवेदे
दे दंजिघ्राणीति१ योवेदेदमभिव्याहराणीति२ योवेदेदंशृणवानीति३ योवेदेदंमन्वानीति४ सआत्मेतिपुनःपुनराहेत्यर्थः २३ द्रष्टृपदर्शनका

लीनात्मसत्ताज्ञानकर्तृत्वं। नव्यापृततैयास्तूर्यप्रकाशस्येवकर्तृता २४ प्रकाशरूपस्तूर्यस्यदृश्यदर्शनकालिका। स्वरूपसत्तालोकेहीष्टा
प्रकाशनकर्तृता २५ एवंद्रष्टेत्यत्रात्मनोदर्शनकर्तृता बोध्येति भावः। नव्यापृततयाकर्तृतानव्यापारवत्त्वेनेत्यर्थः। दर्शनायचक्षुरित्यत्रेंद्रि
यार्थसंनिकर्षजन्या। नित्यसच्चिद्रूपज्ञानावच्छेदिकांतःकरणवृत्तिर्दर्शनं। द्रष्टेत्यत्रतुनित्यज्ञानमेवदर्शनत्वेनविवक्षितं। द्रष्टेत्यस्यज्ञानाभि
न्नसत्तायास्तादात्म्येनाश्रयआत्मेत्यर्थः सविताप्रकाशकइतिवत्। प्रकाशकइत्यस्यदृश्यप्राणिनिष्ठदृश्यदर्शनकालीनप्रकाशसत्ताश्र
यः सवितेत्यर्थः। द्रष्टेत्यत्रदृशिधातोर्दृश्यदर्शनकालीननित्यज्ञानाभिन्नसत्तायालक्षणातादात्म्येनतदाश्रयस्तृच्प्रत्ययार्थः। धातूपात्तव्यापा
राश्रयत्वंहिवैयाकरणमतेकर्तृत्वं। यथानैयायिकमतेकृत्याश्रयत्वंकर्तृत्वं रथोगच्छतीत्यत्ररथेकृतेर्बाधात्लटोव्यापारेलक्षणा। एवं
द्रष्टेत्यत्रदृशेरुक्तसत्तायांलक्षणातःकरणवृत्तिरूपदर्शनस्यात्मनिबाधात् २५ जिघ्राण्यभिव्याहराणिमन्वानिशृणवानिच। इतिय
स्त्रिपुटींविदसआत्माज्ञप्तिमात्रकः॥ २६॥ त्रिपुटींदृश्यदर्शनदर्शनाश्रयाहंकारात्मकइष्टात्मकानांपुटानांसंघः। तांसमाहारंयोवेदसआ
त्मा। दृश्यदर्शनसज्ञानपरपर्यायवेदनसत्तायास्तादात्म्येनाश्रयत्वमेववेदनकर्तृत्वं॥ अतएवज्ञप्तिमात्रस्वरूपः॥ २६॥ मनोस्यदैवंकरणंनेत
रैरिंद्रियैःसमं॥ यतस्त्रैकालिकांतःस्थबाह्यार्थज्ञानसाधनं॥ चष्टेसर्वमनेनेतिचक्षुरितिश्रुतेर्मनः॥ २७॥ चष्टेजानाति॥ २७॥ सर्वज्ञई
श्वरोदेवोनेनमनसाखिलान्। वेत्त्येकदैवविषयान्निजसंकल्पमात्रजान्। इतिदैवंचक्षुरितिमनःश्रुत्यानयोच्यते॥ २८॥ मनोदैवंचक्षुरि
रित्यनयामनोस्यदैवंचक्षुरितिश्रुत्योच्यते। योगिनोद्विविधाःप्रोक्तायुक्तयुंजानभेदतः। युक्तस्यसर्वदाभानंचिंतासहकृतोपरः। इत्यभियुक्तोक्तेः

खिलार्थः। अवस्थासाक्षिबोधार्थमवस्थात्रयमीरितं। १ ३८ एतेन स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मा
नमनुविद्य जानातीति ह प्रजापतिरुवाच प्रजापतिरुवाचेति श्रुतेरर्थः संगृहीतो भवति। प्रजापतिरुवाचेतिवाक्याभ्यासो दह
रविद्यासमाप्त्यर्थः। प्रथमपादादितृतीयपादीयचतुर्थे क्षतिकर्माधिकरणांतकारिकाः। १८ १६ दहराधिकरणे पंचमे कारिकाः
१ २२ तैत्तिरीयनारायणोपनिषद्गतदहरोपास्तिसंग्राहकवृत्तानि। ३६ आदितः संकलनायां कारिकाः २७४ दहरविद्यास्मा
ला स्यनंतरं श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्ये अश्व इव रोमाणि विधूय पापं चंद्र इव राहोर्मुखात्प्रमुच्येत्यादिः खंडिकाद्वयात्मको
मंत्राम्नायः पावनो जपार्थश्च ध्यानार्थो वेत्युक्तं छांदोग्यभाष्ये। तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्य
आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिरेकेणेत्यादिः पंचदशी अष्टमाध्याय चरमखंडिका विद्याग्रहणसंप्रदा
यप्रदर्शनार्था। अत्र ब्रह्मा हिरण्यगर्भः परमेश्वरो वा स प्रजापतये स्ववंश्याय ब्रह्मा मरीच्यादिस्वपुत्रादिद्वारा कश्यपाय स स्वपुत्र विवस्वद्द्वा
म रामनवे वैवस्वताख्याय सप्तमे मनवे स प्रजाभ्यः स्वपुत्रेक्ष्वाकादिद्वारा तथेतदध्यात्मज्ञानमुवाच। तदुक्तं गीताचतुर्थाध्यायादौ। इमं विवस्व
ते योगं प्रोक्तवानहमव्ययं। विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्। एवं परंपराप्राप्तमिमं राजर्षयो विदुरिति। ७३८॥ श्री०॥ द्रविडपाठा
नुसारेण श्रीविद्यारण्यपादव्याख्यातायां तैत्तिरीयनारायणीयोपनिषदो मध्ये प्रोक्तं दहराकाशोपास्तिप्रकरणं लिख्यते। तथाहि। दहरं वि
पाप्मं परवेश्मभूतं हृत्पुंडरीकं पुरमध्यसंस्थं॥ तत्रापि दहरं गगनं विशोकस्तस्मिन्यदंतस्तदुपासितव्यं। १॥ यो वेदादौ स्वरः प्रोक्तो वेदांते

ब्र॰स॰का॰टि॰ ६०

चप्रतिष्ठितः॥तस्यप्रकृतिलीनस्ययःपरःसमहेश्वरः॥२॥सहस्रशीर्षंदेवंविश्वाक्षंविश्वशंभुवं॥विश्वंनारायणंदेवमक्षरंपरमंप्रभुं॥३॥
विश्वतःपरमंनित्यंविश्वंनारायणꣳहरिं।विश्वमेवेदंपुरुषस्तद्विश्वमुपजीवति॥४॥पतिंविश्वस्यात्मेश्वरꣳशाश्वतꣳशिवमच्युतं।
नारायणंमहाज्ञेयंविश्वात्मानंपरायणं॥५॥नारायणपरंब्रह्मतत्त्वंनारायणःपरः।नारायणपरोज्योतिरात्मानारायणः
परः॥६॥यच्चकिंचिज्जगत्यस्मिन्दृश्यतेश्रूयतेपिवा।अंतर्बहिश्चतत्सर्वंव्याप्यनारायणःस्थितः॥७॥अनंतमव्ययंकविꣳ
समुद्रांतंविश्वशंभुवं।पद्मकोशप्रतीकाशंहृदयंचाप्यधोमुखं॥८॥अधोनिष्ट्यावितस्त्यांतेनाभ्यामुपरितिष्ठति।हृदयंतद्विजा
नीयाद्विश्वस्यायतनंमहत्॥९॥संततꣳशिराभिस्तुलंबत्याकोशसन्निभं।तस्यांतेसुषिरꣳसूक्ष्मंतस्मिन्सर्वंप्रतिष्ठितं॥१०॥
तस्यमध्येमहानग्निर्विश्वार्चिर्विश्वतोमुखः।सोग्रभुग्विभजन्तिष्ठन्नाहारमजरःकविः॥११॥संतापयतिस्वंदेहमापा
दतलमस्तकं।तस्यमध्येवह्निशिखाअणीयोर्ध्वाव्यवस्थिता॥१२॥नीलतोयदमध्यस्थाविद्युल्लेखेवभास्वरा।नीवारशूक
सत्यंपरंब्रह्मपुरुषंकृष्णपिंगलं।वत्तन्वीपीताभास्वत्तनूपमा॥१३॥तस्याःशिखायामध्येपरमात्माव्यवस्थितः।सब्रह्मासशि
वःसेंद्रःसोक्षरःपरमःस्वराट्॥१४॥ऋतꣳसत्यंपरंब्रह्मपुरुषंकृष्णपिंगलं।ऊर्ध्वरेतंविरूपाक्षंविश्वरूपायवैनमः॥१५॥इति
पंचदशमंत्रात्मिकानारायणीयोपनिषद्गतादहराकारासंज्ञिकासगुणब्रह्मविद्या॥सहस्रशीर्षमित्याद्यैरुक्तंतत्त्वंपरेशि रामः ६०
तुः।पद्मकोशप्रतीकाशमित्याद्युक्तप्रकारतः॥१॥चिंतयेदितितास्त्वयेमंचास्योपास्तितुर्मुनेः।उपास्यदेववर्यस्यप्रणस्यैमंत्र

युक्तईश्वरसार्ष्टिर्ऐश्वर्यंप्राप्तःक्रममुक्तश्च।सोऽकामयतबहुस्यांप्रजायेयेति॥सतपोतप्यत।सतपस्तप्त्वा।इदंसर्वमसृजत।यदिदंकिंचइ
तितैत्तिरीयश्रुतेर्जगतईशसंकल्पप्रभवत्वं।तपआलोचनइतिधातुःसतपो।तप्यतेत्यत्र।नतुतपसंतापइतिधातुः॥२७॥योहिमुक्तोब्रह्म
वमापन्नोब्रह्मविद्यया।अनाद्यविद्यारचितदेहेंद्रियमनोक्षोभिः।वियुक्तोव्योमस्थधूमवत्।आप्तोनिखिलात्मकतां॥२८॥ब्रह्मैवसन्ब्रह्माप्येति व
तिश्रुतेर्ब्रह्मस्वरूपस्यापिजीवस्याब्रह्मत्वभ्रमवतोब्रह्मविद्ययातत्त्वमसीत्यादिमहावाक्यजन्ययाहंब्रह्मास्मीतिनिर्विकल्पकचरमवृत्तिरेवब्र
ह्मभावावाप्तिर्विस्मृतकंठमणेःस्मरणमेवकंठमणिप्राप्तिरितिवत्।देहेंद्रियादिभिर्जीवोपाधिभिर्वियुक्तोव्योमवच्छुधाब्र
ह्मभावमापन्नोमुक्तोनिखिलात्मनामाप्तःप्राप्तोभवतीतिसवाएषएतेनदैवेनचक्षुषामनसैतान्कामान्पश्यन्रमतेयएतेब्र
७ ह्मलोकइतिश्रुतिगतस्यसइतितच्छब्दस्यविवक्षितोर्थः।सहिमुक्तोब्रह्मभावमापन्नइतिसार्थकारिकयादर्शितोभवति।सवा यो
एषइतिश्रुत्यर्थस्त्वग्रिमग्रंथेनोच्यते॥२९॥सवैमुक्तोह्येषआत्माकाशाख्यःपरमेश्वरःदैवेनचक्षुषैतेनमनसोपाधिनाक्र
तु।साक्षीसन्विषयानेतान्संपश्यन्रमतेस्थिरः॥३०॥दैवचक्षुर्भूतमनआख्यतदुपाधिश्चिच्छक्तिः।सर्वात्मकोमुक्तोदैवचक्षुर्भू
तमनउपाधिनापरमेश्वरव्यवहारभाग्भूत्वासर्वजगत्साक्षीसन्निशंरमते।विश्वंदर्पणदृश्यमाननगरीतुल्यंनिजांतर्गतंपश्य
न्नात्मनिमाययाबहिरिवोद्भूतंयथानिद्रयायःसाक्षात्कुरुतेप्रबोधसमयेस्वात्मानमेवाद्वयं।परास्यशक्तिर्विविधैवश्रूयतेस्वाभा
विकीज्ञानबलक्रियाचेतिश्वेताश्वतरश्रुतिः।त्वमकरणःस्वराडखिलकारकशक्तिधरइतिभागवतश्रुतिगीताश्च।ॐ करतेतेमांतूंसप

स्यत्रमतइत्युच्यतइत्याकांक्षायांतान्विषयान्विशिनष्टिश्रुतिर्यएतेब्रह्मलोकइतितदेतत्कारिकयासंगृह्णातिब्रह्मैवलोकइति
ब्रह्मैवलोकोयस्तस्मिन्यएतेनिजमायया।संकल्पजन्याविषयास्तान्पश्यन्त्रमतेनित्यं ३१ इतीदंप्रतिप्रजापतिर्दहरविद्यामुप
दिश्यतांविद्यांसर्वात्मत्वविशेषेणोपदेष्टुमुपक्रमतइतितात्पर्येणाहश्रुतिस्तंवाएतमित्यादिनेतिप्रजापतिरुवाचेत्यंतेनेत्याह
तंवाएनमितितिसृभिः।तंवाएनंमुक्तजीवस्वरूपमखिलेश्वरं।हार्दाकाशाख्यमात्मानंदेवेंद्रप्रमुखामराः।उपासतेत्वपहतपाप्मत्वा
द्यष्टधर्मकं ३२ एषआत्मापहतपाप्मा १ विजरो २ विमृत्यु ३ र्विशोको ४ विजिघत्सो ५ ऽपिपासः ६ सत्यकामः ७ सत्यसंकल्पः ८
सोन्वेष्टव्यःसविजिज्ञासितव्यइत्युपक्रम्यतंवाएतंदेवाआत्मानमुपासतइत्यंते ३२ तस्मादुपासनात्तेषांसुराणांनिखिला
अपि।प्राप्तालोकास्तथासर्वेकामाःसंकल्पमात्रतः ३३ एतेनतस्मात्तेषांसर्वेचलोकाआत्ताःसर्वेचकामाइतिश्रुतेरर्थःसंगृ
हीतोभवति ३३ एवंयःपुरुषोलोकेशास्त्राचार्योपदेशतः।विचार्यतमात्मानमपरोक्षंकरोतिवै।ससर्वात्मतयासर्वान्लोका
न्कामानुपैतिहि ३४ यस्तूपास्तेतमात्मानंसहिसंकल्पमात्रतः।सर्वान्लोकान्सर्वकामानाप्नोतिक्रममुक्तितः ३५ इतिप्रजा
पतिर्ज्ञेयब्रह्मविद्यास्तुगर्भितां।दहरोपास्तिमाहेतिश्रुतिराहहितैषिणी ३६ इयमाख्यायिकाछांदोग्याष्टमाध्यायगाम
या।विरताभगवत्पादकृतभाष्यानुसारतः।३७ आत्मापहतपाप्मादिःपरमात्मापरप्रभुमान्।दहराकाशसंज्ञोत्रोपास्यउक्तो।

उच्यते ॥ २ ॥ वेदव्याख्यानविज्ञश्रीविद्यारण्यमुनीरितः । श्रुत्यर्थः कथ्यतेस्माभिः संतः कुर्वंतिहादरं ॥ ३ ॥ विद्यारण्यादिकाचार्यैर्वेद
दार्थवेदिभिः । श्रुत्यर्थः कथितोग्राह्यः कोन्यः श्रुत्यर्थतत्त्ववित् ॥ ४ ॥ ललाटिकादिकप्रोक्तं न्यूनाधिक्यं हरीशयोः । कार्यहितार्थिभिः सद्भि
र्नैवमानविरोधतः ॥ ५ ॥ श्रीमन्नारायणीयेस्मिन्विस्पष्टंप्रतिभासते । हरेर्हरस्यचाभेदोभेदमाहुर्मुधाबुधाः ॥ ६ ॥ नारायण
ख्येनेश्वरेणमुनिनादृष्टत्वान्नारायणीयाख्योयंतैत्तिरीययाजुषशाखागतोपनिषद्रूपेब्राह्मणेचतुर्थः प्रपाठकोनाराय
णीयस्तस्मिन्नित्यर्थः ॥ ६ ॥ नारायणीयेयदुदीरितंस्यादुपासनंतच्चनिरूप्यतेत्रातत्राहृतोद्वाविदुपाठएवप्राज्ञैरतोव्या
ख्यायतेसएव ॥ ७ ॥ तथाहि । दलाष्टकोपेतहृदब्जमल्पंविपाप्ममैकाग्र्यपदत्वहेतोः । ब्रह्मोपलब्धेस्तदुपासनायाः स्थान
त्वतोब्रह्मनिवेशभूतं ॥ १ ॥ प्रासादवद्ब्रह्मपुरमध्यसंस्थतत्रापिचाल्पंगगनंसमस्ति । हृदिस्थितत्वादुपचारतोल्पंव्यपेतरा
कंपरमात्मतत्त्वं ॥ २ ॥ अत्रापिवाक्येदहरंनभःस्याद्ब्रह्मैवपूर्वोक्तनयौघसाम्यात् । एवंचतस्मिन्हृदयांबुजेंतर्यब्रह्मतत्त्वं
तदुपासितव्यं ॥ ३ ॥ वेदस्यचादौकथितस्तदंतेप्रतिष्ठितोयः प्रणवः स्वराख्यः । सध्यानकालेजगदेकहेतावव्याकृताख्य
प्रकृतौविलीनः ॥ ४ ॥ ध्यात्वाविराजंचहिरण्यगर्भमव्याकृतंचप्रणवाक्षरेषु । विराडकारस्यविलाप्यसूत्रंतंचाप्युकारंप्र
कृतौमकारे ॥ ५ ॥ विलापयेत्तस्यचतारकस्यलीनस्यतस्यांप्रकृतौपरेयः । चतुर्थमात्रात्मकतारनादेध्येयः समस्त

तोस्तिदेवः॥६॥सोयंमहेशोविबुधैरुपास्यः संसारबंधस्यविनाशनाय।अनेनमंत्रेणतुपूर्वमुक्तंप्रपंचितंस्याद्गगनाख्यव
स्तु॥७॥तस्मिन्नुपास्यगुणजातमीशोसहस्रमूर्धादिकमुच्यतेत्र।सहस्रलोकात्मविराट्पुः स्यादीशस्यचैवंसतियो
स्मदादेः॥८॥मूर्धादिकः सोपितदीयएवेत्यनंतमूर्धापरमेश्वरः स्यात्।सर्वास्मदीयानिविलोचनानितस्यैवविश्वाक्ष
उदीरितोतः॥९॥तंसर्वलोकस्यसुखस्यहेतुंश्रीमन्महेशंपरिचिंतयीत।विराट्पुः स्वस्यमहेश्वरस्यरूपंनिजंमंत्रगतोत्त
रार्धे॥१०॥विश्वस्यविष्णोपरिकल्पितत्वाद्विश्वा।सकोपिपरमेश्वरः स्यात्।नरोस्थतत्वान्ययनंयतस्तन्नारायणोदेवइती
रितश्च॥११॥इंद्रादिरूपेणचसंस्थितत्वात्तथाश्रुतेनस्मरतीतिचासौ।हेतुस्ततस्यात्परमः प्रकृष्टः प्रभुः समर्थः सकलंनियंतुं
॥१२॥जडौघतः परमः प्रकृष्टोनाशेनहीनोभवतीतिनित्यः।विश्वस्त्वसर्वात्मकउच्यतेयंनारायणत्वंतुनिरुक्तमस्य॥१३॥
हरत्यघंतेनहरिर्यदेतज्जगत्प्रतीतंपुरुषोर्थतस्तत्।विश्वंतदस्यव्यवहारसिध्यैसमाश्रयेदित्यपजीवतीति॥१४॥अत्रप
नीतः पुनरुक्तदोषोमंत्रांतरत्वेननिवारणीयः।तथातथाध्येयतयास्तुतित्वान्नास्त्येवचासौपुनरुक्तिदोषः॥१५॥पतिर्जगत्पा
लनतोनियंताजीवात्मनोतेनतदीश्वरः स्यात्।नित्यत्वतः शाश्वतशब्दितः स्याच्छिवोमहामंगलमच्युतश्च॥१६॥भवेन्महा
प्रोद्दत्तमेतेरघुयतोमहाज्ञेयइतीरितोतः।विश्वस्वरूपः प्रकृतित्वतः स्यात्परायणंश्रेष्ठसमाश्रयत्वात्॥१७॥नारायणो

ब्रह्मणएवतत्त्वंमहत्ततोसौपरएवचात्मा।ज्योतिर्यदुत्कृष्टमुदीर्यतेतत्तन्नारायणोतःपरमात्मरूपः॥१८॥अस्मिंल्लोकेदृश्य
तेयच्चकिंचिद्दूरस्थंवाश्रूयतेतत्समस्तं।अंतर्बाह्यंव्याप्यनारायणोसावास्तेयस्मात्स्यादुपादानहेतुः॥१९॥परिछेदहीनं
विनाशव्ययेतंसमस्तज्ञमंतंसमुद्रंभवाब्धौ।एकस्याखिलस्योद्भवस्योपजीव्यंभजेतामुपेवापवर्गस्यसिध्यै॥२०॥ना
रायणस्यसद्रूपंसंगृह्योक्तंतुपूर्वतः।उत्तरार्धेनमंत्रस्योपासनस्थानमुच्यते॥२१॥पद्मस्यमध्यच्छिद्रेणतुल्यंहृदयग
ह्वितं।लौकिकंपद्ममूर्धास्यंहृत्संकंजमधोमुखं॥२२॥ग्रीवाबंधाधःप्रदेशेस्तिनाभेरूर्ध्वेभागेयावितस्तिस्तदंते।नाभि
ग्रीवाबंधमध्येहृदब्जंजानीयात्तत्सर्वलोकास्पदंस्यात्॥२३॥मनोहिहृदयाब्जेस्तितेनेदंकल्पितंजगत्।ततोहृदब्जंविश्व
स्यमहदायतनंस्मृतं॥२४॥हृत्संकजंपंकजकुड्मलाभंमध्येशरीरस्यतुलंबतेयः।व्याप्तंशिराभिर्हृदयस्यचांतेसमीपदेशे
सुषिरंचसूक्ष्मं॥२५॥नाडीसुषुम्नाप्रथिताहितस्यानालंतुसूक्ष्मंसुषिराभिधेयं।तस्मिन्जगत्तिष्ठतितत्रचित्तेप्रतिष्ठिते
सर्वपतिर्हितिष्ठति॥२६॥तन्नालमध्येस्त्यनलःप्रवृद्धोयुतःशिखाभिर्बहुभिस्ततश्च।सोवाथसुनाडीषुशिखाविशेषैर्व्यापित
तोविश्वसुखःसचाग्निः॥२७॥भुक्तेग्रगान्विभजन्शरीरेसर्वत्रभुक्तंसमवस्थितोग्निः।नजीर्यतेसौजरयेच्चभुक्तंकचिःस्मृतो
यंकुशलोतएव॥२८॥आरभ्यपादस्यतलंशिरोंतंसंतापयत्यग्निरयंस्वदेहं।तदग्निमध्येग्निशिखातिसूक्ष्मानालेनमूर्धा

ब्र०सू०का०टि० ९२

तमवस्थितासौ ॥२९॥ मध्येस्थितानीलघनस्थविद्युल्लेखेवसार्द्दीप्तिमतीचतन्वी। स्यात्पीतवर्णाचतनूपमासासूक्ष्मांतराण
सुपमानयोग्या ॥३०॥ स्थितः शिखायाज्वलनस्यमध्येतस्याः परेशोजगदेकहेतुः। स्थानंचतस्यात्यसुपासनार्थंतथापिना
स्योपितुसर्वरूपः ॥३१॥ ब्रह्माशिवः स्वर्गपतिः सईशोमायाविशिष्टोक्षरउच्यतेसौ। मायाविहीनः परमोतएवस्वातंत्र्यतः
स्यात्स्वयमेवराजा ॥३२॥ ब्रह्मातिसत्यंसमुपासकानामनुग्रहायैववपुर्मानुमेरः। स्याद्दक्षिणेपिंगलवर्णयुक्तोवामेतुकृष्णो
भवदूर्ध्वरेताः ॥३३॥ स्वकीयरेतः खलुनीलकंठः स्वब्रह्मरंध्रेधृतवान्महात्मा। अयंविरूपाक्षउदीरितः स्यात्त्रिलोचनत्वात्तमिमं
महेशं ॥३४॥ स्मृत्वाप्रणामः क्रियतेचतस्मैविश्वात्मकायाखिलहेतुभावात्। श्रीकाशिकेशंप्रणमाम्युमेशंत्रिलोचनंब्रह्म
परंतदसि ॥३५॥ इतिश्रीमत्पुरुषोत्तमानंदतीर्थयतिवरप्रणीतेश्लोकबद्धवेदांतन्यायरत्नावलीग्रंथस्थेतैत्तिरीयना
रायणीयोपनिषद्गतदहरोपासनाव्याख्यानंसमाप्तं ॥ आदिपादादितएतावत्पर्यंतमाद्यंतकारिकाः ॥१७४॥ इतिश्री
स्कप्रथमाध्यायेज्ञेयब्रह्मलिंगकवाक्यसमन्वयाख्येतृतीयपादेअष्टसूत्रंदहराधिकरणंपंचमं ॥५॥ अनुकृतेस्तस्य
च ॥१॥

राम ९२

अत्र प्रथमाध्यायकारिकाः
अथ द्वितीयाध्यायका० ३५७
अथ तृतीयाध्यायका० ६२५
अथ चतुर्थाध्यायकारिकाः २७१

प्रथमाध्यायकारिकापत्राणि
१४ द्वितीयायकारिकापत्राणि
२५ तृतीयाध्यायकारिकापत्रा०
१२ चतुर्थाध्यायकारिकापत्राणि

आनंदमयाधिकर
णमात्रकारिकासु
१२८

इति श्री भगवद्वेदव्यासप्रणीत [illegible] शारीरकब्रह्मवेदान्तमीमांसाशास्त्र
सूत्रेषु गुणसूत्रसहिताधिकरणार्थसंग्राहककारिकासु
प्रथमविषयाभ्रणेसमन्वयाध्याये प्रथमपादे शास्त्रयोनित्वाधिकरणे पत्रे ७६५
स्तानि विनियोगः प्रयोगः रूपा विषयश्चत्वारः प्रकाराः तत्रोत्पत्तिर्ज्ञानज्ञप्तिः १ अधिकार
फलसाधनताबोधनं विनियोगः २ फलस्य कर्तृसंबंधबोधनमधिका
रः ३ अनुष्ठेयताबोधनं प्रयोगः ४

Gunda Sutra Brahma Sutrartha
Sangrahaka Karika Prarambh,

गुणसूत्राख्यब्रह्मसूत्रार्थसंग्राहककारिकाप्रारंभः

874

11

C d No: ....   Folder No:

مركز جمعة الماجد للثقافة والتراث - دبي

قسم المخطوطات

رقم المركز: ....

العنوان: GUNDA SUTRA BRAHMA SUTRARTHA SANGRAHAKA KARIKA...

PRARAMBH

المؤلف: ....

البداية: ....

النهاية: ....

الناسخ: .... تاريخ النسخ: .... اللغة: SANSKRIT


الخط: .... الجزء: .... الأوراق: 113 Pages الموضوع: ....

الملاحظات: ....

المراجع: الأعلام / معجم المؤلفين / الكشف / فهرس المكتبة: .... /

المصدر: البلد: الهند المدينة: حيدر آباد المكتبة: الجامعة العثمانية الرقم: 31/11

المصور: الاسم MOHD. ASHRAF ALI التوقيع: Ash التاريخ: 22/7/2006م



مركز جمعة الماجد للثقافة والتراث - دبي

النهاية